Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३६७
शास्त्रपरिचयग्रन्थमाला - ९

NAAC A+

संस्कृतव्याकरणशास्त्रप्रवेशिनी

(द्वितीयो भागः)

प्रधानसम्पादकः
आचार्यः जि.एस.आर्.कृष्णमूर्तिः
कुलपतिः

सम्पादकः
आचार्यः जानमद्दि रामकृष्णः

रचयित्री
डा. शिवकुमारी काटूरि

राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

राष्ट्रियसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन प्रतिष्ठापितः केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७ (आ.प्र.)
2025

CC-0. In Public Domain. Cuddalore Collection, TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - 367
शास्त्रपरिचयग्रन्थमाला - 9

संस्कृतव्याकरणशास्त्रप्रवेशिनी

(द्वितीयो भागः)

प्रधानसम्पादकः

आचार्यः जि.एस.आर्.कृष्णमूर्तिः

कुलपतिः

सम्पादकः

आचार्यः जानमद्दि रामकृष्णः

रचयित्री

डा. शिवकुमारी काटूरि

राष्ट्रियसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन प्रतिष्ठापितः केन्द्रीयविश्वविद्यालयः)

तिरुपतिः - ५१७५०७ (आ.प्र.)

२०२५

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

संस्कृतव्याकरणशास्त्रप्रवेशिनी (द्वितीयो भागः)

SAṂSKṚTA VYĀKARAṆA ŚĀSTRA PRAVEŚINĪ
(Part II)

General Editor : **Prof. G.S.R. Krishna Murty**

Editor : **Prof. J. Ramakrishna**

Author : **Dr. Siva Kumari Katuri**

ISBN : **978-93-90038-88-6**

© National Sanskrit University, Tirupati - 517507, Andhra Pradesh.

Publisher : **REGISTRAR**
National Sanskrit University, Tirupati
e-mail: registrar_nsut@nsktu.org

Web-site : https://nsktu.ac.in

Publication Coordinator : **Department of Research & Publications**
National Sanskrit University, Tirupati

Publication year: 2025

Copies printed : 350

Book size : Royal Octavo

Pages : 360 (xiv + 346)

Price : ₹ 700.00

Printed at : Prajasakti Printers & Publishers Pvt. Ltd., Tirupati

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

राष्ट्रियसंस्कृतविश्वविद्यालय:
(संसद: अधिनियमेन प्रतिष्ठापित: केन्द्रीयविश्वविद्यालय:)
तिरुपति: -५१७५०७, आं.प्र.

आचार्य: जि.एस.आर्. कृष्णमूर्ति:
कुलपति:

NATIONAL SANSKRIT UNIVERSITY
(A Central University established by an Act of Parliament)
TIRUPATI-517507, A.P.

Prof. G.S.R. KRISHNA MURTY
Vice-Chancellor

E-mail : vice_chancellor@nsktu.org
Ph.: 0877-2287680 ; Mobile: 9440626551
Website : https://nsktu.ac.in

मोद: प्रमोद: आनन्द:

विदितचरमेव भाषा भावानां विनिमयाय साधनं भवति। भाषाया: अवगमने व्याकरणं सहायकं भवति। सकलशास्त्राणाम् अध्ययनाध्यापनकर्मणि छात्रेभ्योऽध्यापकेभ्यश्च व्याकरणम् उपकारकमिति नास्ति सन्देह:। पाणिने: व्याकरणं विज्ञानसम्मतं भवति। तस्य व्याकरणशास्त्रस्य प्रवेशाय सरल-मानकसंस्कृतेन लेखनार्थं प्रवृत्ति: सञ्जाता पूर्वतनानामधिकारिणां कुलपतीनाम् आचार्याणां कीर्तिशेषाणां विरिवेण्टि मुरलीधरशर्ममहाशयानाम्। प्रवृत्ते: फलत्वेन संस्कृतव्याकरणशास्त्रप्रवेशिनीग्रन्थस्य प्रथमो भाग: प्रकाशित:। अयं ग्रन्थ: प्रवेशार्थिनां छात्राणामुपयोगाय भवतीति सिद्धम्। तेनैव कारणेन संस्कृतविश्वविद्यालयानां व्याकरणपाठ्यक्रमे अयं ग्रन्थ: निर्दिष्ट:। तदुत्साहेन द्वितीयभागोऽपि प्रकाशितो भवति।

अस्मिन् भागे द्वात्रिंशत् पाठा: सन्ति। एतेषु पाठेषु सुबन्तशब्दानां, स्त्रीप्रत्ययानां, तद्धितप्रत्ययानाञ्च व्याकरणप्रक्रिया दर्शिता। एतेषामवगमनाय प्रक्रियाकौमुद्या: अनुसारं, सिद्धान्तकौमुद्या: अनुसारं च बहुकष्टमनुभवन्ति। तस्य कष्टस्य दूरीकरणाय अयं ग्रन्थ: अत्यन्तमुपयोगी भवति।

तदपि विशेषतयाऽत्र चित्रमाध्यमेन सारणीमाध्यमेन च विषयस्य प्रस्ताव: कृत:। एतेन छात्राणां सुष्ठु विषयाधिगमो भवति। अधिगमस्यानन्तरम् अभ्यासा अपि योजिता:।

अधुना समयो भवति शास्त्रस्य मर्यादामनुसृत्य छात्रा: स्वयं पठित्वा लाभान्विता: भवन्ति। प्राय: सरलीकरणस्य उपाया: अनवरतं क्रियन्ते। अष्टाध्यायीग्रन्थस्य सरलीकरणं वार्तिकाणां योजनम्, वार्तिकाणां सरलीकरणं भाष्यकरणम्। एवं रूपेण सूत्राणां, वार्तिकाणां, भाष्यस्य च सरलीकरणमेव सिद्धान्तकौमुद्या: लेखनम्। तस्यैव

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सरलीकरणं मध्यमकौमुद्याः रचनम्। तस्यैव सरलीकरणं सिद्धान्तकौमुद्याः प्रणयनम्। तस्य सरलीकरणम् एतावता प्रयासः न कृतः। तस्मिन्नेव प्रयासे अस्माकं विश्वविद्यालयः प्रयत्नं करोति। तत्रापि प्रथमे भागे सन्धिविषयाः, समासविषयाः, कारकविषयाः च चर्चिताः। तस्मिन् प्रथमे भागे सारण्यः, अभ्यासपाठाः अपि कल्पिताः। तैः व्याकरणस्य प्रवेशः सुलभो भवति। भाषाऽपि अतीव सरला। तया पठितुः एतेषु विषयेषु सुगमः बोधो भवति।

द्वितीयभागोऽपि अनेन क्रमेण रचितः। व्याकरणेन भाषाज्ञानाय पदानि, वाक्यानि परिचितानि भवन्ति। पदानां ज्ञानाय सुप्रत्ययज्ञानम् अपेक्षितमस्ति। संस्कृतभाषायां प्रतिपदं प्रत्ययेन सह प्रयोगः कर्तव्यः। प्रत्ययानां योजनेन प्रकृतेः रूपान्तराणि भवन्ति। राम प्रकृतिः, सुप्रत्ययः रामशब्दः भवति। तृतीयाविभक्तौ सुप्रत्यये राम प्रकृतिः, टाप्रत्ययः, 'टा'इत्यस्य इनादेशः भवति। राम + इन = रामेण। प्रकृतौ रेफः भवति चेत् प्रत्यये 'न'कारस्य 'ण'कारः भवति। एवं पदानामवगमने सूक्ष्मा दृष्टिर्भवेत्। एवं सर्वशब्दानाम् अन्तं स्वीकृत्य प्रत्यययोजनेन अनेकधा रूपाणि भवन्ति। तान्येव शब्दरूपाणि भवन्ति। स्त्रीप्रत्ययानामपि योजनेन स्त्रीलिङ्गशब्दाः भवन्ति। चटकः पुंलिङ्गे, आप्रत्यये चटका स्त्रीलिङ्गे, दशरथशब्दस्य इञ्प्रत्यये दशरथस्य पुत्र इत्यर्थे दाशरथिः इति रूपं भवति। तद्धितप्रत्यययोजनेन कानिचन पदानि निष्पन्नानि भवन्ति। एतेषां शब्दरूपाणां, स्त्रीप्रत्ययान्तरूपाणां, तद्धितप्रत्ययान्तरूपाणां प्रक्रियादृष्टिमुपलक्ष्य अयं द्वितीयभागः सङ्गृहीतः।

अस्य ग्रन्थस्य लेखिका भवति डॉ. शिवकुमारी। इयञ्च व्याकरणस्य पाठानां बोधने समर्था भवतीति मोदः। अस्य ग्रन्थस्य सम्पादकाः आचार्याः जानमद्दि रामकृष्णमहोदयाः महान्तः व्याकरणमर्मज्ञाः भवन्तीति प्रमोदः। अयं ग्रन्थः इदानीं पाठकानां हस्ते विलसतीति आनन्दः।

ग्रन्थोऽयं पाठकानां व्याकरणस्यावगमने उपकारको भवतीति मम दृढः विश्वासः। सम्पादकेभ्यः धन्यवादाः प्रदीयन्ते। इति शिवम्।

(जि.एस.आर्.कृष्णमूर्तिः)
कुलपतिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रवेशिनीमुद्दिश्य किञ्चित्...

बहो: कालत: विद्याध्ययनप्रारम्भदशायां संस्कृतशिक्षणसरणिरासीत् मौखिक्येव। प्रारम्भे शब्दधातुकोशानां कण्ठस्थीकरणं, तत: पञ्चकाव्यपाठनं, ततश्च शास्त्राणां प्रारम्भिकग्रन्थानां लघुसिद्धान्तकौमुदी-तर्कसङ्ग्रहादीनाम् अध्यापनमिति क्रम: प्राय: समग्रे देशे प्रवर्तते स्म। प्रारम्भस्तर एव संस्कृतभाषाया: मूलभूतांशानाम् अध्यापनेन शास्त्रप्रवेश: सम्भवति सुकर इति संस्कृतशालासु शास्त्राध्यापनसरणिरियं प्रावर्तत पुरा।

परमधुना संस्कृतशिक्षणसरणिरन्यादृश्येव। शालासु छात्रा: षष्ठकक्ष्यात: दशमकक्ष्यापर्यन्तं संस्कृतं भाषात्वेन पाठ्यपुस्तकमाध्यमेन अधीत्य शास्त्राध्ययनार्थं प्राच्यकलाशालासु संस्कृतविद्यापीठादिषु च प्रविशन्ति।

शालासु तैरधिगतं संस्कृतज्ञानम् अत्यल्पमेव। विद्यापीठादिषु तत्तादृशान् अल्पसंस्कृतज्ञान् छात्रान् विनैव शास्त्रपरिचयं शास्त्रमध्याप्यते। तादृशच्छात्रा: शालास्वधिगतेन अल्पसंस्कृतज्ञानबलेन न जात्वपि शास्त्रमधिगन्तुं पारयन्तीति स्थिति: तत्तच्छास्त्राध्यापकानाम् अनुभवैकवेद्या।

शास्त्राध्यापने सर्वत्र परिदृश्यमाना विलक्षणा स्थितिरेवम् अनुमीयेत।

तरणकौशलमधिगन्तुकामं प्रारम्भे तरणविषयकसिद्धान्तम् अध्याप्य तरणाभ्यासार्थं समुद्रे पातयामश्चेत् भवति यादृशी स्थितिस्तस्य तादृश्येव स्थितिरस्य सामान्यसंस्कृतज्ञानवत: छात्रस्य शास्त्राध्ययनस्य तरणविषयकसिद्धान्ताध्यापनात्परं तरणाभ्यास: तरणतडागे (Swimming Pool) कारणीय:, न जात्वपि समुद्रे। तरणतडागे तरणाभ्यास: जलनिमज्जनजनितप्राणभयोत्पादकत्वाभावात् तरणानन्दजनकत्वाच्च सुकर: तरणप्रेरकश्च। तथैव अल्पसंस्कृतज्ञानवतश्छात्रस्य शास्त्राध्यापनात्पूर्वं सरलरीत्या शास्त्रपरिचय: कार्य:, न तु शास्त्रं साक्षादध्यापनीयम्। अल्पविद्यापरिग्रहाणां सङ्क्षेपरुचीनाञ्च संस्कृतच्छात्राणां शास्त्राध्यापने अवश्यं फलदेतिहेतो: सरणिरियमेव शरणीकरणीया। नान्या गतिर्विद्यते अयनाय।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अतः पूर्वोक्तां देशव्यापिनीं संस्कृतशास्त्राध्ययनपरिस्थितिं सम्यगाकलय्य **संस्कृतशास्त्रप्रवेशिनीग्रन्थमालायाः** प्रकाशनं विद्यापीठेन प्रारब्धम्। तन्मालायामयं **संस्कृतव्याकरणशास्त्रप्रवेशिनीग्रन्थः** प्रथमपुष्पति।

एतन्माल्यायां ग्रथितास्समेऽपि शास्त्रप्रवेशिनीग्रन्थाः "यया रीत्या अस्मन्मनः सौकर्येण विषयान् गृह्णाति, चिरं स्मरति च तया विशिष्टरीत्या सन्ति प्रणीताः।" ग्रन्थस्याय वैशिष्ट्यानि इत्थं सन्ति।

(1) प्रयोजननिर्देशः - प्रत्येकमपि पाठस्य प्रारम्भे पाठाध्ययनसमाप्तेः परं छात्रः यद् यज्ज्ञास्यति तत्सर्वं पूर्वमेव प्रयोजननाम्ना निर्दिश्यते। अनेन सः आत्मना अधिगमिष्यमाणं विषयमुद्दिश्य पूर्वमेव ज्ञास्यति। अनेन तन्मनः तत्पाठ्यविषयमेव केन्द्रीकृत्य प्रवर्तिष्यते।

(2) सारणीचित्रादिमाध्यमेन पाठ्यांशप्रस्तुतिः - पाठाश्च सारणीचित्रादिमाध्यमेन प्रस्तुताः, यद्दर्शनेन सारणीचित्रगताः पाठ्यांशाः चित्ररूपेण मनःपटले मुद्रितास्सन्तः चिरं स्मर्यन्ते। विभज्य अवगमनं संयोज्य च अवगमनमिति रीतिरत्र समाश्रिता। अनया पाठ्यांशावगमनं भवति सुकरम्।

(3) विषयविभाजनम् - सम्पूर्णविषयस्य अपेक्षया खण्डशः विषयस्य अवगमनं स्मरणञ्च सुकरं भवतीति हेतोः विषयस्सर्वोऽपि खण्डशः विभक्तः क्रमशश्च प्रस्तुतः। नत्वत्र विषयस्सर्वोऽपि सामग्र्येण सातत्येन च निर्दिष्टः।

(4) उदाहरणानि - प्रत्येकमपि पाठ्यांशस्य उदाहरणानि दत्तानि। अनेन पाठ्यांशस्य अवगमनं विश्लेषणञ्च सुकरम्।

(5) पाठसारः - प्रत्येकं पाठस्य अन्ते प्रस्तुतः तत्सारः छात्रं न केवलं पाठ्यांशं पुनः स्मारयति अपि तु विस्तृतांशं सङ्क्षिप्य मनसि धर्तुञ्च अभ्यासयति।

(6) अभ्यासाः - प्रत्येकस्मिन् पाठे प्रस्तुताः विविधाभ्यासाः छात्राणां विषयावबोधन-स्मरण-विश्लेषणादिबौद्धिकशक्तीः मूल्याङ्कयन्ति।

(7) परियोजना - परियोजना तु अधीतविषयस्य विस्तृताध्ययनार्थम् अन्वेषणार्थं स्थलान्तरेषु वा तत्प्रयोगपरीक्षणार्थं च छात्रान् प्रेरयति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

(8) वर्णरञ्जनम् - सूत्ररूपाणि वाक्यानि पेटिकायां वर्णरञ्जितानि विहितानि (उदा- उपधा - अन्त्यात् अलः पूर्वः वर्णः)। एतद्विधानेन तानि छात्रमनः पटले चित्ररूपेण अङ्कितानि भूत्वा चिरं स्मर्यन्ते।

(9) भाषा - प्रायः सन्धि-समासरहितत्वात् भाषा सरला सुखबोधा च। वाक्यरचनारीतिश्च मातृभाषावाक्यसरणिमनुसरति सरणिरियं शीघ्रविषयावगमने सारल्यं वितनोति।

इत्थमत्र पूर्वोक्तविधया समग्रविषयनिरूपणं शिक्षामनोविज्ञानसिद्धान्तान् आश्रित्य प्रवर्तत इति हेतोः **संस्कृतव्याकरणशास्त्रप्रवेशिनी**यं नितरां वैज्ञानिकी, मनोवैज्ञानिकी च। अत एवेयं छात्रसमाकर्षिणी शास्त्राध्ययनप्रेरिणी च भविष्यतीति मे द्रढीयान् विश्वासः।

ग्रन्थरचयित्री डा. काटूरि शिवकुमारी मत्सूचनामनु प्रत्येकमप्यंशं मदुक्तं सावधानम् अनुपालयन्ती प्रथमं भागमिव द्वितीयमपि भागं सुष्ठु प्राणैषीत्। नन्वियं नाम्ना वयसा च कुमारी परं वैदुष्येण, अध्ययनाध्यापननिष्ठया नितरां प्रौढा, विदुषां वशंवदा च। प्रारम्भिकच्छात्राणां सुखबोधाय शास्त्रपरिचायकग्रन्थाः समारच्या येन ते तत्तच्छास्त्रे सलीलं प्रवेशं प्रेरणां च लभेरन्निति मत्सङ्कल्पममुं रचयित्रीयं सफलयतीति हेम्नः परमामोदः एतद्ग्रन्थरत्नप्रणयनेन रचयित्र्याः उद्देशस्सकलोऽपि परिपूर्णो भवत्वित्याशासे।

सम्पादकीयं समालिखन् व्याकरणशास्त्रचणाः, वाग्मिनां प्राग्रहराः, परिशोध-कपरिवृढाः शृङ्गेरीश्रीदक्षिणाम्नायमठाधीशानां परमपूज्यानामनन्तश्रीविभूषितानां **श्रीमद्भारतीतीर्थश्रीचरणानां** प्रियशिष्याः, दिगन्तयशसां नैकशास्त्रनदीष्णानां महामहोपाध्यायानां **श्री पेरिसूर्यनारायणशास्त्रिवर्याणां** शिष्योत्तमाः,मन्मार्गदर्शकाः, शास्त्राध्ययनमेव तप इति भावयन्तः आचार्याः **जानमद्दि रामकृष्णमहोदयाः**। तत्सम्पादकीयं ग्रन्थपरिचयं सुष्ठु प्रास्तुवन्। तेभ्यो मदीयं कार्तज्ञ्यमाविष्क्रियते।

संस्कृतव्याकरणशास्त्रप्रवेशिनी इयम् आभारतं प्रतिष्ठितासु संस्कृत-शिक्षणसंस्थासु आदर्शसंस्कृतव्याकरणशास्त्रपाठ्यपुस्तकरूपेण सुप्रथिता भविष्यतीत्यत्र न मे कोऽपि शङ्कालेशः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भगवान् सप्ताचलाधीशः पद्मावतीजानिः एतच्छास्त्रप्रवेशिनीपरम्परां प्रकामं प्रथितयशस्कां विदधात्विति तच्चरणपङ्कजयोः प्रणमन् विरमामि।

पाणिनीयार्थसङ्ग्रन्थे सन्दृब्धा वेशिनी शुभा ।
सर्वमान्या विशिष्टैषा छात्राणां मोदमावहेत् ।।

विदुषां वशंवदः
(वि.मुरलीधरशर्मा)
कुलपतिचरः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सम्पादकोक्तिः

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ।।

लोके सर्वे जनाः स्वाभिप्रायप्रकटनाय बहून् उपायान् शरीरचेष्टादिरूपान् आश्रयन्ति। तत्र उत्तम उपायः भाषायाः विनियोगः। भाषया एव परस्परम् अभिप्रायाणाम् आविष्करणं सुस्पष्टं भवति। तेन अभीष्टानि सिध्यन्ति। अतः परस्परं भावानां विनिमयाय भाषा एव उत्तमं साधनम्। सा भाषा यदि परिशुद्धा भवति तर्हि अर्थावबोधः सुलभः भवति। भाषायाः परिशुद्धिः व्याकरणाधीना।

अत एवोक्तम्-

यद्यपि बहु नाधीषे तथाऽपि पठ पुत्र! व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्।। इति।

अतः व्याकरणं तत्तद्भाषायाः महत्त्वं प्रकाशयति। इमम् अभिप्रायं मनसिकृत्य व्याकरणस्य स्वरूपम्, तस्य आवश्यकता, तस्य प्राधान्यम् इत्यादीन् अंशान् बोधयितुं कश्चन प्रयत्नः **संस्कृतव्याकरणशास्त्रप्रवेशिनी** इत्याख्येन लघुना ग्रन्थेन क्रियते। अत्यन्तं सरलां भाषां सरलां रीतिञ्च समाश्रित्य अत्र पाठाः विरचिताः येन संस्कृतभाषाप्रवेष्टॄणां महते प्रयोजनाय भवेयुः।

"संस्कृतव्याकरणशास्त्रप्रवेशिनी" इत्यभिधानकः प्रथमो भागः प्राक् प्रकाशितः। तस्मिन् भागे - १) सन्धिप्रकरणम् २) कारकप्रकरणम् ३) समासप्रकरणम् - इति त्रीणि प्रकरणानि दर्शितानि। तत्र आद्ये सन्धिप्रकरणे १६ पाठाः, द्वितीये कारकप्रकरणे ८ पाठाः, तृतीये समासप्रकरणे ६ पाठाः इत्येवमाहत्य ३० पाठाः सन्ति। स च प्रथमो भागः छात्राणामत्यन्तउपकारकः इति बहूनां छात्राणां तोषायाभवत्। महतां विदुषां शुभाशिषश्च लब्धाः।

अनेन प्रयत्नेन नितरां सन्तुष्टाः अस्मत्कुलपतयः मान्याः **विरिवेण्टि मुरलीधरशर्माणः** ग्रन्थरचयित्रीम् आयुष्मतीं डा. काटूरि शिवकुमारीमाहूय द्वितीयमपि भागं ग्रथितुं प्राचोदयन्। सा मत्सकाशे समागत्य कुलपतिमहाशयानां प्रागुक्तां सूचनां

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न्यवेदयत्। तद्रचनायां मार्गनिर्देशनाय संप्रार्थयच्च माम्। यथामति मार्गं निरदिशम्। मम सर्वाः सूचनाः परिपाल्य श्रमेण महता द्वितीयमपि भागं व्यररचत्। आदितः सान्तं व्यलोकिषि। व्याकरणशास्त्राध्ययनप्रविविक्षूणां सौलभ्याय सरला भाषा, सरलतरः क्रमश्चात्र समाश्रितः।

"संस्कृतव्याकरणशास्त्रप्रवेशिनी" इत्याख्ये द्वितीयस्मिन् भागेऽत्र १) सुबन्तप्रकरणम् २) स्त्रीप्रत्ययप्रकरणम् ३) तद्धितप्रकरणम् - इति त्रीणि प्रकरणानि सन्ति। आद्ये प्रकरणे २५, द्वितीये प्रकरणे ३, तृतीये प्रकरणे ४ इत्येवमाहत्य ३२ पाठाः अत्र सन्ति।

सुप्रथितस्य तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिचराः आचार्याः विरिवेण्टि मुरलीधरशर्माणः महान्तो वैयाकरणाः, शिक्षाशास्त्रचणाश्च। तत्तच्छास्त्रपरिचयबोधकाः लघुग्रन्थाः सरलया शैल्या विश्वविद्यालयपक्षतः प्रकाशनीयाः, येन साधारणोऽपि जिज्ञासुः तत्तच्छास्त्रस्वरूपं किञ्चिद्वा बोद्धुं प्रभवेदिति शुभसङ्कल्पस्तेषाम्। तत्फलमेव संस्कृतव्याकरणशास्त्रप्रवेशिनी (द्वितीयो भागः) इत्यभिधानकोऽयं लघुग्रन्थः। तेषामेव प्रेरणयाऽस्मद्विश्वविद्यालये दूरविद्याविभागे अतिथिव्याख्यात्री डा. काटूरि शिवकुमारी प्रयासेन महता लघुमिमं ग्रन्थं प्राणैषीदिति मोदस्य महतः स्थानम्। अनेनास्मत्कुलपतीनां समुद्यमः फलेग्रहिर्भवतादिति, व्याकरणशास्त्रजिज्ञासवो लाभान्विता भवेयुरिति च कलियुगप्रत्यक्षविबुधं पद्मावतीजानिं सप्रश्रयं प्रार्थये।

प्राणैषील्ललितं ग्रन्थं कुमारी शिवपूर्विका ।
जीयात्कृतिश्च कर्त्री च भगवत्कृपया सदा ।।

विद्वद्वश्यः
जानमद्दि रामकृष्णः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृतज्ञताविनिवेदनम्

शब्दब्रह्म उपास्य इह किञ्चिन्निवेद्यते। मत्पित्रोः प्रेरणया आचार्याणां **वेदाल सीतारामचार्युलु** महाभागानामध्यापनेन च संस्कृतव्याकरणाध्ययने रुचिरुत्पन्ना, तथापि तदध्ययनाय अलब्धावकाशा आन्ध्रव्याकरणमधीतवती। ततः साक्षात् पुण्यभूमौ तिरुपतौ वेङ्कटेश्वरस्य पादतले वर्तमाने राष्ट्रियसंस्कृतविद्यापीठे संस्कृतव्याकरणाध्ययनाय आचार्यकक्ष्यां प्रवेष्टुमागमम्। तदानीन्तनाः व्याकरण-विभागाध्यक्षाः विशालहृदयाः आचार्याः **जानमद्दि रामकृष्णमहाभागाः** मां परीक्ष्य आचार्यकक्ष्यायां प्रवेशनाय अङ्गीकृतवन्तः इति महन्मे सौभाग्यम्। ततः अस्मिन्नेव विद्यापीठे विद्यावारिधिरपि आचार्याणां **श्रीपाद सत्यनारायणमूर्तिमहोदयानां** मार्गनिर्देशने समापितम्।

अस्मिन् राष्ट्रियसंस्कृतविश्वविद्यालये २०१६ वर्षादारभ्य अध्यापयन्तीं मां २०१७ तमे वर्षे अस्मद्विश्वविद्यालयस्य तदानीन्तनाः कुलपतयः आचार्याः **विरिवेण्टि मुरलीधरशर्माणः** आहूय, छात्रोपयोगाय शास्त्रे सारल्येन प्रवेशाय च सरलया भाषया शिक्षामनोविज्ञानसिद्धान्तान् च आश्रित्य कश्चन ग्रन्थः ग्रन्थनीयः इति प्रयोजितवन्तः। तेषां मार्गनिर्देशने तत्सूचनाः अनुपालयन्ती ग्रन्थमेनमग्रन्थयम्।

अस्मिन् पुस्तके वर्तमानं प्रत्येकमप्यंशं सूक्ष्मेक्षिकया दर्शं दर्शं निर्दुष्टं सम्पादितवन्तः, शिष्यवत्सलाः मद्गुरवः आचार्याः **जानमद्दि रामकृष्णमहाभागाः** येषाञ्च दृढसङ्कल्पेन पुस्तकमिदमेतद्रूपमलभत। अस्मिन् पुण्ये अवसरे अनयोरुभयोः चरणारविन्दयोः मुहुर्मुहुः प्रणम्य आत्मानं धन्यां भावयामि।

ग्रन्थस्यास्य प्रकाशने नितान्तमुपकृतवद्भ्यः विश्वविद्यालयस्य कुलपतिमहाभागेभ्यः आचार्येभ्यः **जि.एस.आर.कृष्णमूर्ति**महाभागेभ्यः, कुलसचिवाभ्यः आचार्याभ्यः **आर्.जे.रमाश्री**महाभागाभ्यः, तथा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

शोधप्रकाशनविभागाध्यक्षेभ्यः आचार्येभ्यः **शिवरामभट्टमहाभागेभ्यः**, तथैव विश्वविद्यालयस्य शैक्षिकसङ्घायप्रमुखेभ्यः आचार्येभ्यः **रजनीकान्तशुक्लवर्येभ्यः** भूयः कृतज्ञता निवेद्यते।

अवसरेऽस्मिन् आचार्याः **के. वि. रामकृष्णमाचार्युलु** महोदयाः, आचार्याः **एस्. एस्. मूर्तिमहाभागाः**, आचार्याः आर्. एल्. एन् शास्त्रिवर्याः सश्रद्धं स्मर्यन्ते।

महता श्रमेण अक्षरसंयोजनेन पुस्तकस्यास्य सौन्दर्यं वर्धितवते अनुजकल्पाय सि. षण्मुखजानकीरमणाय शुभं कामये।

इत्थम्

विनीता

कादूरि शिवकुमारी

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विषयसूचिका

क्र.सं.	विषयः	पृष्ठ. सं.
1.	सुबन्तप्रकरणम्	1 - 145
	प्रथमः पाठः - सुप्-परिचयः	1
	द्वितीयः पाठः - अजन्तेषु अकारान्तशब्दाः	12
	तृतीयः पाठः - अजन्तेषु आकारान्तशब्दाः	25
	चतुर्थः पाठः - इकारान्तशब्दाः (१)	38
	पञ्चमः पाठः - इकारान्तशब्दाः (२)	52
	षष्ठः पाठः - ईकारान्तशब्दाः (१)	66
	सप्तमः पाठः - ईकारान्तशब्दाः (२)	77
	अष्टमः पाठः - उकारान्तशब्दाः	88
	नवमः पाठः - ऊकारान्तशब्दाः (१)	103
	दशमः पाठः - ऊकारान्तशब्दाः (२)	113
	एकादशः पाठः - ऋकारान्तशब्दाः	126
	द्वादशः पाठः - ओकारान्तशब्दाः	136
2.	हलन्तशब्दाः	146 - 300
	प्रथमः पाठः - तकारान्तशब्दाः (१)	146
	द्वितीयः पाठः - तकारान्तशब्दाः (२)	157
	तृतीयः पाठः - दकारान्तशब्दाः	167
	चतुर्थः पाठः तद्-शब्दः, यद्-शब्दः	185

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्र.सं.	विषयः	पृष्ठ.सं.
	पञ्चमः पाठः - यद्-शब्दः(स्त्री), एतद्-शब्दः	198
	षष्ठः पाठः - राजन्, यज्वन्, ब्रह्मन्, युवन्, मघवन् शब्दाः	212
	सप्तमः पाठः - पथिन्, पञ्चन्, अष्टन्, गुणिन्, अहन् शब्दाः	225
	अष्टमः पाठः - दण्डिन्शब्दः तथा त्रिषु लिङ्गेषु किम्-शब्दः	237
	नवमः पाठः - इदम्-शब्दः त्रिषु लिङ्गेषु, तथा गिर्-शब्दः	249
	दशमः पाठः - पुर्, चतुर् शब्दश्च त्रिषु लिङ्गेषु	263
	एकादशः पाठः - चन्द्रमस्, विद्वस्, पुंस्, पयस् शब्दाः	270
	द्वादशः पाठः - अदस् शब्दः त्रिषु लिङ्गेषु	281
	त्रयोदशः पाठः - अनडुह्, विश्ववाह्, उपानह्, उष्णिह् शब्दाः	292
3.	**स्त्रीप्रत्ययप्रकरणम्**	**301 - 321**
	प्रथमः पाठः - स्त्रीप्रत्ययानां परिचयः	301
	द्वितीयः पाठः - अदन्तेभ्यः स्त्रीप्रत्ययाः	307
	तृतीयः पाठः - इदन्तेभ्यः, उदन्तेभ्यः, ऋदन्तेभ्यः नकारान्तेभ्यः च विहिताः स्त्रीप्रत्ययाः	314
4.	**तद्धितप्रकरणम्**	**322 - 345**
	प्रथमः पाठः - तद्धितप्रत्ययपरिचयः	322
	द्वितीयः पाठः - अणधिकारः	328
	तृतीयः पाठः - ठक्-अधिकारः	335
	चतुर्थः पाठः - ठञ्-अधिकारः, भावार्थप्रत्ययाः, अतिशयार्थप्रत्ययाः	341

****

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुबन्तप्रकरणम्

प्रथमः पाठः - सुप्-परिचयः

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे वयं सुप्-प्रत्ययाः कति सन्ति, के ते इति जानीमः।
2. सुप्-प्रत्ययाः कस्माद् भवन्तीति जानीमः।
3. प्रातिपदिकं नाम किम्, तस्य भेदाः के इति जानीमः।
4. लिङ्गभेदान्, वचनभेदान्, विभक्तिभेदान् च जानीमः।
5. घिसंज्ञां, नदीसंज्ञां च जानीमः।

सुबन्तम् - सुप् अन्ते यस्य तत् सुबन्तम्। सुप् इति प्रत्याहारः। सु, औ, जस्। अम्, औट्, शस्। टा, भ्याम्, भिस्। ङे, भ्याम्, भ्यस्। ङसि, भ्याम्, भ्यस्। ङस्, ओस्, आम्। ङि, ओस्, सुप्। एवं च सुप् इति प्रत्यये 21 प्रत्ययाः सन्ति। अत्र प्रथमस्य सुप्रत्ययस्य अन्तिमे सुप्-प्रत्यये पकारेण मेलनेन सुप् इति प्रत्याहारः भवति। एते सुप्-प्रत्ययाः प्रातिपदिकेभ्यः भवन्ति। अधुना प्रातिपदिकं नाम किम् इति पठामः।

प्रातिपदिकम् -



प्रातिपदिकं 1.व्युत्पन्नम् 2.अव्युत्पन्नम् - इति भेदेन द्विविधम्।

व्युत्पन्नम्-अवयवः विभागः यत्र प्रदर्शयितुं शक्यः तद्, प्रातिपदिकं व्युत्पन्नम्।

यथा - दातृ → दा + तृच्, अत्र दा इति प्रकृतिः, तृच् इति प्रत्ययः, उभयोः संयोजनेन दातृ इति निष्पन्नम्।

व्युत्पन्नप्रातिपदिकम् - कृत्प्रत्ययान्तम्, तद्धितप्रत्ययान्तम्, समासः च।[1]

कृत्प्रत्ययान्तम्-कर्तृ, पाचक, दातृ, कर्तव्य-इत्यादीनि कृत्प्रत्ययान्तप्रातिपदिकानि।

CC-0. In Public Domain. Cuddalore Collection. TN.

तद्धितान्तम् - दाशरथि, वैनतेय, गार्ग्य-इत्यादीनि तद्धितान्तप्रातिपदिकानि।

समासः - प्रतिदिनम्, राजपुरुष, पीताम्बर, हरिहरौ - इत्यादीनि समास-प्रातिपदिकानि।

अव्युत्पन्नम् - अवयवः यत्र विभागः न शक्यः तद्, प्रातिपदिकं अव्युत्पन्नम्।[1]

डित्थ, गावी, गोता - इत्यादीनि।

अव्युत्पन्नप्रातिपदिकम् - धातुभिन्नं, प्रत्ययभिन्नं, प्रत्ययान्तभिन्नं च अर्थवत्-शब्दस्वरूपम्।[2]

अर्थात् 1. धातोः प्रातिपदिकसंज्ञा न भवति। 2. प्रत्ययस्य प्रातिपदिकसंज्ञा न भवति। 3. प्रत्ययः यस्य अन्ते भवति तस्यापि प्रातिपदिकसंज्ञा न भवति। अर्थवत् शब्दस्वरूपं यत् धातुभिन्नं, प्रत्ययभिन्नं, प्रत्ययान्तभिन्नं च भवति तस्य शब्दस्वरूपस्य प्रातिपदिकम् इति संज्ञा।

प्रातिपदिकं पुनः द्विविधम्। 1. अजन्तम् 2. हलन्तम् - इति भेदात्।

अजन्तम् - यस्य प्रातिपदिकस्य अन्ते अच् भवति तत् अजन्तप्रातिपदिकम्। यथा - राम, हरि।

हलन्तम् - यस्य प्रातिपदिकस्य अन्ते हल् भवति तत् हलन्तप्रातिपदिकम्। यथा - मरुत्, राजन्।

लिङ्गम् - त्रिविधम्।



यथा - राम-शब्दः पुलिङ्गे। रमा-शब्दः स्त्रीलिङ्गे। एवं ज्ञान-शब्दः नपुंसकलिङ्गे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

वचनम् - त्रिविधम्।



वचनं नाम संख्या।

एकवचनम् - एकत्वविवक्षायाम् एकवचनम्।[3] यदा एक: एव छात्र: इति वक्तुम् इच्छा भवति, तर्हि छात्रशब्दात् एकवचनप्रत्यय:।

द्विवचनम् - द्वित्वविवक्षायां द्विवचनम्।[4] द्वौ छात्रौ इति वक्तुम् इच्छा भवति चेत् छात्रशब्दात् द्विवचनप्रत्यय:।

बहुवचनम् - बहुत्वविवक्षायां बहुवचनम्।[5] द्वाभ्याम् अपि अधिका: अर्थात् त्रय: अथवा चत्वार: अथवा तत: अपि अधिका: इति वक्तुम् इच्छा भवति, तर्हि छात्रशब्दात् बहुवचनप्रत्यय:।

विभक्तिप्रत्ययानां पठनात् प्राक् इत्संज्ञां जानीम:।

हल: इत्संज्ञा - प्रत्ययस्य, आगमस्य, आदेशस्य, धातो: च य: व्यञ्जनवर्ण: अन्त्य: तस्य इत्संज्ञा भवति।[6] तस्य इत्संज्ञकस्य हल: लोप: च भवति।

उदाहरणानि पश्याम:-

1. प्रत्यय: - ठक् इति। तत्र ककारस्य इत्संज्ञा।
2. आगम: - तुक् इति। अत्र ककारस्य इत्संज्ञा।
3. आदेश: - औश् इति। अत्र शकारस्य इत्संज्ञा।
4. धातु: - शीङ् इति। अत्र ङकारस्य इत्संज्ञा।

अच: इत्संज्ञा - प्रत्ययस्य, आगमस्य, आदेशस्य, धातो: च य: अनुनासिक: अच् तस्य इत्संज्ञा।[7]

1. प्रत्यय: - सु - अत्र उकार: अनुनासिक:। तस्य इत्संज्ञा।
2. आगम: - तुक् - अत्र उकारस्य इत्संज्ञा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. आदेशः - सिच् - अत्र इकारस्य इत्संज्ञा।

4. धातुः - एध - अत्र धकारादनन्तरं विद्यमानः अकारः अनुनासिकः। तस्य इत्संज्ञा।

विशेषेण इत्संज्ञा -

1. प्रत्ययस्य आदौ विद्यमानस्य चकारस्य, टवर्गस्य च इत्संज्ञा भवति।[8]

2. तद्धितप्रत्ययान् विहाय अन्येषु प्रत्ययेषु आदौ वर्तमानस्य लकारस्य, शकारस्य, कवर्गस्य च इत्संज्ञा भवति।[9]

इत्संज्ञायाः निषेधः -

1. विभक्तेः अन्ते विद्यमानस्य तवर्गवर्णस्य इत्संज्ञा न भवति।[10]

2. विभक्तेः अन्ते विद्यमानस्य सकारस्य इत्संज्ञा न भवति।[11]

3. विभक्तेः अन्ते विद्यमानस्य मकारस्य इत्संज्ञा न भवति।[12]

विभक्तयः द्विविधाः। 1.सुपः 2.तिङः च[13]

सुप्-विभक्तयः - सप्त।



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सुप्प्रत्यया: -

विभक्तय:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सु(स्)	औ	जस्(अस्)
द्वितीया	अम्	औट्(औ)	शस्(अस्)
तृतीया	टा(आ)	भ्याम्	भिस्
चतुर्थी	ङे(ए)	भ्याम्	भ्यस्
पञ्चमी	ङसि(अस्)	भ्याम्	भ्यस्
षष्ठी	ङस्(अस्)	ओस्	आम्
सप्तमी	ङि(इ)	ओस्	सुप्(सु)

अत्र कोष्टकेषु इत्संज्ञावर्णानां लोपादनन्तरम् अवशिष्ट: भाग: दत्त:। यथा -

1. जस् इति प्रत्यय:। तत्र जकारस्य इत्संज्ञा[14]। तस्य च लोप: भवति[15]। अस् इति अवशिष्ट:।
2. औट् इति प्रत्यये टकारस्य इत्संज्ञा[16]। तस्य च लोप:। औ इति अवशिष्ट:।
3. शस् इति प्रत्यये शकारस्य इत्संज्ञा[17]। तस्य लोप:। अस् इति अवशिष्ट:।
4. टा-प्रत्यये टकारस्य इत्संज्ञा[18]। तस्य लोप:। आ इति अवशिष्ट:।
5. ङे-प्रत्यये ङकारस्य इत्संज्ञा[19]। तस्य लोप:। ए इति अवशिष्ट:।
6. ङसि-प्रत्यये ङकारस्य[20] इकारस्य च इत्संज्ञा[21]। तयो: लोप:। अस् इति अवशिष्ट:।
7. ङस्-प्रत्यये ङकारस्य इत्संज्ञा। तस्य लोप:[22]। अस् इति अवशिष्ट:।
8. ङि-प्रत्यये ङकारस्य इत्संज्ञा। तस्य लोप:[23]। इ इति अवशिष्ट:।
9. सुप्-प्रत्यये पकारस्य इत्संज्ञा। तस्य लोप:[24]। सु इति अवशिष्ट:।

सुप् प्रत्ययानां विभाग:

एतेषां प्रत्ययानां त्रिधा विभाग: कर्तव्य:।

1. सर्वनामस्थानसंज्ञका:
2. पदसंज्ञानिमित्तका:
3. भसंज्ञानिमित्तका:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वनामस्थानसंज्ञका: प्रत्यया: - सु, औ, जस्, अम्, औट्। एतेषां पञ्चानां सर्वनामस्थानम् इति संज्ञा।[25] नपुंसकलिङ्गे तु एतेषां सर्वनामस्थानम् इति संज्ञा न भवति।

पदसंज्ञानिमित्तका: प्रत्यया: - सुप्प्रत्ययेषु भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप् - एतेषु प्रत्ययेषु परेषु पूर्वस्य पदम् इति संज्ञा।[26]

भसंज्ञानिमित्तका: प्रत्यया: - सुप्प्रत्ययेषु शस्(अस्), टा(आ), ङे(ए), ङसि(अस्), ङस्(अस्), ओस्, आम्, ङि(इ), ओस्। एते सर्वेऽपि अजादि-प्रत्यया:। एतेषु परेषु पूर्वस्य भ इति संज्ञा भवति।[27]

नदीसंज्ञा

विधि:	ईकारान्ता:, ऊकारान्ता: च स्त्रीलिङ्गशब्दा:	गौरी, वधू
निषेध:	ईकारान्ता: इयङ्स्थानिन: तथा ऊकारान्ता: उवङ्स्थानिन:	श्री,भू
निषेधस्य निषेध:	ईकारान्त: इयङ्स्थानी स्त्रीशब्द:, तत्र नदीसंज्ञानिषेध: न प्रवर्तते।	स्त्रियै
विकल्पविधि:	1. ईकारान्ता: इयङ्स्थानिन:, ऊकारान्ता: उवङ्स्थानिन: च आमि ङिति च नदीसंज्ञां वा प्राप्नुवन्ति। 2. ह्रस्व-इकारान्ता:, ह्रस्व-उकारान्ता: च स्त्रीलिङ्गशब्दा: ङिति वा नदीसंज्ञां प्राप्नुवन्ति।	श्रीणाम्/श्रियाम् श्रियै / श्रिये भ्रुवै, भ्रुवे मत्यै, मतये धेन्वै, धेनवे

घिसंज्ञा

विधि:	अनदीसंज्ञस्य ह्रस्वेकारान्तस्य, ह्रस्वोकारान्तस्य च घिसंज्ञा	कवि धेनु
निषेध:	सखिशब्दस्य घिसंज्ञा भवति	सखि
विशेषविधि:	पतिशब्दस्य समासे एव घिसंज्ञा, समासाभावे न भवति।	भूपति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नदीसंज्ञा

1. ईकारान्ता:, ऊकारान्ता: च नित्यस्त्रीलिङ्गा: नदीसंज्ञाका: भवन्ति।[28] उदा- गौरी, वधू।
2. ईकारान्त: इयङ्स्थानिन:, ऊकारान्ता: उवङ्स्थानिन: च नदीसंज्ञका: न भवन्ति।[29] उदा - श्री।
3. ईकारान्त: इयङ्स्थानी स्त्रीशब्द:। अस्य नदीसंज्ञाया: निषेध: न भवति।[30] उदा - स्त्रियै।
4. ईकारान्ता: इयङ्स्थानिन:, ऊकारान्ता: उवङ्स्थानिन: च ङिति नदीसंज्ञां विकल्पेन प्राप्नुवन्ति।[31] उदा - श्रियै। श्रिये। आमि विकल्पेन नदीसंज्ञां प्राप्नुवन्ति।[32] श्रीणाम्, श्रियाम्।
5. ह्रस्व-इकारान्ता:, ह्रस्व-उकारान्ता: च स्त्रीलिङ्गशब्दा: ङिति विकल्पेन नदीसंज्ञां प्राप्नुवन्ति।[33] उदा - मत्यै/मतये। धेन्वै, धेनवे।

घिसंज्ञा

1. अनदीसंज्ञकस्य ह्रस्व-इकारान्तस्य ह्रस्व-उकारान्तस्य घिसंज्ञा।[34] उदा - कवि।
2. सखिशब्दस्य घिसंज्ञा न भवति।[35]
3. पतिशब्दस्य समासे एव घिसंज्ञा भवति, समासाभावे घिसंज्ञा न भवति। उदा - भूपति।[36]

पाठसार: -

1. सुप् अन्ते यस्य तत् सुबन्तम्। सुप् इति प्रत्याहार:।
2. सुप्-प्रत्यया: प्रातिपदिकेभ्य: भवन्ति।
3. प्रातिपदिकं **व्युत्पन्नम्, अव्युत्पन्नम्** इति द्विविधम्।
4. **व्युत्पन्नप्रातिपदिकम्** - कृत्प्रत्ययान्तं, तद्धितप्रत्ययान्तं, समास: च।
5. यत्र प्रकृतिप्रत्ययविभाग: कर्तुं न शक्यते, तत् अव्युत्पन्नम्।
6. **अव्युत्पन्नप्रातिपदिकम्** - धातुभिन्नं, प्रत्ययभिन्नं, प्रत्ययान्तभिन्नं च अर्थवत्-शब्दस्वरूपम्।
7. प्रातिपदिकं पुन: प्रकारान्तरेण द्विविधम् - 1.अजन्तम् 2. हलन्तम् - इति।
8. यस्य प्रातिपदिकस्य अन्ते अच् भवति तत् - अजन्तप्रातिपदिकम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

9. यस्य प्रातिपदिकस्य अन्ते हल् भवति तत् - हलन्तप्रातिपदिकम्।

10. लिङ्गं त्रिविधम् - 1.पुंलिङ्गम्, 2.स्त्रीलिङ्गम्, 3.नपुंसकलिङ्गम्।

11. वचनं त्रिविधम् - 1.एकवचनम्, 2.द्विवचनम्, 3.बहुवचनम्।

12. एकत्वविवक्षायाम् एकवचनम्। द्वित्वविवक्षायां द्विवचनम्। बहुत्वविवक्षायां बहुवचनम्।

13. प्रत्ययस्य, आगमस्य, आदेशस्य, धातोः च यः अन्त्यः व्यञ्जनवर्णः तस्य इत्संज्ञा भवति।

14. प्रत्ययस्य, आगमस्य, आदेशस्य, धातोः च यः अनुनासिकः अच् तस्य इत्संज्ञा।

15. विभक्तयः सप्त - 1.प्रथमाविभक्तिः 2.द्वितीयाविभक्तिः 3.तृतीयाविभक्तिः 4.चतुर्थीविभक्तिः 5.पञ्चमीविभक्तिः 6.षष्ठीवीभक्तिः 7.सप्तमीविभक्तिः- इति।

16. सुप्-प्रत्ययाः - सु, औ, जस्। अम्, औट्, शस्। टा, भ्याम्, भिस्। ङे, भ्याम्, भ्यस्। ङसि, भ्याम्, भ्यस्। ङस्, ओस्, आम्। ङि, ओस्, सुप्।

17. सु, औ, जस्, अम्, औट् - एतेषां पञ्चानां प्रत्ययानां **सर्वनामस्थानम्** इति संज्ञा।

18. भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप् - एतेषु प्रत्ययेषु परेषु पूर्वस्य **पदम्** इति संज्ञा।

19. शस्(अस्), टा(आ), ङे(ए), ङसि(अस्), ङस्(अस्), ओस्, आम्, ङि(इ), ओस्। एते सर्वेऽपि अजादिप्रत्ययाः। एतेषु परेषु पूर्वस्य **भ** इति संज्ञा भवति।

20. ईकारान्ताः उकारान्ताः च नित्यस्त्रीलिङ्गाः नदीसंज्ञकाः भवन्ति।

21. ईकारान्ताः इयङ्स्थानिनः,ऊकारान्ताः उवङ्स्थानिनः च नदीसंज्ञकाः न भवन्ति।

22. ईकारान्तः इयङ्स्थानी स्त्रीशब्दः। अस्य नदीसंज्ञायाः निषेधः न भवति।

23. ईकारान्ताः इयङ्स्थानिनः, ऊकारान्ताः उवङ्स्थानिनः च आमि ङिति च नदीसंज्ञं विकल्पेन प्राप्नुवन्ति।

23. ह्रस्व-इकारान्ताः ह्रस्व-उकारान्ताः च स्त्रीलिङ्गशब्दाः ङिति विकल्पेन नदीसंज्ञां प्राप्नुवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यास:

एकेन वाक्येन समाधत्त -

1. विभक्तिप्रत्यया: कति सन्ति? के ते?
2. सर्वनामस्थानसंज्ञका: प्रत्यया: के?
3. अव्युत्पन्नं प्रातिपदिकं नाम किम्?
4. व्युत्पन्नं प्रातिपदिकं नाम किम्?
5. कीदृशस्य व्यञ्जनस्य इत्संज्ञा भवति?

योग्यम् उत्तरं चिनुत -

1. प्रातिपदिकस्य कति भेदा:?
   अ) 1 आ) 2 इ) 3
2. वचनस्य कति भेदा:?
   अ) 2 आ) 3 इ) 4
3. लिङ्गस्य कति भेदा:?
   अ) 3 आ) 4 इ) 5
4. गुरु - इदं कीदृशं प्रातिपदिकम्?
   अ) हलन्तम् आ) अजन्तम् इ) न उभयम्
5. आत्मन् - इदं कीदृशं प्रातिपदिकम्?
   अ) अजन्तम् आ) हलन्तम् इ) न उभयम्
6. पाचक - इदं कीदृशं प्रातिपदिकम्?
   अ) अव्युत्पन्नम् आ) व्युत्पन्नम् इ) न उभयम्
7. ओस् - इति का विभक्ति:?
   अ) षष्ठी आ) सप्तमी इ) उभयम्
8. भ्यस् - इति का विभक्ति:?
   अ) चतुर्थी आ) पञ्चमी इ) उभयम्
9. बहुत्वविवक्षायाम्-
   अ) एकवचनम् आ) द्विवचनम् इ) बहुवचनम्
10. द्वित्वविवक्षायाम्-
   अ) एकवचनम् आ) बहुवचनम् इ) द्विवचनम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योजयत -

1. औ(औट्)	प्रथमा.बहुवचनम्
2. अस्(ङसि)	षष्ठी.एकवचनम्
3. अस्(ङस्)	द्वितीया.द्विवचनम्
4. अस्(शस्)	पञ्चमी.एकवचनम्
5. अस्(जस्)	द्वितीया.बहुवचनम्

---

1. कृत्तद्धितसमासाश्च (1-2-46) - कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञा: स्युः।
2. अर्थवदधातुरप्रत्ययः प्रातिपदिकम् (1-2-45) - धातुं प्रत्ययं प्रत्यान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्।
3. द्वयेकयोर्द्विवचनैकवचने (1-4-22) - द्वित्वैकत्वयोरेते स्तः।
4. द्वयेकयोर्द्विवचनैकवचने (1-4-22) - द्वित्वैकत्वयोरेते स्तः।
5. बहुषु बहुवचनम् (1-4-21) - बहुत्वविवक्षायां बहुवचनं स्यात्।
6. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्।
7. उपदेशेऽजनुनासिक इत् (1-3-2) - उपदेशेऽनुनासिकोऽजित्सञ्ज्ञः स्यात्।
8. चुटू (1-3-7) - प्रत्ययाद्यौ चुटु इतौ स्त:
9. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
10. न विभक्तौ तुस्माः (1-3-4) - विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः।
11. न विभक्तौ तुस्माः (1-3-4) - विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः।
12. न विभक्तौ तुस्माः (1-3-4) - विभक्तिस्थास्तवर्गसकारमकारा इतो न स्युः।
13. विभक्तिश्च (1-4-104) - सुप्तिङौ विभक्तिसंज्ञौ स्तः।
14. चुटू (1-3-7) प्रत्ययाद्यौ चुटू इतौ स्तः।
15. तस्य लोपः (1-3-9) तस्येतो लोपः स्यात्।
16. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्।
17. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
18. चुटू (1-3-7) प्रत्ययाद्यौ चुटू इतौ स्तः।
19. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
20. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
21. उपदेशेऽजनुनासिक इत् (1-3-2) - उपदेशेऽनुनासिकोऽजित्सञ्ज्ञः स्यात्।
22. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
23. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

24. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हलित्स्यात्। उपदेश आद्योच्चारणम्।
25. सुडनपुंसकस्य (1-1-43)-सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य।
26. स्वादिष्वसर्वनामस्थाने (1-4-17)-कप्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
27. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।
28. यू स्त्र्याख्यौ नदी (1-4-3) - ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः।
29. नेयङुवङ्स्थानवस्त्री (1-4-4) - इयङुवङोः स्थितिः ययोः तौ ईदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री।
30. नेयङुवङ्स्थानावस्त्री (1-4-4) - इयङुवङोः स्थितिः ययोः तौ ईदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री।
31. ङिति ह्रस्वश्च (1-4-6) - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ईदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।
32. वामि (1-4-5) - इयङुवङुस्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तः न तु स्त्री।
33. ङिति ह्रस्वश्च (1-4-6) - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ईदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।
34. शेषो घ्यसखि (1-4-7) - अनदीसंज्ञौ ह्रस्वौ यौ इदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
35. शेषो घ्यसखि (1-4-7) - अनदीसंज्ञौ ह्रस्वौ यौ इदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
36. पतिः समास एव (1-4-8) - पतिशब्दः समासे एव घिसंज्ञः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः पाठः - अजन्तेषु अकारान्तशब्दाः

प्रथमपाठस्य पुनरावृत्तिः - पूर्वस्मिन् पाठे वयम् एतान् अंशान् पठितवन्तः-

- सुप् अन्ते यस्य तत् सुबन्तम्। सुप् इति प्रत्याहारः।
- सुप्-प्रत्ययाः प्रातिपदिकेभ्यः भवन्ति।
- प्रातिपदिकं **व्युत्पन्नम्, अव्युत्पन्नम्** इति द्विविधम्।
- **व्युत्पन्नप्रातिपदिकम्** - कृत्प्रत्ययान्तं, तद्धितप्रत्ययान्तं, समासः च।
- यत्र प्रकृतिप्रत्ययविभागः कर्तुं न शक्यते, तत् अव्युत्पन्नम्।
- **अव्युत्पन्नप्रातिपदिकम्** - धातुभिन्नं, प्रत्ययभिन्नं, प्रत्ययान्तभिन्नं च अर्थवत्-शब्दस्वरूपम्।
- प्रातिपदिकं पुनः प्रकारान्तरेण द्विविधम्। 1.अजन्तम् 2.हलन्तम् - इति।
- यस्य प्रातिपदिकस्य अन्ते अच् भवति तत् - अजन्तप्रातिपदिकम्।
- यस्य प्रातिपदिकस्य अन्ते हल् भवति तत् - हलन्तप्रातिपदिकम्।
- लिङ्गं त्रिविधम् - 1.पुंलिङ्गम् 2.स्त्रीलिङ्गम् 3.नपुंसकलिङ्गम्।
- वचनं त्रिविधम् - 1.एकवचनम् 2.द्विवचनम् 3.बहुवचनम्।
- एकत्वविवक्षायाम् एकवचनम्। द्वित्वविवक्षायां द्विवचनम्। बहुत्वविवक्षायां बहुवचनम्।
- विभक्तयः सप्त - 1.प्रथमाविभक्तिः 2.द्वितीयाविभक्तिः 3.तृतीयाविभक्तिः 4.चतुर्थीविभक्तिः 5.पञ्चमीविभक्तिः 6.षष्ठीविभक्तिः 7.सप्तमीविभक्तिः- इति।
- सुप्-प्रत्ययाः - सु, औ, जस्। अम्, औट्, शस्। टा, भ्याम्, भिस्। ङे, भ्याम्, भ्यस्। ङसि, भ्याम्, भ्यस्। ङस्, ओस्, आम्। ङि, ओस्, सुप्।
- सु, औ, जस्, अम्, औट्। एतेषां पञ्चानां **सर्वनामस्थानम्** इति संज्ञा।
- भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप् - एतेषु प्रत्ययेषु परेषु पूर्वस्य पदम् इति संज्ञा।
- शस्(अस्), टा(आ), ङे(ए), ङसि(अस्), ङस्(अस्), ओस्, आम्, ङि(इ), ओस् - एते सर्वे अजादिप्रत्ययाः। एतेषु परेषु पूर्वस्य भ इति संज्ञा भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे अदन्तानां पुंलिङ्गशब्दानां रूपाणि जानीमः।
2. अदन्तानां सर्वनामसंज्ञकानां पुंलिङ्गशब्दानां रूपाणि पठामः।
3. अदन्तानां नपुंसकलिङ्गशब्दानां रूपाणि जानीमः।

अकारान्तः पुंलिङ्गः देवशब्दः:-

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	देव+सु(स्)→देवः	देव+औ→देवौ	देव+जस्(अस्)→देवाः
द्वितीया	देव+अम्→ देवम्	देव+औट्(औ)→ देवौ	देव+शस्(अस्)→ देवान्
तृतीया	देव+टा(आ)→ देवेन	देव+भ्याम्→ देवाभ्याम्	देव+भिस्(ऐस्)→ देवैः
चतुर्थी	देव+ङे(ए)→ देवाय	देव+भ्याम्→ देवाभ्याम्	देव+भ्यस्→ देवेभ्यः
पञ्चमी	देव+ङसि(अस्)→ देवात्	देव+भ्याम्→ देवाभ्याम्	देव+भ्यस्→ देवेभ्यः
षष्ठी	देव+ङस्(अस्)→ देवस्य	देव+ओस्→ देवयोः	देव+आम्→ देवानाम्
सप्तमी	देव+ङि(इ)→ देवे	देव+ओस्→ देवयोः	देव+सुप्(सु)→ देवेषु
सम्बोधनम्	हे देव+सु(स्)→ हे देव!	हे देव+औ→ हे देवौ!	हे देव+जस्(अस्)→ हे देवाः!

एवं शिव-राम-गोविन्द-मुकुन्द-ईश्वर-बालक-वृक्षादयः।

1. देव + सुँ - अत्र उकारः अनुनासिकः। तस्य इत्संज्ञा[1]। इत्संज्ञकस्य लोपः[2]।
   देव + स् पदान्तस्य सस्य रु-आदेशः।[3]
   देव + रुँ - अत्र उकारः अनुनासिकः। तस्य इत्संज्ञा पदान्तस्य रेफस्य देवः।[4]
2. देव + औ/औद् - अत्र वृद्धिः प्राप्ता। तां बाधित्वा पूर्वसवर्णदीर्घः प्राप्तः। तस्य निषेधः। पुनः वृद्धिः।[5] देवौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. अकारस्य जस्-प्रत्यये परे पूर्वसवर्णदीर्घः एकादेशः भवति। अ + अस्(जस्)- अत्र पूर्ववर्णः अकारः। परवर्णः अपि अकारः। द्वयोः स्थाने पूर्ववर्णस्य दीर्घः एकादेशः भवति।[6] अतः देवाः इति भवति।
4. अकारस्य अम्-प्रत्यये परे पूर्वरूपम् एकादेशः भवति। अ + अम् - अत्र पूर्ववर्णः अकारः। परवर्णः अपि अकारः। द्वयोः स्थाने पूर्वरूपम् एकादेशः भवति।[7] अतः देवम् इति भवति।
5. अकारस्य शस्-प्रत्यये परे पूर्वसवर्णदीर्घः एकादेशः भवति। देव + शस्→देवास्, पूर्वसवर्णदीर्घ-एकादेशात् परं पुंलिङ्गे सकारस्य नकारादेशः भवति।[8] देवास्→देवान्।
6. अदन्तात् अङ्गात् परस्य टाप्रत्ययस्य स्थाने इन-आदेशः भवति।[9] देव + इन, अकार-इकारयोः गुणः भवति।[10] देव + इन→देवेन।

> प्रत्ययः यस्मात् धातोः अथवा प्रातिपदिकात् विधीयते तदादि शब्दस्वरूपं तस्मिन् प्रत्यये परे अङ्गसंज्ञं भवति।[11] यथा - राम + टा, टा प्रत्यये परे राम इत्यस्य अङ्गम् इति संज्ञा।

7. यञ्-आदौ सुपि अदन्तस्य अङ्गस्य अकारस्य दीर्घः भवति।[12] भ्याम्-प्रत्ययः यञादिः। सुप्-प्रत्ययः च। अतः दीर्घः। देव + भ्याम्→देवाभ्याम्। भ्याम् इति तृतीयाद्विवचनप्रत्ययः, चतुर्थीद्विवचनप्रत्ययः, पञ्चमीद्विवचनप्रत्ययश्च। अतः तेषु परेषु अकारस्य दीर्घः भवेति। देवाभ्याम्।
8. अदन्तात् अङ्गात् परस्य भिस्-प्रत्ययस्य स्थाने ऐस्-आदेशः भवति।[13] देव + भिस्→देव + ऐस्→वृद्धिः।[14] देवैः।
9. अदन्तात् अङ्गात् परस्य ङे-प्रत्ययस्य य-आदेशः भवति।[15] देव + ङे→देव + य, य यञादिः सुप्। अतः अकारस्य दीर्घः भवति - देवाय इति निष्पन्नम्।
10. झल्-आदौ सुपि अदन्तस्य अङ्गस्य अकारस्य एकारादेशः भवति।[16] भ्यस् इति झलादिः सुप्। अतः तस्मिन् परे अकारस्य एकारादेशः। देव + भ्यस्→देवेभ्यः। भ्यस् इति चतुर्थीबहुवचनप्रत्ययः पञ्चमीबहुवचनप्रत्ययः च। अतः स्थलद्वयेऽपि अकारस्य एकारादेशः।
11. अदन्तात् अङ्गात् परस्य ङसि-प्रत्ययस्य आत् आदेशः भवति।[17] सवर्णदीर्घश्च।[18] देव + ङसि→देव + आत्→देवात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

12. अदन्तात् अङ्गात् परस्य ङस्-प्रत्ययस्य स्य-आदेशः भवति।[19] देव + ङस्→देव + स्य→देवस्य।

13. अदन्तस्य अङ्गस्य ओस्-प्रत्यये परे अकारस्य एकारः आदेशः भवति।[20] देव+ओस्→देवे+ओस्→एकारस्य अचि परे अय्-आदेशः।[21] देवय्+ओस्→ देवयोः। ओस् इति षष्ठीद्विवचनप्रत्ययः, सप्तमीद्विवचनप्रत्ययः च।

14. ह्रस्वान्तात् अङ्गात् परस्य आमः न्(नुट्) इति आगमः भवति।[22] देव+आम्→ देव+न्+आम्। अत्र नामि परे अजन्तस्य अङ्गस्य दीर्घः भवति।[23] देवा+नाम्→ देवानाम्।

15. देव+ङि, देव + इ→अत्र गुणः भवति।[24] देवे।

16. देव+सुप्→देव+सु→देव+सु (दशमं नियमम् अनुसृत्य अकारस्य एकारः), अकारं त्यक्त्वा अन्येभ्यः अच्-वर्णेभ्यः परस्य प्रत्ययावयवस्य सकारस्य, आदेशसकारस्य च षकारादेशः भवति।[25] देवेषु।

17. ह्रस्वात् परस्य सम्बोधनैकवचनस्य हलः लोपः।[26] हे देव+स्→हे देव!।

अकारान्तेषु प्रत्ययादेशाः, आगमाः, अङ्गकार्याणि, सन्धिः -

प्रत्ययः	प्रत्ययस्य आदेशाः	सन्धिः	आगमः	प्रातिपदिकस्य आदेशाः
औ,औट्	-	वृद्धिः	-	-
जस्	-	पूर्वसवर्णदीर्घः	-	-
अम्	-	पूर्वरूपम्	-	-
शस्	सस्य न्	पूर्वसवर्णदीर्घः	-	-
टा	इन	गुणः	-	-
भिस्	ऐस्	वृद्धिः	-	-
ङे	य	-	-	दीर्घः
भ्याम्	-	-	-	दीर्घः
भ्यस्	-	-	-	एकारः
ङसि	आत्	सवर्णदीर्घः	-	-
ङस्	स्य	-	-	-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	प्रत्ययस्य आदेशाः	सन्धिः	आगमः	प्रातिपदिकस्य आदेशाः
ओस्	-	अयादेशः	-	एकारः
आम्	-	-	नुट्(न्)	दीर्घः
ङि	-	गुणः	-	-
सुप्	सस्य षकारः	-	-	एकारः
(सं.प्र) सु	स् लोपः	-	-	-

अकारान्तस्य सर्वनामसंज्ञकस्य सर्वशब्दस्य रूपाणि -

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सर्व+सु(स्)→सर्वः	सर्व+औ→सर्वौ	सर्व+जस्(अस्)→सर्वे
द्वितीया	सर्व+अम्→ सर्वम्	सर्व+औट्(औ)→ सर्वौ	सर्व+शस्(अस्)→ सर्वान्
तृतीया	सर्व+टा(आ)→ सर्वेण	सर्व+भ्याम्→ सर्वाभ्याम्	सर्व+भिस्(ऐस्)→ सर्वैः
चतुर्थी	सर्व+ङे(ए)→ सर्वस्मै	सर्व+भ्याम्→ सर्वाभ्याम्	सर्व+भ्यस्→ सर्वेभ्यः
पञ्चमी	सर्व+ङसि(अस्)→ सर्वस्मात्	सर्व+भ्याम्→ सर्वाभ्याम्	सर्व+भ्यस्→ सर्वेभ्यः
षष्ठी	सर्व+ङस्(अस्)→ सर्वस्य	सर्व+ओस्→ सर्वयोः	सर्व+आम्→ सर्वेषाम्
सप्तमी	सर्व+ङि(इ)→ सर्वस्मिन्	सर्व+ओस्→ सर्वयोः	सर्व+सुप्→ सर्वेषु
सम्बोधनम्	हे सर्व+सु(स्)→ हे सर्व !	हे सर्व+औ→ हे सर्वौ !	हे सर्व + जस्(अस्)→ हे सर्वे !

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवं विश्व-अन्य-अन्यतर-इतर-त्व-सम-सीमशब्दानां रूपाणि ज्ञेयानि।

1. अदन्तात् सर्वनामसंज्ञकात् परस्य जस्-प्रत्ययस्य शी-आदेशः भवति।[27] सर्व + शी, अत्र शकारस्य इत्संज्ञा।[28] तस्य लोपः। सर्वे।
2. सर्व + टा, टास्थाने इनादेशः। सर्व + इन, गुणः, नकारस्य ण-आदेशः भवति।[29] सर्व + ई, गुणः।[30] सर्वेण
3. अदन्तात् सर्वनाम्नः परस्य ङे-प्रत्ययस्य स्मै-आदेशः भवति।[31] सर्वस्मै।
4. अदन्तात् सर्वनाम्नः परस्य ङसि-प्रत्ययस्य स्मात् आदेशः भवति।[32] सर्वस्मात्।
5. अदन्तात् सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[33] सुटि स् एव अवशिष्टः। आगमप्रत्यययोः संयोजनेन साम् इति भवति। सर्व + साम्। सः झलादिः, बहुवचनप्रत्ययः च। अतः अकारस्य एकारादेशः भवति।[34] सर्वे+साम्, एकारात् परस्य प्रत्ययसकारस्य षकारः।[35] सर्वेषाम्।
6. अदन्तात् सर्वनाम्नः परस्य ङि-प्रत्ययस्य स्मिन्-आदेशः भवति।[36] सर्वस्मिन्।

अन्यानि सर्वाणि रूपाणि देवशब्दवत् एव भवन्ति।

सर्वनामसंज्ञानिमित्तकाः प्रत्ययादेशाः, आगमाश्च -

प्रत्ययः	आदेशः	आगमः
जस्	शी(ई)	-
ङे	स्मै	-
ङसि	स्मात्	-
आम्	-	सुट्(स्)
ङि	स्मिन्	-

नपुंसकलिङ्गः - अकारान्तः - ज्ञानशब्दः

विभक्तयः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	ज्ञान+सु(अम्)→ ज्ञानम्	ज्ञान+औ(शी)→ ज्ञाने	ज्ञान+जस्(शि)→ ज्ञानानि
द्वितीया	ज्ञान+अम् (अम्)→ज्ञानम्	ज्ञान+औट्(शी)→ ज्ञाने	ज्ञान + शस्(शि)→ ज्ञानानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तयः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	ज्ञान+टा(इन)→ ज्ञानेन	ज्ञान+भ्याम्→ ज्ञानाभ्याम्	ज्ञान+भिस्(ऐस्)→ ज्ञानैः
चतुर्थी	ज्ञान+ङे(य)→ ज्ञानाय	ज्ञान+भ्याम्→ ज्ञानाभ्याम्	ज्ञान+भ्यस्→ ज्ञानेभ्यः
पञ्चमी	ज्ञान+ङसि (आत्)→ज्ञानात्	ज्ञान+भ्याम्→ ज्ञानाभ्याम्	ज्ञान+भ्यस्→ ज्ञानेभ्यः
षष्ठी	ज्ञान+ङस् (स्य)→ ज्ञानस्य	ज्ञान+ओस्→ ज्ञानयोः	ज्ञान+आम्→ ज्ञानानाम्
सप्तमी	ज्ञान+ङि(इ)→ ज्ञाने	ज्ञान+ओस्→ ज्ञानयोः	ज्ञान+सुप्(सु)→ ज्ञानेषु
सम्बोधनम्	हे ज्ञान+सु(स्)→ हे ज्ञान!	हे ज्ञान+औ(शी)→ हे ज्ञाने!	हे ज्ञान+जस्(शि)→ हे ज्ञानानि!

एवं फल-पुष्प-धन-वन-पत्र-वचन-पुस्तकादयः।

1. अदन्तात् नपुंसकात् परस्य सु-प्रत्ययस्य, अम्-प्रत्ययस्य च स्थाने अम्-आदेशः भवति।[37] ज्ञानम्।
2. नपुंसकात् अङ्गात् परस्य औ-प्रत्ययस्य, औट्-प्रत्ययस्य च स्थाने शी-आदेशः भवति।[38] ज्ञान + शी, शकारस्य इत्संज्ञा[39], तस्य लोपश्च।[40] ज्ञान + ई, अत्र अकार-ईकारयोः गुणः।[41] ज्ञाने।
3. नपुंसकात् अङ्गात् परस्य जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च स्थाने शि-आदेशः भवति।[42] तत्र शकारस्य इत्संज्ञा। लोपश्च।[43, 44] ज्ञान + इ।

> जस्-शसोः स्थाने आदिष्टस्य शि इत्यस्य **सर्वनामस्थानम्** इति संज्ञा।[45]

4. झलन्तस्य अजन्तस्य च नपुंसकस्य अङ्गस्य सर्वनामस्थाने परे नुम्-आगमः भवति।[46] ज्ञानन्+इ, उपधादीर्घः।[47] ज्ञानान्+इ = ज्ञानानि।
5. तृतीयाविभक्तेः आरभ्य आदेशाः, अङ्गकार्याणि च अदन्तपुंलिङ्गवत् भवन्ति।
6. सम्बोधने सु-स्थाने आगतस्य अमः हलः(म्) लोपः भवति।[48]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	आदेशः	आगमः
सु, अम्	अम्	-
औ, औट्	शी(ई)	-
जस्, शस्	शि(इ)	नुम्(न्)[49]

पाठसारः -

1. अकारान्तेषु पुंलिङ्गेषु प्रत्ययादेशाः, प्रातिपदिकादेशाः, आगमाः, अङ्गकार्याणि, सन्धिकार्याणि -

प्रत्ययः	प्रत्ययस्य आदेशाः	सन्धिः	आगमः	प्रातिपदिकस्य आदेशाः
औ,औट्	-	वृद्धिः	-	-
जस्	-	पूर्वसवर्णदीर्घः	-	-
अम्	-	पूर्वरूपमेकादेशः	-	-
शस्	सस्य न्	पूर्वसवर्णदीर्घः	-	-
टा	इन	गुणः	-	-
भ्याम्	-	-	-	दीर्घः
भिस्	ऐस्	वृद्धिः	-	-
ङे	य	-	-	दीर्घः
भ्यस्	-	-	-	एकारः
ङसि	आत्	सवर्णदीर्घः	-	-
ङस्	स्य	-	-	-
ओस्	-	अयादेशः	-	एकारः
आम्	-	-	नुट्(न्)	दीर्घः
ङि	-	गुणः	-	-
सुप्	सस्य षकारः	-	-	एकारः
(सं.प्र) सु	स् लोपः	-	-	

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. अदन्तस्य सर्वनाम्नः प्रत्ययादेशाः, आगमाश्च -

प्रत्ययः	आदेशः	आगमः
जस्	शी(ई)	-
ङे	स्मै	-
ङसि	स्मात्	-
आम्	-	सुट्(स्)
ङि	स्मिन्	-

3. नपुंसकलिङ्गे अदन्तस्य शब्दस्य कार्याणि-

प्रत्ययः	आदेशः	आगमः
सु, अम्	अम्	-
औ, औट्	शी(ई)	-
जस्, शस्	शि(इ)	नुम्(न्)50
तृतीयाविभक्तेः आरभ्य आदेशाः, अङ्गकार्याणि तदितराणि च कार्याणि अदन्तपुंलिङ्गवत् भवन्ति।		

अभ्यासः

एकेन वाक्येन समाधत्त -

1. अदन्तस्य पुंलिङ्गशब्दस्य केषु प्रत्ययेषु सन्धिकार्याणि भवन्ति ?
2. अदन्तात् अङ्गात् विहितानां केषां प्रत्ययानां के आदेशाः उक्ताः ?
3. सामान्य-अदन्तस्य शब्दस्य, अदन्त-सर्वनाम्नः शब्दस्य च भेदः कः ?
4. तृतीयाविभक्तेः आरभ्य नपुंसकलिङ्गे अङ्गकार्याणि कथं भवन्ति ?
5. शि-आदेशस्य स्थानी कः, कस्मिन् लिङ्गे च शि आदेशः भवति ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योग्यम् उत्तरं चिनुत -

1. अदन्तात् सर्वनाम्नः परस्य ङे-प्रत्ययस्य आदेशः कः ?
   अ) य आ) स्मै इ) शी
2. देवात् - अत्र प्रत्ययः कः ?
   अ) ङस् आ) ङि इ) ङसि
3. ज्ञान + शि - अत्र किं कार्यं भवति ?
   अ) नुम् आ) नुट् इ) नुक्
4. देव + नाम् - अत्र अकारस्य किं कार्यं भवति ?
   अ) ऐकारः आ) दीर्घः इ) एकारः
5. देव + सुप् - अत्र अकारस्य किं कार्यं भवति ?
   अ) दीर्घः आ) एकारः इ) ऐकारः
6. ज्ञान + ङस् - अत्र ङस्प्रत्ययस्य कः आदेशः ?
   अ) य आ) स्य इ) स्मात्
7. सर्व + ङस् - अत्र ङस्प्रत्ययस्य कः आदेशः ?
   अ) स्य आ) स्मै इ) स्मिन्
8. सर्वे - इत्यत्र प्रत्ययः कः ?
   अ) ङि आ) जस् इ) शस्
9. ज्ञाने - अत्र प्रत्ययः-
   अ) औ आ) ङि इ) उभयमपि
10. सर्व + आम् - अत्र आगमः कः ?
   अ) नुम् आ) नुट् इ) सुट्

योजयत

1. ङसि	स्मिन्
2. भिस्	शी
3. औट्	ऐस्
4. जस्	स्मात्
5. ङि	शि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. ज्ञान + टा मोक्षः
2. देव + ङे नमः।
3. सर्व + जस् अपि मार्गे गच्छन्ति।
4. ज्ञान + ङसि एव हि कैवल्यम्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. देवं नमति।
2. ज्ञानाय पठति।
3. सर्वेषां नामानि सर्वनामानि।
4. नमः सर्वस्मै।

एतेषामुत्तराणि लिखत -

1. कृष्ण + जस्, अन्य + जस् - अनयोः प्रक्रियां लिखित्वा भेदान् बोधयत।
2. फल + शस्, गोविन्द + शस्
3. वन + ङे, इतर + ङे
4. शिव + आम्, सम + आम्
5. विश्व + ङि, काल + ङि

परियोजना -

1. राम, कृष्ण, गोविन्द - इत्यादीनां पुंलिङ्गशब्दानां रूपाणि लिखत।
2. विश्व, अन्य, अन्यतर - इत्यादीनां सर्वनाम्नां पुंलिङ्गे रूपाणि लिखत।
3. फल, पुष्प, वन - इत्यादीनां नपुंसकलिङ्गशब्दानां रूपाणि लिखत।

---

1. उपदेशेऽजनुनासिक इत् (1-3-2) - उपदेशेऽजनुनासिकोऽजित्संज्ञः स्यात्।
2. तस्य लोपः (1-3-9) - तस्य इतः लोपः स्यात्।
3. ससजुषो रुः (4-2-66) - पदान्तस्य सस्य सजुष् शब्दस्य च रुः स्यात्।
4. खरवसानयोर्विसर्जनीयः (8-3-15) - खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते।
5. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
6. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
8. तस्माच्छसो नः पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।
9. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
10. आद्गुणः (6-1-87) - अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। संहितायाम्।
11. यस्मात् प्रत्ययविधिस्तदादि प्रत्यये अङ्गम् (1-4-13) - यः प्रत्ययो यस्मात्क्रियते तदादि शब्दस्वरूपं तस्मिन्प्रत्यये परेऽङ्गसञ्ज्ञं स्यात्।
12. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घः स्यात्।
13. अतो भिस ऐस् (7-1-9) - अकारान्तादङ्गाद्भिस ऐस् स्यात्।
14. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
15. ङेर्यः (7-1-13) - अतोऽङ्गात्परस्य ङे इत्यस्य यादेशः स्यात्।
16. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
17. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
18. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात्।
19. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
20. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकारः स्यात्।
21. एचोऽयवायावः (6-1-78) - एचः क्रमाद् अय् अव् आय् आव् एते स्युः अचि।
22. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
23. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
24. आद्गुणः (6-1-87) - अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। संहितायाम्।
25. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः।
26. एङ्ह्रस्वात् सम्बुद्धेः (6-1-69) - एङन्ताद्ध्रस्वान्ताच्चाङ्गद्धल्लुप्यते सम्बुद्धेश्चेत्।
27. जसः शी (7-1-17) - अदन्तत्सर्वनाम्नः परस्य जसः शी स्यात्।
28. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
29. अट्कुप्वाङ्नुम्व्यवायेऽपि (8-4-2) - अट्, कवर्गः, पवर्गः, आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे।
30. आद्गुणः (6-1-87) - अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। संहितायाम्।
31. सर्वनाम्नः स्मै (7-1-14) - अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात्।
32. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
33. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

34. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
35. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्याऽपदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः।
36. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
37. अतोऽम् (7-1-24) - अतोऽङ्गात् क्लीबात्स्वमोरम् स्यात्।
38. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
39. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
40. तस्य लोपः (1-3-9) - तस्य इतः लोपः स्यात्।
41. आद्गुणः (6-1-87) - अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्। संहितायाम्।
42. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
43. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
44. तस्य लोपः (1-3-9) - तस्य इतः लोपः स्यात्।
45. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
46. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
47. सर्वनामस्थाने चासम्बुद्धौ (6-4-8) - नान्तस्योपधायाः दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।
48. एङ्ह्रस्वात् सम्बुद्धेः (6-1-69) - एङन्ताद्ध्रस्वान्ताच्चाङ्गद्धल्लुप्यते सम्बुद्धेश्चेत्।
49. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
50. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।

❀ ❀ ❀ ❀ ❀

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयः पाठः - अजन्तेषु आकारान्तशब्दाः

द्वितीयस्य पाठस्य पुनरावृत्तिः -

➢ पूर्वस्मिन् पाठे सामान्यः ह्रस्व-अकारान्तः पुंलिङ्गः देवशब्दः पठितः।

➢ देवशब्दात् परस्य टा-प्रत्ययस्य इन-आदेशः, ङे-प्रत्ययस्य य-आदेशः, ङसि-प्रत्ययस्य आत्-आदेशः, ङस्-प्रत्ययस्य स्य-आदेशः च भवतीति पठितवन्तः।

➢ आम्-प्रत्ययस्य नुट्-आगमः भवति इति पठितवन्तः। अन्यानि अङ्गकार्याणि, सन्धिकार्याणि च पठितानि।

➢ सर्वनामसंज्ञकः ह्रस्व-अकारान्तः पुंलिङ्गः सर्वशब्दः पठितः।

➢ सर्वशब्दात् परस्य ङे-प्रत्ययस्य स्मै-आदेशः, ङसि-प्रत्ययस्य स्मात्-आदेशः, ङि-प्रत्ययस्य स्मिन्-आदेशः भवति इति पठितवन्तः।

➢ सर्वशब्दात् परस्य आम्-प्रत्ययस्य सुट्-आगमः भवति इति ज्ञातवन्तः। अन्यानि सन्धिकार्याणि, अङ्गकार्याणि च पठितानि।

➢ नपुंसकलिङ्गः ह्रस्व-अकारान्तः ज्ञानशब्दः पठितः।

➢ ज्ञानशब्दस्य नुमागमः सर्वनामस्थान-प्रत्यये परे भवति इति पठितवन्तः। तृतीयाविभक्तेः आरभ्य पुलिङ्गवत् रूपाणि भवन्ति इति ज्ञातवन्तः।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे आकारान्तानां पुंलिङ्गशब्दानां रूपाणि जानीमः।
2. आकारान्तानां स्त्रीलिङ्गशब्दानां रूपाणि पठामः।
3. आकारान्तानां नपुंसकलिङ्गशब्दानां रूपाणि जानीमः।

आकारान्तः पुंलिङ्गः विश्वपा-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विश्वपा+सु→ विश्वपाः	विश्वपा+औ→ विश्वपौ	विश्वपा+जस(अस्)→ विश्वपाः
द्वितीया	विश्वपा+अम्→ विश्वपाम्	विश्वपा+औट्(औ)→ विश्वपौ	विश्वपा+शस(अस्)→ विश्वपः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तयः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	विश्वपा+टा (आ)→ विश्वपा	विश्वपा + भ्याम्→ विश्वपाभ्याम्	विश्वपा+भिस्→ विश्वपाभिः
चतुर्थी	विश्वपा+ङे (ए)→विश्वपे	विश्वपा+भ्याम्→ विश्वपाभ्याम्	विश्वपा + भ्यस्→ विश्वपाभ्यः
पञ्चमी	विश्वपा+ङसि (अस्)→विश्वपः	विश्वपा+भ्याम्→ विश्वपाभ्याम्	विश्वपा+भ्यस्→ विश्वपाभ्यः
षष्ठी	विश्वपा+ङस् (अस्)→विश्वपः	विश्वपा+ओस्→ विश्वपोः	विश्वपा+आम्→ विश्वपाम्
सप्तमी	विश्वपा+ङि (इ)→ विश्वपि	विश्वपा+ओस्→ विश्वपोः	विश्वपा+सुप्(सु)→ विश्वपासु
सम्बेधनम्	हे विश्वपा+सु→ हे विश्वपाः !	हे विश्वपा+औ→ हे विश्वपौ !	हे विश्वपा+जस्(अस्)→ हे विश्वपाः !

एवं शङ्ख्ध्मा-कीलालपा-मधुपा-सोमपा-गोपा-इत्यादयः।

1. विश्वपा इति शब्दे पा इति आकारान्तः धातुः। विश्वं पाति = पालयति इति विग्रहः। विश्वपा + सु→विश्वपा + स्→विश्वपाः

2. औ-प्रत्यये, औट्-प्रत्यये च वृद्धिः[1] प्राप्ता। तां बाधित्वा पूर्वसवर्णदीर्घः[2] प्राप्तः। तस्य च निषेधः[3]। अतः वृद्धिः प्रवर्तते। जसि पूर्वसवर्णदीर्घः प्राप्तः।[4] तस्य निषेधः विधीयते[5]। अतः सवर्णदीर्घः एव।[6] अमि पूर्वरूपम्।[7]

> शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - एतेषु प्रत्ययेषु परेषु पूर्वस्य भ-संज्ञा भवति इति प्रथमे पाठे पठितवन्तः।[8]

3. भसंज्ञायाः प्रयोजनम् - आकारान्तः यः धातुः तदन्तस्य भस्य अङ्गस्य आकारस्य लोपः भवति।[9] पा इति आकारान्तः धातुः। सः अन्ते विद्यमानः शब्दः = विश्वपा इति शब्दः। तस्य शस्-प्रत्यये परे अङ्गसंज्ञा भसंज्ञा च भवति। अतः आकारस्य लोपः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विश्वपा + शस्→विश्वपा + अस्→विश्वप् + अस्→विश्वपस्→विश्वपः। टा, ङे ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु परेष्वपि एवमेव प्रक्रिया।

4. भ्याम्, भिस्, सुप् - एतेषु प्रत्ययेषु परेषु विशिष्टानि कार्याणि न सन्ति। प्रकृतिप्रत्यययोः संयोजनमेव कर्तव्यम्।

प्रत्ययः	सन्धिः	अङ्गकार्यम्
औ, औट्	वृद्धिः	-
जस्	सवर्णदीर्घः	-
अम्	पूर्वरूपम् एकादेशः	-
शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस्	-	धातोः आकारस्य लोपः

आकारान्तः पुंलिङ्गः हाहा-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	हाहा+सु→हाहाः	हाहा+औ→हाहौ	हाहा+जस्(अस्)→ हाहाः
द्वितीया	हाहा+अम्→हाहाम्	हाहा+औट्(औ)→ हाहौ	हाहा+शस्(अस्)→ हाहान्
तृतीया	हाहा+टा(आ)→ हाहा	हाहा+भ्याम्→ हाहाभ्याम्	हाहा+भिस्→ हाहाभिः
चतुर्थी	हाहा+ङे(ए)→ हाहै	हाहा+भ्याम्→ हाहाभ्याम्	हाहा+भ्यस्→ हाहाभ्यः
पञ्चमी	हाहा+ङसि (अस्)→हाहाः	हाहा+भ्याम्→ हाहाभ्याम्	हाहा+भ्यस्→ हाहाभ्यः
षष्ठी	हाहा+ङस् (अस्)→ हाहाः	हाहा+ओस्→ हाहौः	हाहा + आम्→ हाहाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
सप्तमी	हाहा+ङि(इ)→ हाहे	हाहा+ओस्→ हाहौः	हाहा+सुप्(सु)→ हाहासु
सम्बोधनम्	हे हाहा+स्(स्)→ हे हाहाः!	हे हाहा+औ→ हे हाहौ!	हे हाहा+जस्→ हे हाहाः!

अस्मिन् शब्दे विशिष्टं कार्यं किमपि नास्ति। केवलं सन्धिः।

आकारान्तः स्त्रीलिङ्गः रमाशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	रमा+सु→रमा	रमा+औ→रमे	रमा+जस्(अस्)→रमाः
द्वितीया	रमा + अम्→ रमाम्	रमा+औट्(औ)→ रमे	रमा+शस्(अस्)→ रमाः
तृतीया	रमा+टा(आ)→ रमया	रमा+भ्याम्→ रमाभ्याम्	रमा+भिस्→ रमाभिः
चतुर्थी	रमा+ङे(ए)→ रमायै	रमा+भ्याम्→ रमाभ्याम्	रमा+भ्यस्→ रमाभ्यः
पञ्चमी	रमा+ङसि रमायाः	रमा+भ्याम्→ रमाभ्याम्	रमा+भ्यस्→(अस्)→ रमाभ्यः
षष्ठी	रमा+ङस् रमायाः	रमा+ओस्→ रमयोः	रमा+आम्→(अस्)→ रमाणाम्
सप्तमी	रमा+ङि (इ)→रमायाम्	रमा+ओस्→ रमयोः	रमा+सुप्(सु)→ रमासु
सम्बेधनम्	हे रमा + सु→ हे रमे!	हे रमा + औ→ हे रमे!	हे रमा + जस्→ हे रमाः!

एवं बाला-कन्या-कथा-विद्या-इत्यादयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

टाप्, डाप्, चाप् - इति त्रिषु स्त्रीप्रत्ययेषु एतेषु सामान्यः वर्तते आप् इति। त्रयाणां सामान्यं कार्यं वक्तुं सूत्रेषु आप् इति पाणिनिः निर्दिशति। येषाम् अन्ते एते त्रयः भवन्ति, तेषाम् आप्-अन्तः इति व्यवहारः।

1. रमा इति टाप्-प्रत्ययान्तः शब्दः। अतः अयम् आबन्तः। रमा+आ अत्र सवर्णदीर्घे कृते दीर्घात् आबन्तात् यः सु(स्) प्रत्ययः तस्य लोपः भवति।[10] रमा इति भवति।
2. आबन्तात् परस्य औ-प्रत्ययस्य, औट्-प्रत्ययस्य च शी-आदेशः भवति।[11] शी-आदेशे शकारस्य इत्संज्ञा भवति।[12] तस्य लोपश्च भवति। अतः ईकारः अवशिष्टः। रमा + ई गुणे रमे इति।
3. जसि सवर्णदीर्घः प्राप्तः। तं बाधित्वा पूर्वसवर्णदीर्घः प्राप्तः।[13] तस्य निषेधः विधीयते।[14] अतः पुनः सवर्णदीर्घः एव भवति।[15] रमा + अस् = रमाः। शसि च पूर्वसवर्णदीर्घः भवति।[16] रमा + अस् = रमाः। अमि पूर्वरूपम् एकादेशः भवति।[17] रमा + अम् = रमाम्
4. आबन्तात् टा-प्रत्यये आकारस्य एकार-आदेशः भवति।[18] एकारस्य अयादेशः। रमा + आ = रमे→आ→रमय् + आ = रमया
5. आबन्तात् परेषां ङे, ङसि, ङस्, ङि - इति चतुर्णां प्रत्ययानां याट्-आगमः भवति।[19]
   रमा + ङे→रमा + ए→रमा + या + ए→रमा + यै→रमायै (वृद्धिः)।
   आदौ याडागमः, अनन्तरं सन्धिः। रमायै।
   रमा + ङसि/ङस्→रमा + अस्→रमा + या + अस्→रमायास्→रमायाः (सवर्णदीर्घः)।
6. आप्-अन्तात् परस्य ङि-प्रत्ययस्य आम्-आदेशः भवति।[20] रमा + ङि अत्र आदौ प्रत्ययस्य आमादेशः, ततः याडागमः। याडागमेन नुट् बाध्यते। रमा+ङि→रमा + या[21] + ङि→रमा + या + आम्→रमा + याम्→रमायाम्
7. ओसि परे आपः आकारस्य एकारः आदेशः भवति।[22] रमा + ओस्→रमे + ओस्→रमय् + ओस्→रमयोः(अयादेशः)।
   रमा + आम् आबन्तात् परस्य आमः नुट् रमा + न् + आम्। अजन्तस्याङ्गस्य नामि दीर्घः। रमा + नाम्, नस्य णत्वम्→रमाणाम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8. सम्बुद्धौ परतः आपः आकारस्य एकारः आदेशः भवति।[23] रमा+ स्→रमे + स्। एङः परस्य सम्बुद्धेः हलः लोपः।[24] हे रमे!।

प्रत्ययः	आगमः	आदेशः	सन्धिः
स्(सु)	लोपः		
औ, औट्		औ-स्थाने शी-आदेशः	गुणः
जस्			सवर्णदीर्घः
शस्			पूर्वसवर्णदीर्घः
अम्			पूर्वरूपम् एकादेशः
टा, ओस्, सम्बुद्धिः		आपः आकारस्य एकारः	
ङे, ङसि, ङस्	याट्		वृद्धिः, सवर्णदीर्घः
आम्	नुट्	णत्वम्	
ङि	याट्	आम्	

आबन्तस्य कार्याणि

प्रत्ययः	आगमः	आदेशः
सु(स्)		लोपः
टा, ओस्, सम्बुद्धिः		आपः आकारस्य एकारः
ङे, ङसि, ङस्	याट्	
आम्	नुट्	
ङि	याट्	आम्

आकारान्तः स्त्रीलिङ्गः सर्वाशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सर्वा+सु→ सर्वा	सर्वा+औ→ सर्वे	सर्वा+जस्(अस्)→ सर्वाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
द्वितीया	सर्वा+अम्→ सर्वाम्	सर्वा+औट्(औ)→ सर्वे	सर्वा+शस्(अस्)→ सर्वाः
तृतीया	सर्वा+टा (आ)→सर्वया	सर्वा+भ्याम्→ सर्वाभ्याम्	सर्वा+भिस्→ सर्वाभिः
चतुर्थी	सर्वा+ङे (ए)→सर्वस्यै	सर्वा+भ्याम्→ सर्वाभ्याम्	सर्वा+भ्यस्→ सर्वाभ्यः
पञ्चमी	सर्वा+ङसि (अस्)→सर्वस्याः	सर्वा+भ्याम्→ सर्वाभ्याम्	सर्वा+भ्यस्→ सर्वाभ्यः
षष्ठी	सर्वा+ङस् (अस्)→सर्वस्याः	सर्व+ओस्→ सर्वयोः	सर्वा+आम्→ सर्वासाम्
सप्तमी	सर्वा+ङि(इ)→ सर्वस्याम्	सर्वा+ओस्→ सर्वयोः	सर्वा+सुप्(सु)→ सर्वासु
सम्बोधनम्	हे सर्वा+सु→ हे सर्वे!	हे सर्वा+औ→ हे सर्वे!	हे सर्वा+जस्→ हे सर्वाः!

सर्वा इति आप्-अन्तः (टाप्) सर्वनामसंज्ञकः शब्दः। एवम् अन्या-इतरा-त्वा-समा-इत्यादयः।

1. आप्-अन्तात् सर्वनाम्नः परेषां ङे, ङसि, ङस्, ङि - प्रत्ययानां स्याट्-आगमः भवति। आपः ह्रस्वः च भवति।[25]
   सर्वा+ङे→सर्वा+ए→सर्वा+स्या+ए→सर्व+स्या+ए→सर्व+स्यै→सर्वस्यै।
   सर्वा+ङसि/ङस्→सर्वा+अस्→सर्वा+स्या+अस्→सर्व+स्या+अस्→सर्व+स्यास्→सर्वस्याः।
   सर्वा+ङि→सर्वा+आम्[26]→सर्वा+स्या+आम्→सर्व+स्या+आम्→सर्वस्याम्।
2. सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[27] सुट्-आगमे स् इति अवशिष्टः।
   सर्वा + साम्→सर्वासाम्
3. अवशिष्टानि रूपाणि रमा-शब्दवत् भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	आगमः	आदेशः
ङे, ङसि, ङस्, ङि	स्याट्	आपः आकारस्य ह्रस्वः
आम्	सुट्	

अन्यानि कार्याणि रमाशब्दवत् भवन्ति।

आकारान्तः नपुंसकलिङ्गः श्रीपा-शब्दः

नपुंसके विद्यमानस्य अजन्तस्य प्रातिपदिकस्य ह्रस्वः भवति।[28]

श्रीपा-शब्दस्यापि ह्रस्वे कृते श्रीप इति भवति। तस्य रूपाणि ज्ञान-शब्दवत् भवन्ति।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	श्रीप+सु(स्)→ श्रीपम्	श्रीप+औ→ श्रीपे	श्रीप+जस(अस्)→ श्रीपाणि
द्वितीया	श्रीप+अम्→ श्रीपम्	श्रीप+औट्(औ)→ श्रीपे	श्रीप+शस(अस्)→ श्रीपाणि
तृतीया	श्रीप+टा(आ)→ श्रीपेण	श्रीप+भ्याम्→ श्रीपाभ्याम्	श्रीप+भिस्→ श्रीपैः
चतुर्थी	श्रीप+ङे(ए)→ श्रीपाय	श्रीप+भ्याम्→ श्रीपाभ्याम्	श्रीप+भ्यस्→ श्रीपेभ्यः
पञ्चमी	श्रीप+ङसि(अस्)→ श्रीपात्	श्रीप+भ्याम्→ श्रीपाभ्याम्	श्रीप+भ्यस्→ श्रीपेभ्यः
षष्ठी	श्रीप+ङस(अस्)→ श्रीपस्य	श्रीप+ओस्→ श्रीपयोः	श्रीप+आम्→ श्रीपाणाम्
सप्तमी	श्रीप+ङि(इ)→ श्रीपे	श्रीप+ओस्→ श्रीपयोः	श्रीप+सुप(सु)→ श्रीपेषु
सम्बोधनम्	हे श्रीप+सु(स्)→ हे श्रीप!	हे श्रीप+औ→ हे श्रीपे!	हे श्रीप+जस(अस्)→ हे श्रीपाणि!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एवं गोपादयः।

1. सु-प्रत्ययस्य, अम्-प्रत्ययस्य च स्थाने अम्-आदेशः भवति।[29] औ-प्रत्ययस्य, औट्-प्रत्ययस्य च स्थाने शी-आदेशः भवति।[30] जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च स्थाने शि-आदेशः भवति।[31]
2. झलन्तस्य अजन्तस्य च नपुंसकस्य अङ्गस्य सर्वनामस्थाने परे नुम्-आगमः भवति।[32]
3. सम्बोधने सु-प्रत्ययस्य लोपः भवति।[33]

पाठसारः -

1. आकारान्तः पुंलिङ्गः विश्वपा-शब्दः

प्रत्ययः	सन्धिः	अङ्गकार्यम्
औ, औट्	वृद्धिः	-
जस्	सवर्णदीर्घः	-
अम्	पूर्वरूपम्	-
शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस्	-	धातोःआकारस्य लोपः

2. आकारान्तः पुंलिङ्गः हाहा-शब्दः। अत्र तु विशिष्टं कार्यं किमपि न भवति। सन्धिः एव कर्तव्यः।

3. आकारान्तः स्त्रीलिङ्गः रमाशब्दः (आबन्तः)

प्रत्ययः	आगमः	आदेशः	सन्धिः
सु(स्)		लोपः	
औ, औट्		औ-स्थाने शी-आदेशः	गुणः
जस्			सवर्णदीर्घः
शस्			पूर्वसवर्णदीर्घः
अम्			पूर्वरूपम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	आगमः	आदेशः	सन्धिः
टा, ओस्, सम्बुद्धिः		आपः आकारस्य एकारः	
ङे, ङसि, ङस्	याट्		
अम्	नुट्		
ङि	याट्	आम्	

4. आकारान्तः सर्वनामसंज्ञकः सर्वाशब्दः (आबन्तः)

प्रत्ययः	आगमः	आदेशः
ङे, ङसि, ङस्, ङि	स्याट्	आपः आकारस्य ह्रस्वः
आम्	सुट्	

अन्यानि कार्याणि रमाशब्दवत् भवन्ति।

5. नपुंसके विद्यमानस्य अजन्तस्य प्रातिपदिकस्य ह्रस्वः भवति। अतः श्रीपा-शब्दे आकारस्य ह्रस्वे कृते श्रीप इति निष्पन्नम्। तस्य रूपाणि ज्ञानशब्दवत् भवन्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. आबन्तः नाम कः?
2. आबन्तात् सर्वनाम्नः परस्य ङेप्रत्ययस्य किं कार्यम्?
3. विश्वपा + टा अत्र किं कार्यं भवति?
4. हे रमा + सु अत्र किं कार्यं भवति?
5. श्रीपाशब्दस्य नपुंसके सर्वादौ किं कार्यं भवति?

योग्यं समाधानं चिनुत

1. विश्वपा + जस् - पुंलिङ्गे किं कार्यं भवति?
   अ) पूर्वसवर्णदीर्घः आ) पूर्वरूपम् इ) सवर्णदीर्घः
2. विश्वपा + आम् - किं रूपम्?
   अ) विश्वपम् आ) विश्वपाम् इ) विश्वपानाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. श्रीपा + जस् - नपुंसकलिङ्गे किं रूपम्?

अ) श्रीपाः आ) श्रीपः इ) श्रीपाणि

4. हाहा + औ - अत्र कः सन्धिः?

अ) वृद्धिः आ) पूर्वसवर्णदीर्घः इ) पूर्वरूपम्

5. रमा + आम् - अत्र कः आगमः?

अ) नुम् आ) नुट् इ) सुट्

6. हाहा + आम् - किं रूपम्?

अ) हाहानाम् आ) हाहम् इ) हाहाम्

7. सर्वा + आम् कः आगमः?

अ) सुट् आ) नुट् इ) नुम्

8. सर्वा + ङि - किं रूपं भवति?

अ) सर्वायाम् आ) सर्वस्याम् इ) सर्वास्याम्

9. आबन्तात् परस्य औप्रत्ययस्य स्थाने कः आदेशः?

अ) शी आ) शि इ) न कश्चन

10. ओसि परे आपः आकारस्य कः आदेशः?

अ) ऐकारः आ) एकारः इ) न कश्चन

योजयत -

1. विश्वपा + शस्	शि-आदेशः
2. हाहा + शस्	आकार-लोपः
3. रमा + ङस्	पूर्वसवर्णदीर्घः
4. सर्वा + ङस्	याट्-आगमः
5. श्रीपा + शस्(नपुं.)	स्याट्-आगमः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. सर्वा + भ्यस्
2. श्रीपा + ङस्
3. रमा + सुप्
4. हाहा + ङि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. रमायै नमः।
2. विश्वपे स्वाहा।
3. हाहाम् आह्वय।
4. सर्वासां छात्रीणां नामानि लिखत।

एतेषां प्रक्रियाभेदान् लिखत -

1. गोपा + ङि, हाहा + ङि
2. सर्वा + आम्, कथा + आम्
3. श्रीपा + ङि (नपुं), गोपा + ङि(पुं)
4. बाला + ङसि, अन्या + ङसि
5. गोपा + आम् (नपुं), हाहा + आम्

परियोजना -

1. श्रीपा, गोपा-इत्यादीनाम् आकारान्तानां पुंलिङ्गे सप्तसु विभक्तिषु रूपाणि लिखत।
2. आकारन्तानां सर्वनाम्नां स्त्रीलिङ्गे सप्तसु विभक्तिषु रूपाणि लिखत।
3. लता, बाला - इत्यादीनां सप्तसु विभक्तिषु रूपाणि लिखत।

---

1. वृद्धिरेचि (1-1-1) - आदेचि परे वृद्धिरेकादेशः स्यात्।
2. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
3. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
4. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
5. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
6. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्।
7. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
8. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।
9. आतो धातोः (6-4-140) - आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः स्यात्।
10. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
11. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

12. लशक्वतद्धिते (1-3-8) - तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
13. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
14. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
15. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्।
16. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
17. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
18. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
19. याडापः (7-3-113) - आपः परस्य ङिद्वचनस्य याडागमः स्यात्।
20. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
21. याडापः (7-3-113) - आपः परस्य ङिद्वचनस्य याडागमः स्यात्।
22. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
23. सम्बुद्धौ च (7-3-104) - आप एकारः स्यात् सम्बुद्धौ।
24. एङ्ह्रस्वात् सम्बुद्धेः (6-1-69) - एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्।
25. सर्वनाम्नः स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः।
26. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
27. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।
28. ह्रस्वो नपुंसके प्रातिपदिकस्य (1-2-47) - क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्।
29. अतोऽम् (7-1-24) - अतोऽङ्गात् क्लीबात्स्वमोरम् स्यात्।
30. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
31. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
32. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
33. एङ्ह्रस्वात् सम्बुद्धेः (6-1-69) - एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थः पाठः - इकारान्तशब्दाः(1)

तृतीयस्य पाठस्य पुनरावृत्तिः -

➢ पूर्वस्मिन् पाठे आकारान्तानां शब्दानां रूपाणि पठितानि।

➢ पुंलिङ्गे विश्वपाशब्दस्य रूपाणि पठितानि।

➢ आकारान्तः यः धातुः तदन्तस्य भस्य अङ्गस्य आकारस्य लोपः भवति इति पठितवन्तः।

➢ सामान्य-आकारान्तस्य शब्दस्य सन्धिकार्याणि भवन्ति इति ज्ञातवन्तः।

➢ रमा इति आप्-अन्तः स्त्रीलिङ्गशब्दः पठितः।

➢ आबन्तात् परस्य औ-प्रत्ययस्य, औट्-प्रत्ययस्य च शी-आदेशः भवति। आबन्तात् टा-प्रत्यये ओस्-प्रत्यये च आकारस्य एकार-आदेशः भवति। सम्बुद्धौ परतः आपः आकारस्य एकारः आदेशः भवति।

➢ आबन्तात् परेषां ङे, ङसि, ङस्, ङि - इति चतुर्णां प्रत्ययानां याट्-आगमः भवति। आप्-अन्तात् परस्य ङि-प्रत्ययस्य आम्-आदेशः भवति।

➢ आप्-अन्तः सर्वनामसंज्ञकः सर्वा-शब्दः पठितः।

➢ आप्-अन्तात् सर्वनाम्नः परेषां ङे, ङसि, ङस्, ङि - प्रत्ययानां स्याट्-आगमः भवति। आपः ह्रस्वः अपि भवति। सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।

➢ नपुंसके विद्यमानस्य अजन्तस्य प्रातिपदिकस्य ह्रस्वः भवति। अतः श्रीपा-शब्दस्य ह्रस्वे कृते श्रीप इति निष्पन्नम्। तस्य रूपाणि ज्ञानशब्दवत् भवन्ति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे इकारान्तानां पुंलिङ्गशब्दानां रूपाणि पठामः।
2. घिसंज्ञकस्य कविशब्दस्य रूपाणि पठामः।
3. सखिशब्दस्य पतिशब्दस्य च रूपाणि जानीमः।
4. कतिशब्दस्य द्विशब्दस्य त्रिशब्दस्य च रूपाणि जानीमः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इकारान्त: पुंलिङ्ग: कविशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कवि+सु(स्)→ कवि:	कवि+औ→ कवी	कवि+जस्(अस्)→ कवय:
द्वितीया	कवि+अम्→ कविम्	कवि+औट्(औ)→ कवी	कवि+शस्(अस्)→ कवीन्
तृतीया	कवि+टा(आ)→ कविना	कवि+भ्याम्→ कविभ्याम्	कवि+भिस्→ कविभि:
चतुर्थी	कवि+ङे(ए)→ कवये	कवि+भ्याम्→ कविभ्याम्	कवि+भ्यस्→ कविभ्य:
पञ्चमी	कवि+ङसि(अस्)→ कवे:	कवि+भ्याम्→ कविभ्याम्	कवि+भ्यस्→ कविभ्य:
षष्ठी	कवि+ङस्(अस्)→ कवे:	कवि+ओस्→ कव्यो:	कवि+आम्→ कवीनाम्
सप्तमी	कवि+ङि(इ)→ कवौ	कवि+ओस्→ कव्यो:	कवि+सुप्(सु)→ कविषु
सम्बोधनम्	हे कवि+सु→ हे कवे!	हे कवि+औ→ हे कवी!	हे कवि+जस्→ हे कवय:!

एवं हरि-रवि-कपि-यति-मुनि-अग्नि-इत्यादय:।

ह्रस्व-इकारान्तानां ह्रस्व-उकारान्तानां च सामान्यतया घिसंज्ञा भवति। सखिशब्दस्य न भवति।[1]

घिसंज्ञानिमित्तकानि कार्याणि -

प्रत्यय:	आदेश:	सामान्यं कार्यम्
टा	ना[2]	
ङे, ङसि, ङस् (ङित्)	गुण:[3]	
ङि	औ	इ/उ - अ[4]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. औ-प्रत्यये, औट्-प्रत्यये च परे पूर्वसवर्णदीर्घः भवति।[5] कवि औ, इकार-औकारयोः पूर्वसवर्णदीर्घः। कवी।
2. जसि गुणः भवति।[7] गुणः इकारस्य एकारः। सम्बुद्धौ अपि गुणः भवति।[8]
कवि + जस्→कवि + अस्→कवे + अस्→कवय् + अस्→कवयः
3. अमि पूर्वरूपम् एकादेशः भवति।[6] कवि अम्, इकार-अकारयोः पूर्वरूपम्। कविम्।
4. कवि+ङे घिसंज्ञकत्वात् ङेप्रत्यये गुणः कवे+ङे, ङकारस्य इत्संज्ञायां लोपे कवे+ए, एकारस्य अयादेशः-कवये। घिसंज्ञानिमित्तानि कार्याणि उपरि उक्तानि।
5. ङसि-प्रत्यये, ङस्-प्रत्यये च गुणकरणात् परम् एकार-अकारयोः पूर्वरूपम् एकादेशः भवति।[9]
कवि + ङसि/ङस्→कवि + अस्→कवे + अस्→कवेस्→कवेः(गुणः)।
6. आम्-प्रत्यये नुट्-आगमः भवति।[10] इकारस्य दीर्घः अपि भवति।[11]
कवि + आम्→कवि + न् + आम्→कवी + नाम्→कवीनाम्।
7. ओसि यणादेशः भवति।[12] कवि + ओस्→कव्योस्→काव्योः।
8. ङि-प्रत्ययस्य औ-आदेशे[13], इकारस्य अकारादेशे च कृते[14] अकार-औकारयोः वृद्धिः भवति।[15] कवि + ङि→कवि + औ→कव + औ→कवौ।
9. कवि + सु, सम्बुद्धौ गुणः। कवे + स्। एङः परस्य सम्बुद्धेः हलः लोपः। कवे!
10. कवि + सुप्, सु-प्रत्यये सकारस्य षकारादेशः भवति।[16]

इकारान्तः पुंलिङ्गः सखि-शब्दः

सखिशब्दस्य घिसंज्ञा न वर्तते।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सखि+सु(स्)→ सखा	सखि+औ→ सखायौ	सखि+जस्(अस्)→ सखायः
द्वितीया	सखि+अम्→ सखायम्	सखि+औट्(औ)→ सखायौ	सखि + शस्(अस्)→ सखीन्
तृतीया	सखि+टा(आ)→ सख्या	सखि+भ्याम्→ सखिभ्याम्	सखि+भिस्→ सखिभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	सखि+ङे(ए)→ सख्ये	सखि+भ्याम्→ सखिभ्याम्	सखि+भ्यस्→ सखिभ्यः
पञ्चमी	सखि+ङसि(अस्)→ सख्युः	सखि+भ्याम्→ सखिभ्याम्	सखि+भ्यस्→ सखिभ्यः
षष्ठी	सखि+ङस्(अस्)→ सख्युः	सखि + ओस्→ सख्योः	सखि+आम्→ सखीनाम्
सप्तमी	सखि+ङि(इ)→ सख्यौ	सखि + ओस्→ सख्योः	सखि + सुप्(सु)→ सखिषु
सम्बोधनम्	हे सखि+सु→ हे सखे !	हे सखि+औ→ हे सखायौ !	हे सखि+जस्→ हे सखायः !

1. सु-प्रत्यये सखि-शब्दस्य इकारस्य अनङ्-आदेशः भवति ।[17] अनङ्-आदेशे अन्-आदेशः अवशिष्यते । सः इकारस्य स्थाने भवति । **सखि+सु→सखि+स्→सखन्+स्**, सर्वनामस्थाने परे नान्तस्य उपधायाः दीर्घः भवति ।[18] हलः परस्य सस्य लोपः भवति ।[19] पदान्ते विद्यमानस्य नस्य लोपः भवति ।[20] सखा ।
2. सखि-शब्दात् परस्य सर्वनामस्थानसंज्ञकस्य णिद्वद्भावः भवति ।[21] सम्बुद्धौ तु णिद्वद्भावः न भवति । णित्-प्रत्यये परे अजन्तस्य अङ्गस्य = प्रकृते इकारस्य वृद्धिः ऐकारः भवति ।[22] ऐकारस्य आय्-आदेशः ।[23]
सखि + औ/औट्→सखै + औ→सखाय् + औ→सखायौ ।
सखि + जस्→सखि + अस्→सखै + अस्→सखाय् + अस्→सखायः ।
सखि + अम्→सखै + अम्→सखाय् + अम्→सखायम् ।
3. सखि-शब्दात् शसि पूर्वसवर्णदीर्घः भवति ।[24] शसः सस्य नः । सखीन् ।
4. टा, ङे, ङसि, ङस्, ओस्-एतेषु प्रत्ययेषु परेषु यणादेशः भवति ।[25] सख्या इत्यादि ।
5. सखि + ङसि/ङस्→खिशब्दे इकारस्य यणादेशकरणात् परं ङसिङसोः अकारस्य उकारः आदेशः भवति ।[26] सखि + ङसि/ङस् सखि + अस्→ सख्य् + अस्→सख्य् + उस्→सख्युः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6. ह्रस्वात् परस्य आमः नुट्-आगमः भवति।[27] नामि दीर्घः भवति। सखीनाम्।
7. सखिशब्दात् परस्य ङिप्रत्ययस्य औ-आदेशः भवति।[28] अनन्तरं यणादेशः भवति।[29] सखि + ङि→सखि + इ→सखि + औ→सख्यौ।
8. सखि + सुप्, अत्र सकारस्य षकारादेशः भवति।[30] सखिषु
9. सम्बुद्धौ इकारस्य गुणः भवति।[31] सखि + स्→सखे + स्। एङः परस्य सम्बुद्धेः सस्य लोपः→हे सखे!।[32]

इकारान्तः पुंलिङ्गः पति-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पति+सु(स्)→ पतिः	पति+औ→ पती	पति+जस्(अस्)→ पतयः
द्वितीया	पति+अम्→ पतिम्	पति+औट्(औ)→ पती	पति+शस्(अस्)→ पतीन्
तृतीया	पति+टा(आ)→ पत्या	पति+भ्याम्→ पतिभ्याम्	पति+भिस्→ पतिभिः
चतुर्थी	पति+ङे(ए)→ पत्ये	पति+भ्याम्→ पतिभ्याम्	पति+भ्यस्→ पतिभ्यः
पञ्चमी	पति+ङसि(अस्)→ पत्युः	पति+भ्याम्→ पतिभ्याम्	पति+भ्यस्→ पतिभ्यः
षष्ठी	पति+ङस्(अस्)→ पत्युः	पति+ओस्→ पत्योः	पति+आम्→ पतीनाम्
सप्तमी	पति+ङि(इ)→ पत्यौ	पति+ओस्→ पत्योः	पति+सुप्(सु)→ पतिषु
सम्बोधनम्	हे पति+सु→ हे पते!	हे पति+औ→ हे पती!	हे पति+जस्→ हे पतयः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. औ, औट्, शस् - प्रत्ययेषु पूर्वसवर्णदीर्घः भवति।[33] शसि पूर्वसवर्णदीर्घात् परस्य शसः सकारस्य नकारादेशः भवति।[34] पति + औ/औट्→पति + औ→पती। पति + शस्→पति + अस्→पतीस्→पतीन्।
2. जसि गुणः भवति।[35] अयादेशः। पति + जस्→पति + अस्→पते + अस्→पतय् + अस्→पतयः।
3. अमि पूर्वरूपम् एकादेशः भवति।[36] पति + अम्→पतिम्।
4. टा, ङे, ङसि, ङस्, ओस् - एतेषु प्रत्ययेषु परेषु यणादेशः भवति।[37] पत्या, पत्ये।
5. पति + ङसि/ङस्→तिशब्दे इकारस्य यणादेशकरणात् परं ङसिङसोः अकारस्य उकारः आदेशः भवति।[38] पति + अस्→पत्य् + अस्→पत्य् + उस्→पत्युः।
6. ह्रस्वात् परस्य आम्-प्रत्ययस्य नुट्-आगमः भवति।[39] नामि दीर्घः आदेशः। पति + आम्→पति + नाम्→पती + नाम्→पतीनाम्।
7. पतिशब्दात् परस्य ङिप्रत्ययस्य औ-आदेशः भवति।[40] अनन्तरं यणादेशः भवति।[41] पति + ङि→पति + औ→पतय् + औ→पत्यौ।
8. पति + सुप्, अत्र सकारस्य षकारादेशः भवति।[42] पतिषु।
9. सम्बुद्धौ इकारस्य गुणः एकारः भवति।[43] एङः परस्य सम्बुद्धेः हलः सकारस्य लोपः।[44] हे पति + स्→हे पते + स्→हे पते!।

पतिशब्दस्य समासे एव घिसंज्ञा भवति। केवले पतिशब्दे न भवति। घिसंज्ञायां हरिशब्दवद्रूपाणि भवन्ति। उदा - भूपतिः।

इकारान्तः कतिशब्दः

कतिशब्दः नित्यं बहुवचनान्तः। अतः अत्र एकवचनं द्विवचनं च न भवति।

विभक्तयः	बहुवचनम्
प्रथमा	कति + जस्(अस्)→कति
द्वितीया	कति + शस्(अस्)→कति
तृतीया	कति + भिस्→कतिभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तयः	बहुवचनम्
चतुर्थी	कति + भ्यस्→कतिभ्यः
पञ्चमी	कति + भ्यस्→कतिभ्यः
षष्ठी	कति + आम्→कतीनाम्
सप्तमी	कति + सुप्(सु)→कतिषु

1. कतिशब्दः डति-प्रत्ययान्तः। अतः तस्य **सङ्ख्या** इति संज्ञा भवति।[45] डत्यन्ता सङ्ख्या **षट्संज्ञा** भवति।[46] अतः कति-शब्दस्य षट्-संज्ञापि वर्तते।
2. षट्संज्ञाविशिष्टात् कतिशब्दात् परयोः जस्-शसोः लुक् भवति।[47]
   कति + जस्/शस्→कति।

लुक् इति शब्देन प्रत्ययस्य लोपः क्रियते चेत् तस्य प्रत्ययलोपस्य **लुक्** इति संज्ञा भवति।[48]

3. ह्रस्वात् परस्य आमः नुट्-आगमः भवति।[49] नामि दीर्घः भवति।
   कति + आम्→कति + न् + आम्→कतीनाम्।
4. कति + सुप्, अत्र सकारस्य षकारादेशः भवति।[50]

इकारान्तः पुंलिङ्गः द्विशब्दः

द्विशब्दः नित्यं द्विवचनान्तः। अतः अत्र एकवचनं बहुवचनं च न भवति।

विभक्तिः	द्विवचनम्
प्रथमा	द्वि + औ→द्वौ
द्वितीया	द्वि + औट्(औ)→द्वौ
तृतीया	द्वि + भ्याम्→द्वाभ्याम्
चतुर्थी	द्वि + भ्याम्→द्वाभ्याम्
पञ्चमी	द्वि + भ्याम्→द्वाभ्याम्
षष्ठी	द्वि + ओस्→द्वयोः
सप्तमी	द्वि + ओस्→द्वयोः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. द्विशब्दस्य विभक्तौ परतः अकारादेशः भवति।[51]

2. औ/औट् प्रत्यययोः परतः अकारादेशात् परं वृद्धिः भवति।[52] भ्याम्-प्रत्यये परे दीर्घः भवति।[53] ओसि एकारादेशः भवति।[54] तस्य अयादेशः।

द्वि + औ/औट्→द्व + औ→द्वौ।

द्वि + भ्याम्→द्व + भ्याम्→द्वा + भ्याम्→द्वाभ्याम्।

द्वि + ओस्→द्व + ओस्→द्वे + ओस्→द्वय् + ओस्→द्वयोः।

इकारान्तः पुंलिङ्गः त्रिशब्दः

त्रिशब्दः नित्यं बहुवचनान्तः। अतः अत्र एकवचनं द्विवचनं च न भवति।

विभक्तिः	बहुवचनम्
प्रथमा	त्रि + जस्(अस्)→त्रयः
द्वितीया	त्रि + शस्(अस्)→त्रीन्
तृतीया	त्रि + भिस्→त्रिभिः
चतुर्थी	त्रि + भ्यस्→त्रिभ्यः
पञ्चमी	त्रि + भ्यस्→त्रिभ्यः
षष्ठी	त्रि + आम्→त्रयाणाम्
सप्तमी	त्रि + सुप्(सु)→त्रिषु

1. जसि गुणः भवति।[55] अयादेशः।

त्रि + जस्→त्रि + अस्→त्रे + अस्→त्रय् + अस्→त्रयः।

2. शसि पूर्वसवर्णदीर्घः भवति।[56] पूर्वसवर्णदीर्घात् परस्य शसः सकारस्य नकारादेशः भवति।[57] त्रि + शस्→त्रि + अस्→त्रीस्→त्रीन्।

3. आम्-प्रत्यये त्रिशब्दस्य त्रय-आदेशः भवति।[58] आमः नुट्-आगमः भवति।[59] नामि दीर्घः भवति।[60] नकारस्य णकारादेशः भवति।[61]

त्रि + आम्→त्रय + आम्→त्रय + न् + आम्→त्रया + नाम्→त्रयाणाम्।

4. त्रि + सुप्, अत्र सकारस्य षकारादेशः भवति।[62] त्रिषु।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठसारः -

1. ह्रस्व-इकारान्तानां ह्रस्व-उकारान्तानां च सामान्यतया घिसंज्ञा भवति। सखिशब्दस्य तु न भवति। घिसंज्ञानिमित्तकानि कार्याणि -

प्रत्ययः	आदेशः	सामान्यं कार्यम्
टा	ना	
ङे, ङसि, ङस् (ङित्)	गुणः	
ङि	औ	इ/उ - अ

2. औ-प्रत्यये, औट्-प्रत्यये च परे पूर्वसवर्णदीर्घः भवति। जसि सम्बुद्धौ च गुणः भवति। अमि पूर्वरूपम् एकादेशः भवति। ङसि-प्रत्यये, ङस्-प्रत्यये च गुणकरणात् परम् एकार-अकारयोः पूर्वरूपम् एकादेशः भवति। आम्-प्रत्यये नुट्-आगमः भवति। इकारस्य दीर्घः अपि भवति। ओसि तु यणादेशः भवति। ङि-प्रत्ययस्य औ-आदेशे, इकारस्य अकारादेशे च कृते अकार-औकारयोः वृद्धिः भवति। सुप्-प्रत्यये सकारस्य षकारादेशः भवति।
3. **सखिशब्दः** - सु-प्रत्यये सखि-शब्दस्य अनङ्-आदेशः भवति। सखि-शब्दात् परस्य सर्वनामस्थान-संज्ञकस्य णिद्वद्भावः भवति। णित्-प्रत्यये परे अजन्तस्य अङ्गस्य वृद्धिः भवति। सखि-शब्दात् शसि पूर्वसवर्णदीर्घः भवति।
4. टा, ङे, ङसि, ङस्, ओस् - एतेषु प्रत्ययेषु परेषु यणादेशः भवति। सख्या, सख्ये। सखि + ङसि/ङस्→ खिशब्दस्य इकारस्य यणादेशकरणात् परं ङसिङसोः अकारस्य उकार-आदेशः भवति।
5. ह्रस्वात् परस्य आमः नुट्-आगमः भवति। सखिशब्दात् परस्य ङिप्रत्ययस्य औ-आदेशः भवति। अनन्तरं यणादेशः भवति। सखि + सुप्, अत्र सकारस्य षकारादेशः भवति। सम्बुद्धौ इकारस्य गुणः भवति।
6. **पतिशब्दः** - औ, औट्, शस् - प्रत्ययेषु पूर्वसवर्णदीर्घः भवति। जसि सम्बुद्धौ च गुणः भवति। शसि पूर्वसवर्णदीर्घात् परस्य शसः सकारस्य नकारादेशः भवति। अमि पूर्वरूपम् एकादेशः भवति। टा, ङे, ङसि, ङस्, ओस् - एतेषु प्रत्ययेषु परेषु यणादेशः भवति। पति + ङसि/ङस्→ तिशब्दस्य इकारस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यणादेशकरणात् परं ङसिङसो: अकारस्य उकार: आदेश: भवति।

7. ह्रस्वात् परस्य आम्-प्रत्ययस्य नुट्-आगम: भवति। पतिशब्दात् परस्य ङिप्रत्ययस्य औ-आदेश: भवति। अनन्तरं यणादेश: भवति। पति + सुप्, सकारस्य षकारादेश: भवति।

8. **कतिशब्द: -** कतिशब्द: नित्यं बहुवचनान्त:। अत: तत्र एकवचनं द्विवचनं च न भवति। कतिशब्द: डति-प्रत्ययान्त:। अत: तस्य सङ्ख्या इति संज्ञा भवति। डत्यन्ता सङ्ख्या षट्संज्ञा भवति। अत: कति-शब्दस्य षट्-संज्ञापि वर्तते। षट्संज्ञकात् कतिशब्दात् परयो: जस्-शसो: लुक् भवति। ह्रस्वात् परस्य आम: नुट्-आगम: भवति। कति + सुप्, अत्र सकारस्य षकारादेश: भवति।

9. **द्विशब्द: -** द्विशब्द: नित्यं द्विवचनान्त:। अत: तत्र एकवचनं बहुवचनं च न भवति। द्विशब्दात् विभक्तौ परत: अकारादेश: भवति। औ/औट् प्रत्यययो: परयो: वृद्धि: भवति। भ्याम्-प्रत्यये परे दीर्घ: भवति। ओसि अकारस्य एकारादेश: भवति।

10. **त्रिशब्द: -** त्रिशब्द: नित्यं बहुवचनान्त:। अत: तत्र एकवचनं द्विवचनं च न भवति। जसि गुण: भवति। शसि पूर्वसवर्णदीर्घ: भवति। पूर्वसवर्णदीर्घात् परस्य शस: सकारस्य नकारादेश: भवति। आम्-प्रत्यये त्रिशब्दस्य त्रय-आदेश: भवति। आम: नुट्-आगम: भवति। नामि दीर्घ: भवति। नकारस्य णकारादेश: भवति। त्रि + सुप्, अत्र सकारस्य षकारादेश: भवति।

अभ्यास:

एकेन वाक्येन समाधत्त -

1. घिसंज्ञा केषां भवति?
2. सखि + सु अत्र इकारस्य क: आदेश: ?
3. सखिशब्दात् परस्य सर्वनामस्थानस्य किं कार्यम्?
4. त्रिशब्द: कीदृश: ?
5. द्विशब्द: कीदृश: ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योग्यम् उत्तरं चिनुत -

1. कवि + जस् - अत्र किं कार्यं भवति ?
   अ) वृद्धिः आ) गुणः इ) पूर्वसवर्णदीर्घः
2. कविशब्दस्य ङित्-प्रत्ययेषु परेषु किं कार्यं भवति ?
   अ) वृद्धिः आ) गुणः इ) सवर्णदीर्घः
3. सखि + जस्-
   अ) सखयः आ) सखायः इ) सख्यः
4. सखि शब्दस्य घिसंज्ञा-
   अ) भवति आ) न भवति इ) वा भवति
5. पति + ङस् - किं रूपं भवति ?
   अ) पतेः आ) पत्युः इ) उभयम्
6. पतिशब्दात् परस्य ङिप्रत्ययस्य कः आदेशः ?
   अ) आम् आ) औ इ) न उभयम्
7. कति + जस् - अत्र किं कार्यं भवति ?
   अ) गुणः आ) वृद्धिः इ) जसः लुक्
8. कतिशब्दस्य का संज्ञा भवति ?
   अ) षट्संज्ञा आ) संङ्ख्यासंज्ञा इ) उभे
9. द्विशब्दस्य विभक्तौ परतः कः आदेशः ?
   अ) अकारः आ) आकारः इ) न कश्चन
10. आम्-प्रत्यये त्रिशब्दस्य कः आदेशः ?
   अ) त्रय आ) त्रयस् इ) त्रिस्

योजयत -

1. पति + टा	ना-आदेशः
2. कवि + टा	लुक्
3. सखि + ङे	यणादेशः
4. कवि + ङे	यणादेशः
5. कति + शस्	गुणः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. कति + आम्
2. पति + ङसि
3. सखि + औट्
4. कवि + सुप् कालिदासः श्रेष्ठः।

प्रक्रियां लिखित्वा, प्रक्रियागतभेदान् लिखत -

1. श्रीपति + ङे, पति + ङे
2. सखि + ङि, कवि + ङि
3. अग्नि + ङसि, पति + ङसि
4. कति + जस्, त्रि + जस्
5. द्वि + ओस्, कपि + ओस्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. सख्युः असम्बुद्धौ।
2. पतिः समासे एव।
3. कवीनां गणः।
4. कतिभिः क्रीतम्।

परियोजना -

1. हरि, रवि - इत्यादीनां सप्तसु विभक्तिषु रूपाणि लिखत।
2. भूपति, श्रीपति - इत्येतयोः रूपाणि लिखत।

---

1. शेषो घ्यसखि (1-4-7) - अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
2. आङो नाऽस्त्रियाम् (7-3-120) - घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासञ्ज्ञा प्राचाम्।
3. घेर्ङिति (7-3-111) - घिसंज्ञकस्य ङिति सुपि गुणः स्यात्।
4. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
5. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
6. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
7. जसि च (7-3-109) - ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे।
8. ह्रस्वस्य गुणः (7-3-108) - ह्रस्वस्य गुणः स्यात्संबुद्धौ।
9. ङसिङसोश्च (6-1-110) - एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

10. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
11. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
12. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
13. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
14. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
15. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
16. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः।
17. अनङ् सौ (7-1-93) सख्युरङ्गस्यानङादेशः स्यादसंबुद्धौ सौ परे।
18. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
19. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
20. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
21. सख्युरसंबुद्धौ (7-1-92) - सख्युरङ्गात्परं संबुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात्।
22. अचो ञ्णिति (7-2-115) - ञिति णिति च प्रत्यये परेऽजन्ताङ्गस्य वृद्धिः स्यात्।
23. एचोऽयवायावः (6-1-78) - एचः क्रमादय् अव् आय् आव् एते स्युरचि।
24. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
25. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
26. ख्यत्यात्परस्य (6-1-112)- खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात्।
27. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
28. औत् (7-3-118) - इदुद्भ्यां परस्य ङेरौत्स्यात्।
29. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
30. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः।
31. ह्रस्वस्य गुणः (7-3-108) - ह्रस्वस्य गुणः स्यात्संबुद्धौ।
32. एङ्ह्रस्वात् सम्बुद्धेः (6-1-69) - एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्।
33. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
34. तस्माच्छसो नः पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।
35. जसि च (7-3-109) - ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे।
36. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
37. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

38. ख्यत्यात्परस्य (6-1-112) - खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उत्स्यात्।

49. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।

40. औत् (7-3-118) - इदुद्भ्यां परस्य ङेरौत्स्यात्।

41. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।

42. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः।

43. ह्रस्वस्य गुणः (7-3-108) - ह्रस्वस्य गुणः स्यात्संबुद्धौ। एङ्ह्रस्वात् 193 इति संबुद्धिलोपः।

44. एङ्ह्रस्वात् सम्बुद्धेः (6-1-69) - एङन्तादध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्।

45. बहुगणवतुडति सङ्ख्या (1-1-23) - एते सङ्ख्यासंज्ञाः स्युः।

46. डति च (1-1-25) - डत्यन्ता सङ्ख्या षट्संज्ञा स्यात्।

47. षड्भ्यो लुक् (7-1-22) - षड्भ्यः परयोर्जश्शसोर्लुक्स्यात्।

48. प्रत्ययस्य लुक्श्लुलुपः (1-1-61) - लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात्।

49. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।

50. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः।

51. त्यदादीनामः (7-2-102) - एषामकारोऽन्तादेशः स्याद्विभक्तौ।

52. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।

53. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घः स्यात्।

54. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकारः स्यात्।

55. जसि च (7-3-109) - ह्रस्वान्तस्याङ्गस्य गुणः स्याज्जसि परे।

56. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।

57. तस्माच्छसो नः पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।

58. त्रेस्त्रयः (7-1-53) - त्रिशब्दस्य त्रयादेशः स्यादामि।

59. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।

60. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।

61. अट्कुप्वाङ्नुम्व्यवायेऽपि (8-4-2) - अट्, कवर्ग, पवर्ग, आङ् नुम् एतैर्व्यस्तैर्यथासंभवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः स्यात्समानपदे।

62. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्। विवृताघोषस्य सस्य तादृश एव षः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमः पाठः - इकारान्तशब्दाः(2)

चतुर्थस्य पाठस्य पुनरावृत्तिः

➤ पूर्वस्मिन् पाठे वयं **घिसंज्ञां** पठितवन्तः।

➤ घिसंज्ञानिमित्तानि कार्याणि पठितानि। घिसंज्ञायां ङित्प्रत्ययेषु परेषु गुणः भवति। ङसिङसोः पूर्वरूपम् एकादेशः भवति। ङिप्रत्ययस्य औ-आदेशः, इकारस्य अकारादेशश्च भवति।

➤ सखिशब्दः - सु-प्रत्यये सखि-शब्दस्य अनङ्-आदेशः भवति। सखि-शब्दात् परस्य सर्वनामस्थान-संज्ञकस्य णिद्वद्भावः भवति। णित्-प्रत्यये परे अजन्तस्य अङ्गस्य वृद्धिः भवति। सखि-शब्दात् शसि पूर्वसवर्णदीर्घः भवति।

➤ टा, ङे, ङसि, ङस्, ओस् - एतेषु प्रत्ययेषु परेषु यणादेशः भवति। सखि+ङसि/ङस्→ खिशब्दे इकारस्य यणादेशकरणात् परं ङसिङसोः अकारस्य उकार-आदेशः भवति।

➤ ह्रस्वात् परस्य आमः नुट्-आगमः भवति। सखिशब्दात् परस्य ङिप्रत्ययस्य औ-आदेशः भवति। अनन्तरं यणादेशः भवति। सखि + सुप्, अत्र सकारस्य षकारादेशः भवति। सम्बुद्धौ इकारस्य गुणः भवति।

➤ पतिशब्दः - औ, औट्, शस् प्रत्ययेषु पूर्वसवर्णदीर्घः भवति। शसि पूर्वसवर्णदीर्घात् परस्य शसः सकारस्य नकारादेशः भवति। जसि सम्बुद्धौ च गुणः भवति। अमि पूर्वरूपम् एकादेशः भवति।

➤ टा, ङे, ङसि, ङस्, ओस् - एतेषु प्रत्ययेषु परेषु यणादेशः भवति। पति + ङसि/ङस्→ तिशब्दे इकारस्य यणादेशकरणात् परं ङसिङसोः अकारस्य उकार आदेशः भवति।

➤ ह्रस्वात् परस्य आम्-प्रत्ययस्य नुट्-आगमः भवति। पतिशब्दात् परस्य ङिप्रत्ययस्य औ-आदेशः भवति। अनन्तरं यणादेशः भवति। पति + सुप्, अत्र सकारस्य षकारादेशः भवति।

➤ कतिशब्दः - कतिशब्दः नित्यं बहुवचनान्तः। कतिशब्दः डति-प्रत्ययान्तः। अतः तस्य सङ्ख्या इति संज्ञा भवति। डत्यन्ता सङ्ख्या षट्संज्ञा भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अत: कति-शब्दस्य षट्-संज्ञापि वर्तते। षट्संज्ञकात् कतिशब्दात् परयो: जस्-शसो: लुक् भवति।

➢ ह्रस्वात् परस्य आम: नुट्-आगम: भवति। कति+सुप्, अत्र सकारस्य षकारादेश: भवति।

➢ त्रिशब्द: - त्रिशब्द: नित्यं बहुवचनान्त:। जसि गुण: भवति। शसि पूर्वसवर्णदीर्घ: भवति। पूर्वसवर्णदीर्घात् परस्य शस: सकारस्य नकारादेश: भवति।

➢ आम्-प्रत्यये त्रिशब्दस्य त्रय-आदेश: भवति। आम: नुट्-आगम: भवति। नामि दीर्घ: भवति। नकारस्य णकारादेश: भवति। त्रि + सुप्, अत्र सकारस्य षकारादेश: भवति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे वयं मतिशब्दस्य रूपाणि पठाम:।
2. नदीसंज्ञां, तन्निमित्तकानि कार्याणि च पठाम:।
3. त्रिशब्दस्य स्त्रीलिङ्गे रूपाणि पठाम:।
4. द्विशब्दस्य स्त्रियां रूपाणि पठाम:।
5. वारिशब्दस्य रूपाणि च पठाम:।
6. दधिशब्दस्य रूपाणि पठाम:।

इकारान्त: स्त्रीलिङ्ग: मतिशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मति+सु(स्)→ मति:	मति+औ→ मती	मति+जस्(अस्)→ मतय:
द्वितीया	मति+अम्→ मतिम्	मति+औट्(औ)→ मती	मति + शस्(अस्)→ मती:
तृतीया	मति+टा(आ)→ मत्या	मति+भ्याम्→ मतिभ्याम्	मति+भिस्→ मतिभि:
चतुर्थी	मति+ङे(ए)→ मत्यै/मतये	मति+भ्याम्→ मतिभ्याम्	मति+भ्यस्→ मतिभ्य:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
पञ्चमी	मति+ङसि(अस्)→ मत्याः/मतेः	मति+भ्याम्→ मतिभ्याम्	मति+भ्यस्→ मतिभ्यः
षष्ठी	मति+ङस्(अस्)→ मत्याः/मतेः	मति+ओस्→ मत्योः	मति + आम्→ मतीनाम्
सप्तमी	मति+ङि(इ)→ मत्याम्/मतौ	मति+ओस्→ मत्योः	मति + सुप्(सु)→ मतिषु
सम्बोधनम्	हे मति+सु→ हे मते!	हे मति+औ→ हे मती!	हे मति+जस्→ हे मतयः!

एवं भक्ति-गति-रुचि-रात्रि-इत्यादयः

ह्रस्व-इकारान्तस्य ह्रस्व-उकारान्तस्य च नित्यस्त्रीवाचकस्य ङित्सु विकल्पेन नदीसंज्ञा भवति।[1]



1. औ, औट्, शस् - प्रत्ययेषु पूर्वसवर्णदीर्घः भवति।[2]
2. जसि गुणः भवति।[3]
2. अमि पूर्वरूपम् एकादेशः भवति।[4] टाप्रत्यये यणादेशः भवति।[5]
3. मतिशब्दस्य ङे, ङसि, ङस्, ङि प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति।[6] नदीसंज्ञायाः अभावे घिसंज्ञा भवति।[7]
4. नदीसंज्ञायां ङे, ङसि, ङस्, ङि - प्रत्ययानाम् आट्-आगमः भवति।[8] आट्-आगमे कृते वृद्धिः भवति।[9] यणादेशः।

मति + ङे→मति + आट् + ङे→मति + आ + ए→मति + ऐ→मत्यै।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मति + ङसि/ङस्→मति + आट् + अस्→मति + आस्→मत्यास्→मत्याः।

5. आम्-प्रत्ययस्य नुट्-आगमः भवति।[10] नामि अङ्गस्य दीर्घः भवति।[11]

6. इकार-उकाराभ्यां नदीसंज्ञकाभ्याम् परस्य ङिप्रत्ययस्य आम् आदेशः भवति।[12] आट् आगमश्च भवति। मति + ङि→मति + आम्→मति + आ + आम्→मति + आम्→मत्याम्। आदौ आम्-आदेशः, ततः आट् आगमः। आमादेशे कृते नुडागमं बाधित्वा आट् एव भवति।

7. नदीसंज्ञा-अभावपक्षे, घिसंज्ञायां ङित्सु प्रत्ययेषु परेषु गुणः भवति।[13]
मति + ङे→मति + ए→मते + ए→मतय् + ए→मतये।
मति + ङसि/ङस्→मति + अस्→मते + अस्→मतेस्→मतेः।

8. घिसंज्ञायां ङिस्थाने औ-आदेशः, इकारस्य अकार-आदेशः च भवति।[14]
मति+ङि→मति+औ→मत+औ→वृद्धौ मतौ।

9. सम्बुद्धौ ह्रस्वस्य गुणः भवति।[15] सम्बुद्धौ मतिशब्दस्य नदीसंज्ञा नास्ति। अतः नदीसंज्ञानिमित्तकं कार्यं न भवति तत्र।

मतिशब्दे घिसंज्ञानिमित्तकानि कार्याणि

प्रत्ययः	कार्यम्	रूपम्
ङे	गुणः	मतये
ङसि	गुणः	मतेः
ङस्	गुणः	मतेः
ङि	इकारस्य अ, ङिस्थाने औ	मतौ

मतिशब्दे नदीसंज्ञानिमित्तकानि कार्याणि

प्रत्ययः	आदेशः	आगमः	कार्यम्	रूपम्
ङे		आट्[16]	वृद्धिः[17], यणादेशः	मत्यै
ङसि		आट्	वृद्धिः, यणादेशः	मत्याः
ङस्		आट्	वृद्धिः, यणादेशः	मत्याः
आम्		नुट्[18]	दीर्घः	मतीनाम्
ङि	आम्[19]	आट्	वृद्धिः, यणादेशः	मत्याम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

इकारान्तः स्त्रीलिङ्गः त्रिशब्दः

त्रिशब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति।

विभक्तिः	बहुवचनम्
प्रथमा	त्रि + जस्(अस्)→तिस्रः
द्वितीया	त्रि + शस्(अस्)→तिस्रः
तृतीया	त्रि + भिस्→तिसृभिः
चतुर्थी	त्रि + भ्यस्→तिसृभ्यः
पञ्चमी	त्रि + भ्यस्→तिसृभ्यः
षष्ठी	त्रि + आम्→तिसृणाम्
सप्तमी	त्रि + सुप्(सु)→तिसृषु

स्त्रीलिङ्गे त्रिशब्दस्य तिसृ-आदेशः भवति।[20]

1. जसि शसि च तिसृ-शब्दस्य ऋकारस्य रेफः-आदेशः भवति।[21] जसि ऋकारस्य गुणः प्राप्तः[22] तं बाधित्वा रेफादेशः। शसि पूर्वसवर्णदीर्घः प्राप्तः।[23] तं बाधित्वा रेफादेशः।
2. आमः नुट्-आगमः भवति। नामि परे ऋकारस्य दीर्घः न भवति।[24] नकारस्य णत्वं भवति।[25]

इकारान्तः स्त्रीलिङ्गः द्विशब्दः

द्विशब्दः नित्यं द्विवचनान्तः। अतः एकवचनं बहुवचनं च न भवति।

विभक्तिः	द्विवचनम्
प्रथमा	द्वि + औ→द्वे
द्वितीया	द्वि + औट्(औ)→द्वे
तृतीया	द्वि + भ्याम्→द्वाभ्याम्
चतुर्थी	द्वि + भ्याम्→द्वाभ्याम्
पञ्चमी	द्वि + भ्याम्→द्वाभ्याम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	द्विवचनम्
षष्ठी	द्वि + ओस्→द्वयोः
सप्तमी	द्वि + ओस्→द्वयोः

1. विभक्तौ परतः द्विशब्दे इकारस्य अकारः आदेशः भवति।[26] अकारान्तत्वात् स्त्रियां टाप्-प्रत्ययः भवति।[27] टाप्-प्रत्यये आकारः अवशिष्टः भवति।
2. औ, औट् प्रत्यययोः स्थाने शी-आदेशः भवति।[28] गुणः।[29]
   द्वि + औ→द्व + औ→द्व + टाप् + औ→द्व + आ + औ→द्वा + औ→द्वा + शी→द्वा + ई→द्वे।
   द्वि + भ्याम्→द्व + भ्याम्→द्व + टाप् + भ्याम्→द्व + आ + भ्याम्→द्वा + भ्याम्→द्वाभ्याम्।
3. ओसि आपः आकारस्य एकारादेशः भवति।[30] अयादेशः।
   द्वि + ओस्→द्व + ओस्→द्व + टाप् + ओस्→द्व + आ + ओस्→द्वा + ओस्→द्वे + ओस्→द्वय् + ओस्→द्वयोः।

इकारान्तः नपुंसकलिङ्गः वारिशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	वारि+सु(स्)→ वारि	वारि+औ→ वारिणी	वारि+जस्(अस्)→ वारीणि
द्वितीया	वारि+अम्→ वारि	वारि+औट्(औ)→ वारिणी	वारि+शस्(अस्)→ वारीणि
तृतीया	वारि+टा(आ)→ वारिणा	वारि+भ्याम्→ वारिभ्याम्	वारि+भिस्→ वारिभिः
चतुर्थी	वारि+ङे(ए)→ वारिणे	वारि+भ्याम्→ वारिभ्याम्	वारि+भ्यस्→ वारिभ्यः
पञ्चमी	वारि+ङसि (अस्)→वारिणः	वारि+भ्याम्→ वारिभ्याम्	वारि+भ्यस्→ वारिभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
षष्ठी	वारि+ङस्(अस्)→ वारिणः	वारि+ओस्→ वारिणोः	वारि+आम्→ वारीणाम्
सप्तमी	वारि+ङि(इ)→ वारिणि	वारि+ओस्→ वारिणोः	वारि+सुप्(सु)→ वारिषु
सम्बोधनम्	हे वारि+सु→ हे वारे!/वारि!	हे वारि+औ→ हे वारिणी!	हे वारि+जस्→ हे वारीणि!

1. नपुंसकात् परयोः सु-अमोः लुक् (लोपः) भवति।[31] वारि+सु/अम्→वारि।
2. औ, औट् प्रत्यययोः शी-आदेशः भवति।[32] शकारस्य इत्संज्ञायां लोपे ईकारः अवशिष्टः।
3. इगन्तस्य नपुंसकस्य अङ्गस्य नुम्-आगमः भवति अच्-आदौ प्रत्यये परे।[33]

मित्-आगमः स्थानिनः अन्तिमात् अचः परः भवति।[34]

वारि+औ→वरि+शी→वारि+ई→वारिन्+ई→वारिनी→नस्य णत्वम्। वारिणी।

4. जस्, शस् प्रत्यययोः शि-आदेशः भवति।[35] शकारस्य इत्संज्ञायां लोपे इकारः अवशिष्टः भवति।

शि-इत्यस्य **सर्वनामस्थानम्** इति संज्ञा भवति।[36]

5. सर्वनामस्थाने परे नुम्-आगमः।[37] नान्तस्य उपधायाः दीर्घः भवति।[38] वारि+जस्/शस्→वारि+शि→वारि+इ→वारिन्+इ→वारीन्+ इ→वारीणि।
6. वारिशब्दात् परस्य टा-स्थाने ना आदेशः भवति।[39] नस्य णत्वम्। वारिणा।
7. ङे, ङसि, ङस्, ङि, ओस् - एतेषु परेषु इगन्तस्य नुम्-आगमः भवति। वारि+ङे→ वारि+ए→वारिन्+ए→नस्य णत्वम्। वारिणे। एवं वारिणः, वारिणोः, वारिणि।

वारिश्ब्दस्य घिसंज्ञायां ङित्सु गुणः प्राप्तः[40], तं बाधित्वा नुमागमः भवति।[41]

8. आमः नुट्-आगमः प्राप्तः[42], नुम्-आगमः च प्राप्तः।[43] तत्र नुमं बाधित्वा नुट्-आगमः भवति।[44] नुटि न् अवशिष्टः। तस्मिन् परे अचः दीर्घः भवति।[45] वारीणाम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

9. सम्बुद्धौ सो: लोपानन्तरमपि विकल्पेन प्रत्ययः अस्तीति अङ्गीकृत्य गुणः क्रियते। **हे वारे!** इति भवति। प्रत्ययः नास्तीति पक्षे गुणाभावे **हे वारि!** इति भवति।

इकारान्तः नपुंसकलिङ्गः दधि-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	दधि+सु(स्)→ दधि	दधि+औ→ दधिनी	दधि+जस्(अस्)→ दधीनि
द्वितीया	दधि+अम्→ दधि	दधि+औट्(औ)→ दधिनी	दधि+शस्(अस्)→ दधीनि
तृतीया	दधि+टा(आ)→ दध्ना	दधि+भ्याम्→ दधिभ्याम्	दधि+भिस्→ दधिभिः
चतुर्थी	दधि+ङे(ए)→ दध्ने	दधि+भ्याम्→ दधिभ्याम्	दधि+भ्यस्→ दधिभ्यः
पञ्चमी	दधि+ङसि(अस्)→ दध्नः	दधि+भ्याम्→ दधिभ्याम्	दधि+भ्यस्→ दधिभ्यः
षष्ठी	दधि+ङस्(अस्)→ दध्नः	दधि+ओस्→ दध्नोः	दधि+आम्→ दध्नाम्
सप्तमी	दधि+ङि(इ)→ दध्नि/दधनि	दधि+ओस्→ दध्नोः	दधि+सुप्(सु)→ दधिषु
सम्बोधनम्	हे दधि+सु→ हे दधे!/दधि!	हे दधि+औ→ हे दधिनी!	हे दधि+जस्→ हे दधीनि!

एवम् अस्थि-सक्थि-अक्षि-शब्दाः।

1. दधिशब्दात् परयोः सु-अमोः लुक् (लोपः) भवति।[46] दधि।
2. औ, औट् प्रत्यययोः शी-आदेशः भवति।[47] शकारस्य इत्संज्ञायां, लोपे ई अवशिष्टः। तस्मिन् परे इगन्तस्य नपुंसकस्य नुम्-आगमः भवति।[48] दधि + औ/औट्→दधि + शी→दधि + ई→दधिन् + ई→दधिनी।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. जस्, शस् प्रत्यययोः स्थाने शि-आदेशः भवति।[49] शकारस्य इत्संज्ञायां लोपे च इ अवशिष्टः। अत्रापि नुम्-आगमः भवति। नान्तस्य उपधायाः सर्वनामस्थने परे दीर्घः। दधीनि।
4. टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् प्रत्ययेषु परेषु दधिशब्दस्य इकारस्य अनङ्-आदेशः भवति।[50] अनङ् आदेशे अन् इति अवशिष्टः।
   दधि + टा→दधि + आ→दधन् + आ
5. भसंज्ञकावयवस्य अनः अकारस्य लोपः भवति।[51]
   दधन् + आ→दधन् + आ→दध्ना। एवं दध्ने, दध्नः, दध्नोः, दध्नाम्।
6. ङि प्रत्यये परे अनः अकारस्य लोपः विकल्पेन भवति।[52] दध्नि, दधनि।

पाठसारः -

1. ह्रस्व-इकारान्तस्य ह्रस्व-उकारान्तस्य च नित्यस्त्रीवाचकस्य ङित्प्रत्ययेषु विकल्पेन नदीसंज्ञा भवति।
2. औ, औट्, शस् प्रत्ययेषु पूर्वसवर्णदीर्घः भवति। अमि पूर्वरूपं भवति। टाप्रत्यये यणादेशः भवति।
3. मतिशब्दस्य ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति। नदीसंज्ञायाः अभावे घिसंज्ञा भवति। नदीसंज्ञायां ङे, ङसि, ङस्, ङि - प्रत्ययानाम् आट्-आगमः भवति। आट्-आगमे कृते वृद्धिः भवति।
4. आम्-प्रत्ययस्य नुट्-आगमः भवति। नामि अङ्गस्य दीर्घः भवति। इकारोकाभ्यां नदीसंज्ञकाभ्याम् उत्तरस्य ङेः आम् आदेशः भवति।
5. नदीसंज्ञा-अभावपक्षे, घिसंज्ञायां ङित्सु प्रत्ययेषु परेषु गुणः भवति। घिसंज्ञायां ङिस्थाने औ-आदेशः, इकारस्य अकार-आदेशः च भवति। सम्बुद्धौ ह्रस्वस्य गुणः भवति।
6. त्रिशब्दः - स्त्रीलिङ्गे त्रिशब्दस्य तिसृ-आदेशः भवति। जसि शसि च तिसृ-शब्दस्य ऋकारस्य रेफः-आदेशः भवति। आमः नुट्-आगमः भवति। नामि परे ऋकारस्य दीर्घः न भवति। नकारस्य णत्वं भवति।
7. द्विशब्दः - विभक्तौ परतः द्विशब्दस्य अकारः आदेशः भवति। अकारान्तत्वात् स्त्रियां टाप्-प्रत्ययः भवति। टाप्-प्रत्यये आकारः अवशिष्टः भवति। औ,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

औट् प्रत्यययोः स्थाने शी-आदेशः भवति। ओसि तु आपः आकारस्य एकारादेशः भवति।

8. वारिशब्दः - नपुंसकात् परयोः सु-अमोः लुक् (लोपः) भवति। औ, औट् प्रत्ययोः शी-आदेशः भवति। शकारस्य इत्संज्ञायां लोपे ईकारः अवशिष्टः। इगन्तस्य नपुंसकस्य अङ्गस्य नुम्-आगमः भवति अच्-आदौ प्रत्यये परे।

9. मित्-आगमः स्थानिनः अन्तिमात् अचः परः भवति। जस्, शस् प्रत्यययोः शि-आदेशः भवति। शकारस्य इत्संज्ञायां लोपे इकारः अवशिष्टः भवति। सर्वनामस्थाने परे उपधायाः दीर्घः भवति।

10. वारिशब्दात् परस्य टा-स्थाने ना-आदेशः भवति। ङे, ङसि, ङस्, ङि, ओस्-एतेषु परेषु इगन्तस्य नुम्-आगमः भवति। आमः नुट्-आगमः भवति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. मतिशब्दस्य नदीसंज्ञा कदा भवति?
2. त्रिशब्दस्य स्त्रियां कः आदेशः भवति?
3. आगमः मित् चेत् किं कार्यम् ?
4. दधिशब्दस्य टा-प्रत्यये कः आदेशः भवति?
5. तिसृ + जस् - अत्र ऋकारस्य आदेशः कः?

योग्यम् उत्तरं चिनुत -

1. मतिशब्दस्य नदीसंज्ञायाः अभावे का संज्ञा भवति?
   अ) घिसंज्ञा आ) घुसंज्ञा इ) घसंज्ञा
2. मति + ङे - किं रूपम्?
   अ) मतये आ) मत्यै इ) उभयम्
3. मति + ङि मतिशब्दस्य का संज्ञा भवति?
   अ) घिसंज्ञा आ) नदीसंज्ञा इ) उभे
4. त्रि + आम् स्त्रियां किं रूपम्?
   अ) त्रयाम् आ) त्रयाणाम् इ) तिसृणाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. द्विशब्दात् स्त्रियां कः प्रत्ययः ?
अ) ङीप् आ) ङीष् इ) टाप्
6. वारि + अम् - किं रूपम् ?
अ) वारिम् आ) वारीम् इ) वारि
7. हे वारि + सु
अ) हे वारि आ) हे वारे इ) उभयम्
8. वारि + आम् - अत्र कः आगमः भवति ?
अ) नुट् आ) नुम् इ) नुक्
9. दधि + ङि - किं रूपम् ?
अ) दध्नि आ) दधनि इ) उभयम्
10. दधि + सु - किं कार्यम् ?
अ) सोः अम् आ) सोः लुक् इ) सस्य रुत्वम्

योजयत -

1. वारि + जस्	गुणः
2. वारि + औट्	वारीणि
3. मति + ङि	वारिणी
4. मति + ङे	आट्-आगमः, आम्-आदेशः
5. हे वारि + सु	आट्-आगमः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. वारि + भिस्
2. मति + ङस्
3. त्रि + शस्(स्त्री)
4. द्वि + भ्याम्(स्त्री)

एतेषां प्रक्रियां लिखित्वा, प्रक्रियाभेदान् लिखत

1. वारि + ङे, दधि + ङे
2. द्वि + भ्याम् (स्त्री), मति + भ्याम्
3. त्रि + आम् (स्त्री), बुद्धि + आम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. मति + ङि, रवि + ङि
5. रुचि + ङि, दधि + ङि

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत

1. द्वे बालिके आह्वय।
2. तिसृषु
3. दध्नः
4. मती स्तः

परियोजना -

1. बुद्धि, विभक्ति - इत्यादीनाम् इकारान्तानां स्त्रीलिङ्गशब्दानां सप्तसु विभक्तिषु रूपाणि लिखत।
2. अस्थि, सक्थि, अक्षि - एषां सप्तसु विभक्तिषु रूपाणि लिखत।

---

1. ङिति ह्रस्वश्च (1-4-6) - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।
2. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
3. जसि च (7-3-109) - ह्रस्वान्तस्य अङ्गस्य जस्-प्रत्यये परे गुणादेशः स्यात्।
4. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
5. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
6. ङिति ह्रस्वश्च (1-4-6) - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।
7. शेषो घ्यसखि (1-4-7) - अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
8. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
9. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
10. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
11. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
12. इदुद्भ्याम् (7-3-117) - नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात्।
13. घेर्ङिति (7-3-111) - घिसंज्ञकस्य ङिति सुपि गुणः स्यात्।
14. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
15. ह्रस्वस्य गुणः (7-3-108) - ह्रस्वस्य गुणः स्यात्संबुद्धौ।
16. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

17. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
18. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
19. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
20. त्रिचतुरोः स्त्रियां तिसृचतसृ (7-2-99) - स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः।
21. अचि र ऋतः (7-2-100) - तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि।
22. ऋतो ङिसर्वनामस्थानयोः (7-3-110) - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्।
23. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
24. न तिसृचतसृ (6-4-4) - एतयोर्नामि दीर्घो न स्यात्।
25. ऋवर्णान्नस्य णत्वं वाच्यम् (वा. 4969)- ऋवर्णात् परस्य नस्य णत्वं वक्तव्यम्।
26. त्यदादीनामः (7-2-102) - एषामकारोऽन्तादेशः स्याद्विभक्तौ।
27. अजाद्यतष्टाप् (4-1-4) - अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
28. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।
29. आद्गुणः (6-1-87) - अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्।
30. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
31. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
32. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
33. इकोऽचि विभक्तौ (7-1-73) - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ।
34. मिदचोन्त्यात्परः (1-1-47) - अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित् स्यात्।
35. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
36. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
37. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
38. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
39. आङो नाऽस्त्रियाम् (7-3-120) - घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासञ्ज्ञा प्राचाम्।
40. घेर्ङिति (7-3-111) - घिसंज्ञकस्य ङिति सुपि गुणः स्यात्।
41. वृद्धि-औत्व-तृज्वद्भाव-गुणेभ्यः नुम् पूर्वप्रतिषेधेन
42. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
43. इकोऽचि विभक्तौ (7-1-73) - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ।
44. नुमचिरतृज्वद्भावो नुट् पूर्वप्रतिषेधेन
45. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
46. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
47. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
48. इकोऽचि विभक्तौ (7-1-73) - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

49. जश्शसो: शि: (7-1-20) - क्लीबादनयो: शि: स्यात्।

50. अस्थिदधिसक्थ्यक्ष्णामनङुदात्त: (7-1-75) - एषामनङ् स्याट्टादावचि स चोदात्त:।

51. अल्लोपोऽन: (6-4-134) - अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोप: स्यात्।

52. विभाषा ङिश्यो: (6-4-136) अङ्गावयव: असर्वनामस्थानयजादिस्वादिपर: य: अन् तस्य अकारस्य लोप: वा स्यात् ङिश्यो: परस्यो:।

❀ ❀ ❀ ❀ ❀

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठः पाठः - ईकारान्तशब्दाः(1)

पञ्चमस्य पाठस्य पुनरावृत्तिः -

➢ पूर्वस्मिन् पाठे मतिशब्दस्य रूपाणि दृष्टवन्तः।

➢ ह्रस्व-इकारान्तस्य, ह्रस्व-उकारान्तस्य च नित्यस्त्रीवाचकस्य ङित्सु विकल्पेन नदीसंज्ञा भवति।

➢ मतिशब्दस्य ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति। नदीसंज्ञायाः अभावे घिसंज्ञा भवति। नदीसंज्ञायां ङे, ङसि, ङस्, ङि - प्रत्ययानाम् आट्-आगमः भवति। आट्-आगमे कृते वृद्धिः भवति।

➢ त्रिशब्दः - स्त्रीलिङ्गे त्रिशब्दस्य तिसृ-आदेशः भवति। जसि शसि च तिसृ-शब्दस्य ऋकारस्य रेफः आदेशः भवति। आमः नुट्-आगमः भवति। नामि परे ऋकारस्य दीर्घः न भवति। नकारस्य णत्वं भवति।

➢ द्विशब्दः - विभक्तौ परतः द्विशब्दस्य अकारः आदेशः भवति। अकारान्तत्वात् स्त्रियां टाप्-प्रत्ययः भवति। टाप्-प्रत्यये आकारः अवशिष्टः भवति। औ, औट् प्रत्यययोः स्थाने शी-आदेशः भवति। ओसि तु आपः आकारस्य एकारादेशः भवति।

➢ वारिशब्दः - नपुंसकात् परयोः सु-अमोः लुक् (लोपः) भवति। औ, औट् प्रत्यययोः शी-आदेशः भवति। शकारस्य इत्संज्ञायां लोपे च ईकारः अवशिष्टः। इगन्तस्य नपुंसकस्य अङ्गस्य नुम्-आगमः भवति अच्-आदौ प्रत्यये परे।

प्रयोजनानि -

1. अस्मिन् पाठे पपीशब्दस्य रूपाणि पठामः।
2. बहुश्रेयसीशब्दस्य रूपाणि पठामः।
3. प्रधीशब्दस्य पुंलिङ्गे रूपाणि पठामः।
4. सुधीशब्दस्य पुंलिङ्गे रूपाणि पठामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईकारान्तः पुंलिङ्गः पपीशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पपी+सु(स्)→ पपीः	पपी+औ→ पप्यौ	पपी+जस्(अस्)→ पप्यः
द्वितीया	पपी+अम्→ पपीम्	पपी+औट्(औ)→ पप्यौ	पपी+शस्(अस्)→ पपीन्
तृतीया	पपी+टा(आ)→ पप्या	पपी+भ्याम्→ पपीभ्याम्	पपी+भिस्→ पपीभिः
चतुर्थी	पपी+ङे(ए)→ पप्ये	पपी+भ्याम्→ पपीभ्याम्	पपी+भ्यस्→ पपीभ्यः
पञ्चमी	पपी+ङसि(अस्)→ पप्यः	पपी+भ्याम्→ पपीभ्याम्	पपी+भ्यस्→ पपीभ्यः
षष्ठी	पपी+ङस्(अस्)→ पप्यः	पपी+ओस्→ पप्योः	पपी+आम्→ पप्याम्
सप्तमी	पपी+ङि(इ)→ पपी	पपी+ओस्→ पप्योः	पपी+सुप्(सु)→ पपीषु
सम्बोधने	हे पपी+सु→ हे पपीः !	हे पपी+औ→ हे पप्यौ !	हे पपी+जस्→ हे पप्यः !

1. पपी इति ईकारान्तः शब्दः।
2. औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ओस्-एतेषु यणादेशः भवति।
3. अमि पूर्वरूपम्।[1]
4. शसि पूर्वसवर्णदीर्घः।[2] तदनन्तरं सकारस्य नकारादेशः।[3]
5. पपी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति।
6. ङिप्रत्यये सवर्णदीर्घः।[4]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईकरान्तः पुंलिङ्गः बहुश्रेयसीशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बहुश्रेयसी+सु(स्)→ बहुश्रेयसी	बहुश्रेयसी+औ→ बहुश्रेयस्यौ	बहुश्रेयसी+जस् (अस्)→बहुश्रेयस्यः
द्वितीया	बहुश्रेयसी+अम्→ बहुश्रेयसीम्	बहुश्रेयसी+औट् (औ)→बहुश्रेयस्यौ	बहुश्रेयसी+शस् (अस्)→बहुश्रेयसीन्
तृतीया	बहुश्रेयसी+टा (आ)→बहुश्रेयस्या	बहुश्रेयसी+भ्याम्→ बहुश्रेयसीभ्याम्	बहुश्रेयसी+भिस्→ बहुश्रेयसीभिः
चतुर्थी	बहुश्रेयसी+ङे(ए)→ बहुश्रेयस्यै	बहुश्रेयसी+भ्याम्→ बहुश्रेयसीभ्याम्	बहुश्रेयसी+भ्यस्→ बहुश्रेयसीभ्यः
पञ्चमी	बहुश्रेयसी+ङसि (अस्)→बहुश्रेयस्याः	बहुश्रेयसी+भ्याम्→ बहुश्रेयसीभ्याम्	बहुश्रेयसी+भ्यस्→ बहुश्रेयसीभ्यः
षष्ठी	बहुश्रेयसी+ङस् (अस्)→बहुश्रेयस्याः	बहुश्रेयसी+ओस्→ बहुश्रेयस्योः	बहुश्रेयसी+आम्→ बहुश्रेयसीनाम्
सप्तमी	बहुश्रेयसी+ङि (इ)→बहुश्रेयस्याम्	बहुश्रेयसी+ओस्→ बहुश्रेयस्योः	बहुश्रेयसी+सुप्(सु)→ बहुश्रेयसीषु
सम्बोधनम्	हे बहुश्रेयसी+सु→ हे बहुश्रेयसि !	हे बहुश्रेयसी+औ→ हे बहुश्रेयस्यौ !	हे बहुश्रेयसी+जस्→ हे बहुश्रेयस्यः !

बहुश्रेयसीशब्दस्य नदी संज्ञा भवति ।[5] अतः नदीसंज्ञानिमित्तकानि कार्याणि भवन्ति ।

बहुश्रेयसीशब्दप्रक्रिया

1. बहुश्रेयसी + सुँ, उकारस्य इत्संज्ञायां लोपः । सस्य लोपः ।[6] बहुश्रेयसी ।
2. बहुश्रेयसी + औ/औट्/जस्, अत्र सर्वत्र पूर्वसवर्णदीर्घः प्राप्तः ।[7] तस्य निषेधः विधीयते दीर्घात् जसि, इजादौ विभक्तौ च परे ।[8] अतः यणादेशः ।[9] बहुश्रेयस्यौ, बहुश्रेयस्यः ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. अमि पूर्वरूपम्।[10] शमि पूर्वसवर्णदीर्घः।[11] शसः सस्य नः।[12]

बहुश्रेयसी + अम् → बहुश्रेयसीम्।

बहुश्रेयसी + शस् → बहुश्रेयसी + अस् → बहुश्रेयसीस् → बहुश्रेयसीन्।

4. बहुश्रेयसी + टा, बहुश्रेयसी + आ → अत्र यणादेशः।[13] बहुश्रेयस्या।

5. बहुश्रेयसी ङे/ङसि/ङस्, नदीसंज्ञां निमित्तीकृत्य आट्-आगमः।[14] आटः अचि वृद्धिः।[15] यणादेशः।[16] बहुश्रेयसी + आट् + ए/अस् → बहुश्रेयसी + आ ए→ बहुश्रेयसी + ऐ → बहुश्रेयस्यै।

बहश्रेयसी + आ अस् → बहुश्रेयसी + आस् → बहुश्रेयस्याः।

6. बहुश्रेयसी + आम्, नदीसंज्ञां निमित्तीकृत्य प्रत्ययस्य नुट्-आगमः।[17] नामि अजन्तस्य अङ्गस्य दीर्घः।[18] बहुश्रेयसी + आम् → बहुश्रेयसी + न् + आम्→ बहुश्रेयसीनाम्।

7. बहुश्रेयसी + ङि। नदीसंज्ञायां ङिस्थाने आम्।[19] प्रत्ययस्य नदीसंज्ञां निमित्तीकृत्य आट्-आगमः।[20] आटः अचश्च वृद्धिः।[21] ततः यणादेशः।

बहुश्रेयसी + इ → बहुश्रेयसी + आम् → बहुश्रेयसी आ आम् → बहुश्रेयसी + आम् → बहुश्रेयस्याम्।

8. हे बहुश्रेयसी + सु। सम्बुद्धौ परतः ह्रस्वः।[22] हे बहुश्रेयसि + स् ह्रस्वात् परस्य सम्बुद्धौ हलः लोपः।[23] हे बहुश्रेयसि!।

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
ङे, ङसि, ङस्,	-	आट्(आ)[24]	वृद्धिः[25]
आम्	-	नुट्(न्)[26]	दीर्घः
ङि	आम्[27]	आट्	-
सम्बुद्धौ	ह्रस्वः	-	-

ईकारान्तः पुंलिङ्गः प्रधीशब्दः

प्रधीः - प्रध्यायति। प्रपूर्वकाद् ध्यै चिन्तायामिति धातोः क्विपि रूपम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	प्रधी+सु(स्)→ प्रधीः	प्रधी+औ→ प्रध्यौ	प्रधी+जस्(अस्)→ प्रध्यः
द्वितीया	प्रधी+अम्→ प्रध्यम्	प्रधी+औट्(औ)→ प्रध्यौ	प्रधी+शस्(अस्)→ प्रध्यः
तृतीया	प्रधी+टा(आ)→ प्रध्या	प्रधी+भ्याम्→ प्रधीभ्याम्	प्रधी+भिस्→ प्रधीभिः
चतुर्थी	प्रधी+ङे(ए)→ प्रध्ये	प्रधी+भ्याम्→ प्रधीभ्याम्	प्रधी+भ्यस्→ प्रधीभ्यः
पञ्चमी	प्रधी+ङसि(अस्)→ प्रध्यः	प्रधी+भ्याम्→ प्रधीभ्याम्	प्रधी+भ्यस्→ प्रधीभ्यः
षष्ठी	प्रधी+ङस्(अस्)→ प्रध्यः	प्रधी+ओस्→ प्रध्योः	प्रधी+आम्→ प्रध्याम्
सप्तमी	प्रधी+ङि(इ)→ प्रध्यि	प्रधी+ओस्→ प्रध्योः	प्रधी+सुप्(सु)→ प्रधीषु
सम्बोधनम्	हे प्रधी+सु→ हे प्रधीः!	हे प्रधी+औ→ हे प्रध्यौ!	हे प्रधी+जस्→ हे प्रध्यः!

1. प्रधी इत्यत्र ईकारान्तः धातुः अन्ते विद्यते। अचि तस्य इयङ् आदेशः प्राप्तः।[28] ईकारात् प्राक् संयोगः नास्ति। अपि च अनेकाच् अङ्गम्। अतः अचि सर्वत्र यणादेशः भवति।[29]
2. औ, औट्, जस् - प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः। परन्तु दीर्घात् इचि, जसि च परे पूर्वसवर्णदीर्घस्य निषेधः भवति।[30] अतः यणादेशः भवति। प्रध्यौ, प्रध्यः।
3. अमि पूर्वरूपं प्राप्तम्[31], परन्तु तद् बाधित्वा धातोः ईकारस्य यणादेशः भवति। प्रध्यम्।
4. शसि पूर्वसवर्णदीर्घः प्राप्तः[32], तं बाधित्वा यणादेशः भवति। प्रध्यः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. प्रधी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति।
6. ङिप्रत्यये सवर्णदीर्घं[33] च बाधित्वा यणादेशः प्रवर्तते।

ईकारान्तः पुंलिङ्गः सुधीशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सुधी+सु(स्)→ सुधीः	सुधी+औ→ सुधियौ	सुधी+जस्(अस्)→ सुधियः
द्वितीया	सुधी+अम्→ सुधियम्	सुधी+औट्(औ)→ सुधियौ	सुधी+शस्(अस्)→ सुधियः
तृतीया	सुधी+टा(आ)→ सुधिया	सुधी+भ्याम्→ सुधीभ्याम्	सुधी+भिस्→ सुधीभिः
चतुर्थी	सुधी+ङे(ए)→ सुधिये	सुधी+याम्→ सुधीभ्याम्	सुधी+भ्यस्→ सुधीभ्यः
पञ्चमी	सुधी+ङसि(अस्)→ सुधियः	सुधी+भ्याम्→ सुधीभ्याम्	सुधी+भ्यस्→ सुधीभ्यः
षष्ठी	सुधी+ङस्(अस्)→ सुधियः	सुधी+ओस्→ सुधियोः	सुधी+आम्→ सुधियाम्
सप्तमी	सुधी+ङि(इ)→ सुधियि	सुधी+ओस्→ सुधियोः	सुधी+सुप्(सु)→ सुधीषु
सम्बोधनम्	हे सुधी+सु→ हे सुधीः!	हे सुधी+औ→ हे सुधियौ!	हे सुधी+जस्→ हे सुधियः!

1. सुधी इत्यत्र ईकारान्तः धातुः अन्ते विद्यते। ईकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्रापि अचि यणादेशः प्राप्तः[34], परन्तु तस्य निषेधः विधीयते।[35]
2. औ, औट्, जस्-प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः[36], तस्य निषेधः भवति।[37]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यणादेशः प्राप्तः[38], तस्यापि निषेधः विधीयते।[39] अतः इयङ्-आदेशः एव भवति।[40]

3. धातोः इ/ईकारस्य अच्-आदौ प्रत्यये परे इयङ्-आदेशः भवति।[41] इयङ्-आदेशे इय् इति अवशिष्टः भवति। अयम् अन्त्यस्य इ/ईकारस्य स्थाने भवति। सुधी + औ→सुधिय् + औ→सुधियौ। एवं सुधियः।
4. अमि पूर्वरूपं प्राप्तम्।[42] तद् बाधित्वा यणादेशः प्राप्तः।[43] तस्य निषेधः कृतः।[44] अतः इयङ्-आदेशः भवति।[45]
5. शसि पूर्वसवर्णदीर्घः प्राप्तः।[46] तं बाधित्वा यणादेशः प्राप्तः।[47] तस्य निषेधः भवति।[48] अतः इयङ्-आदेशः भवति।[49]
6. सुधी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति।

पाठसारः -

1. पपी इति ईकारान्तः शब्दः। औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ओस्-एतेषु यणादेशः भवति। अमि पूर्वरूपम्। शसि पूर्वसवर्णदीर्घः। तदनन्तरं सकारस्य नकारादेशः। पपी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति। ङिप्रत्यये सवर्णदीर्घः।
2. श्रेयसीशब्दः ईकारान्तः, समासात् प्राक् स्त्रियां विद्यमानः, समासवशात् पुंसि वर्तते। तथापि तस्य नदीसंज्ञा भवति। अतः नदीसंज्ञानिमित्तकानि कार्याणि सर्वाणि अत्र भवन्ति।
3. प्रधी इत्यत्र ईकारान्तः, धातुः अन्ते विद्यमानः शब्दः। ईकारात् प्राक् संयोगः अपि नास्ति। अनेकाच् अङ्गमपि। अतः अचि सर्वत्र यणादेशः एव भवति। औ, औट्, जस्-प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः। परन्तु दीर्घात् इचि, जसि च परे पूर्वसवर्णदीर्घस्य निषेधः भवति।
4. अमि पूर्वरूपम् प्राप्तम्। परन्तु तद् बाधित्वा धातोः ईकारस्य यणादेशः एव भवति। शसि पूर्वसवर्णदीर्घः प्राप्तः। तं बाधित्वा यणादेशः एव भवति। प्रधी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति। ङिप्रत्यये सवर्णदीर्घं बाधित्वा यणादेशः एव।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. सुधी इत्यत्र ईकारान्तः धातुः अन्ते विद्यते। ईकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्रापि अचि यणादेशः प्राप्तः, परन्तु तस्य निषेधः विधीयते। अतः इयङ् भवति। इयङ्-आदेशे इय् इति अवशिष्टः भवति। अयम् अन्त्यस्य इ/ईकारस्य स्थाने भवति। औ, औट्, अम्, शस्-एतेषु परेषु इयङ्-आदेशः एव भवति। सुधी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. प्रधीशब्दस्य अचि किं कार्यं भवति?
2. बहुश्रेयसीशब्दस्य विग्रहवाक्यं किम्?
3. नदीसंज्ञायां ङित्सु किं कार्यं भवति?
4. बहुश्रेयसीशब्दस्य कथं नदीसंज्ञा?
5. नदीसंज्ञायां सम्बुद्धौ किं कार्यं भवति?

योग्यं समाधानं चिनुत -

1. पपी + टा - किं रूपम्?
   अ) पप्या　आ) पपिना　इ) पपिया
2. पपी + आम् - किं रूपम्?
   अ) पपीनाम्　आ) पप्याम्　इ) पपियाम्
3. बहुश्रेयसी + टा - किं रूपम्?
   अ) बहुश्रेयस्या　आ) बहुश्रेयसिना　इ) उभयम्
4. बहुश्रेयसीशब्दस्य नदीसंज्ञा-
   अ) न भवति　आ) भवति　इ) वा भवति
5. सम्बुद्धौ बहुश्रेयसीशब्दस्य किं रूपम्?
   अ) हे बहुश्रेयसी　आ) हे बहुश्रेयसे　इ) हे बहुश्रेयसि
6. प्रधी + टा - किं रूपम्?
   अ) प्रधिया　आ) प्रध्या　इ) उभयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. प्रधी + ङि - किं रूपम्?
   अ) प्रधी आ) प्रध्यि इ) प्रधियि
8. सुधी + टा - किं रूपम्?
   अ) सुधिया आ) सुध्या इ) उभयम्
9. सुधी + आम् - किं रूपम्?
   अ) सुध्याम् आ) सुधीनाम् इ) सुधियाम्
10. सुधी + ङि - किं रूपम्?
   अ) सुध्यि आ) सुधियि इ) सुधी

योजयत -

1. पपी + ङि	इयङादेशः
2. बहुश्रेयसी + ङि	सवर्णदीर्घः
3. प्रधी + ङि	आम्-आदेशः
4. सुधी + ङि	यणादेशः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. पपी + ङे
2. प्रधी + ङे
3. सुधी + ङे
4. बहुश्रेयसी + ङे

प्रक्रियां लिखित्वा, भेदान् लिखत -

1. बहुश्रेयसी + अम्, प्रधी + अम्
2. प्रधी + अम्, सुधी + अम्
3. बहुश्रेयसी + अम्, सुधी + अम्
4. पपी + ङि, बहुश्रेयसी + ङि
5. बहुश्रेयसी + ओस्, पपी + ओस्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. पप्यः
2. बहुश्रेयस्याः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. प्रध्य:

4. सुधिय:

परियोजना -

ययीशब्दस्य पुंलिङ्गे सप्तसु विभक्तिषु रूपाणि लिखत।

---

1. अमि पूर्व: (6-1-107) - अकोऽम्यचि परत: पूर्वरूपमेकादेश: स्यात्।
2. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
3. तस्माच्छसो न: पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो य: शस: सकारस्तस्य न: स्यात्पुंसि।
4. अक: सवर्णे दीर्घ: (6-1-101) - अक: सवर्णेऽचि परे दीर्घ एकादेश: स्यात्।
5. प्रथमलिङ्गग्रहणञ्च - पूर्वं स्त्र्याख्यस्य उपसर्जनत्वेपि नदीत्वं वक्तव्यम् इत्यर्थ:।
6. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
7. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
8. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयो: पूर्वसवर्णदीर्घो न स्यात्।
9. इको यणचि (7-1-77) - इक: स्थाने यण् स्यादचि संहितायां विषये।
10. अमि पूर्व: (6-1-107) - अकोऽम्यचि परत: पूर्वरूपमेकादेश: स्यात्।
11. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
12. तस्माच्छसो न: पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो य: शस: सकारस्तस्य न: स्यात्पुंसि।
13. इको यणचि (7-1-77) - इक: स्थाने यण् स्यादचि संहितायां विषये।
14. आण्नद्या: (7-3-112) - नद्यन्तात्परेषां ङितामाडागम: स्यात्।
15. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेश: स्यात्।
16. इको यणचि (7-1-77) - इक: स्थाने यण् स्यादचि संहितायां विषये।
17. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागम: स्यात्।
18. नामि (6-4-3) - नामि परे अजन्तङ्गस्य दीर्घ: स्यात्।
19. ङेराम्नद्याम्नीभ्य: (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
20. आण्नद्या: (7-3-112) - नद्यन्तात्परेषां ङितामाडागम: स्यात्।
21. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेश: स्यात्।
22. अम्बार्थनद्योर्ह्रस्व: (7-3-107) - अम्बार्थानां नद्यन्तानां च ह्रस्व: स्यात्संबुद्धौ।
23. एङ्ह्रस्वात् सम्बुद्धे: (6-1-69) - एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत्।
24. आण्नद्या: (7-3-112) - नद्यन्तात्परेषां ङितामाडागम: स्यात्।
25. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेश: स्यात्।
26. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागम: स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

27. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
28. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
29. एरनेकाचोऽसंयोगपूर्वस्य (6-4-82) - धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे।
30. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
31. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
32. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
33. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्।
34. एरनेकाचोऽसंयोगपूर्वस्य (6-4-82) - धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे।
35. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
36. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
37. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
38. एरनेकाचोऽसंयोगपूर्वस्य (6-4-82) - धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण्स्यादजादौ प्रत्यये परे। इति यण्।
39. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
40. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
41. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
42. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
43. एरनेकाचोऽसंयोगपूर्वस्य (6-4-82) - धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण्स्यादजादौ प्रत्यये परे। इति यण्।
44. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
45. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
46. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
47. एरनेकाचोऽसंयोगपूर्वस्य (6-4-82) - धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ प्रत्यये परे। इति यण्।
48. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
49. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तमः पाठः - ईकारान्तशब्दाः(2)

षष्ठस्य पाठस्य पुनरावृत्तिः -

- पपी इति ईकारान्तः शब्दः। औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ओस् - एतेषु यणादेशः भवति। अमि पूर्वरूपम् एकादेशः। शसि पूर्वसवर्णदीर्घः। तदनन्तरं सकारस्य नकारादेशः। पपी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति। ङिप्रत्यये सवर्णदीर्घः।
- श्रेयसीशब्दः ईकारान्तः, समासात् प्राक् स्त्रियां विद्यमानः, समासवशात् पुंसि वर्तते। तथापि तस्य नदीसंज्ञा भवति। अतः नदीसंज्ञानिमित्तकानि कार्याणि सर्वाणि अत्र भवन्ति।
- प्रधी इत्यत्र ईकारान्तः धातुः अन्ते विद्यते। ईकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गमपि। अतः अचि सर्वत्र यणादेशः एव भवति। औ, औट्, जस् प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः। परन्तु दीर्घात् इचि, जसि च परे पूर्वसवर्णदीर्घस्य निषेधः भवति।
- अमि पूर्वरूपं एकादेशः प्राप्तम्। परन्तु तद् बाधित्वा धातोः ईकारस्य यणादेशः एव भवति। शसि पूर्वसवर्णदीर्घः प्राप्तः। तं बाधित्वा यणादेशः भवति। प्रधी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति। ङिप्रत्यये सवर्णदीर्घं बाधित्वा यणादेशः प्रवर्तते।
- सुधी इत्यत्र ईकारान्तः धातुः अन्ते विद्यते। ईकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्रापि अचि यणादेशः प्राप्तः। परन्तु तस्य निषेधः विधीयते। अतः इयङ् भवति। इयङ्-आदेशे इय् इति अवशिष्टः भवति। अयम् अन्त्यस्य इ/ईकारस्य स्थाने भवति। औ, औट्, अम्, शस् - एतेषु परेषु इयङ्-आदेशः एव भवति। सुधी इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति।

एतान् अंशान् पठितवन्तः।

अस्य पाठस्य प्रयोजनानि -

1. गौरीशब्दस्य रूपाणि पठामः।
2. स्त्रीशब्दस्य रूपाणि पठामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. श्रीशब्दस्य रूपाणि पठामः।

4. नपुंसकलिङ्गे सुधीशब्दस्य रूपाणि पठामः।

ईकारान्तः स्त्रीलिङ्गः गौरीशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गौरी+सु(स्)→ गौरी	गौरी+औ→ गौर्यौ	गौरी+जस्(अस्)→ गौर्यः
द्वितीया	गौरी+अम्→ गौरीम्	गौरी+औट्(औ)→ गौर्यौ	गौरी+शस्(अस्)→ गौरीः
तृतीया	गौरी+टा(आ)→ गौर्या	गौरी+भ्याम्→ गौरीभ्याम्	गौरी+भिस्→ गौरीभिः
चतुर्थी	गौरी+ङे(ए)→ गौर्यै	गौरी+भ्याम्→ गौरीभ्याम्	गौरा+भ्यस्→ गौरीभ्यः
पञ्चमी	गौरी+ङसि(अस्)→ गौर्याः	गौरी+भ्याम्→ गौरीभ्याम्	गौरी+भ्यस्→ गौरीभ्यः
षष्ठी	गौरी+ङस्(अस्)→ गौर्याः	गौरी+ओस्→ गौर्योः	गौरी+आम्→ गौरीणाम्
सप्तमी	गौरी+ङि(इ)→ गौर्याम्	गौरी+ओस्→ गौर्योः	गौरी+सुप्(सु)→ गौरीषु
सम्बोधनम्	हे गौरी+सु→ हे गौरि !	हे गौरी+औ→ हे गौर्यौ !	हे गौरी+जस्→ हे गौर्यः !

गौरीशब्दः ङ्यन्तः।

1. गौरीशब्दात् सु-प्रत्यये, उकारस्य अनुबन्धलोपे अवशिष्टस्य सकारस्य लोपः।[1]

2. गौरीशब्दस्य नदीसंज्ञा वर्तते।[2] अतः नदीसंज्ञानिमित्तकानि कार्याणि भवन्ति।

3. नदीसंज्ञानिमित्तकानि कार्याणि -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्यय:	आदेश:	आगम:	सामान्यकार्यम्
ङे, ङसि, ङस्, ङि	-	आट्(आ)[3]	वृद्धि:[4]
आम्	-	नुट्(न्)[5]	
ङि	आम्	-	-
सम्बुद्धौ	ह्रस्व:[6]	-	-

4. औ, औट्, जस् - प्रत्ययेषु पूर्वसवर्णदीर्घ: प्राप्त:[7]। तस्य निषेध: भवति।[8] अत: यणादेश: क्रियते।[9]

5. अमि पूर्वरूपं भवति।[10] शसि पूर्वसवर्णदीर्घ: भवति।[11]

ईकारान्त: स्त्रीलिङ्ग: स्त्रीशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	स्त्री+सु(स्)→स्त्री	स्त्री+औ→स्त्रियौ	स्त्री+जस्(अस्)→स्त्रिय:
द्वितीया	स्त्री+अम्→ स्त्रियम्/स्त्रीम्	स्त्री+औट्(औ)→ स्त्रियौ	स्त्री+शस्(अस्)→ स्त्रिय:/स्त्री:
तृतीया	स्त्री+टा(आ)→ स्त्रिया	स्त्री+भ्याम्→ स्त्रीभ्याम्	स्त्री + भिस्→ स्त्रीभि:
चतुर्थी	स्त्री+ङे(ए)→ स्त्रियै	स्त्री+भ्याम्→ स्त्रीभ्याम्	स्त्री+भ्यस्→ स्त्रीभ्य:
पञ्चमी	स्त्री+ङसि(अस्)→ स्त्रिया:	स्त्री+भ्याम्→ स्त्रीभ्याम्	स्त्री+भ्यस्→ स्त्रीभ्य:
षष्ठी	स्त्री+ङस्(अस्)→ स्त्रिया:	स्त्री+ओस्→ स्त्रियो:	स्त्री+आम्→ स्त्रीणाम्
सप्तमी	स्त्री+ङि(इ)→ स्त्रियाम्	स्त्री+ओस्→ स्त्रियो:	स्त्री+सुप्(सु)→ स्त्रीषु
सम्बोधनम्	हे स्त्री+सु→ हे स्त्रि!	हे स्त्री+औ→ हे स्त्रियौ!	हे स्त्री+जस्→ हे स्त्रिय:!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. स्त्रीशब्दात् परस्य सु-प्रत्ययस्य सकारस्य लोपः भवति।[12]
2. स्त्रीशब्दस्य अजादौ प्रत्यये परे इयङ् आदेशः भवति।[13] अतः औ, जस्,औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - एतेषु प्रत्ययेषु परेषु नित्यम् इयङ्।
3. अमि, शसि च विकल्पेन इयङ्।[14] इयङ्-अभावे अमि पूर्वरूपम्।[15] शसि पूर्वसवर्णदीर्घः।[16]
4. स्त्रीशब्दस्य नदीसंज्ञा वर्तते। अतः तन्निमित्तकानि कार्याणि भवन्ति।

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
अम्, शस्	वा इयङ्	-	-
ङे, ङसि, ङस्, ङि	इयङ्	आट्(आ)[17]	वृद्धिः[18]
आम्	-	नुट्(न्)[19]	
ङि	आम्[20]	-	-
सम्बुद्धौ	ह्रस्वः	-	-

स्त्री + ङे→स्त्री + ए→स्त्रिय् + ए→स्त्रिय् + आट् + ए→स्त्रिय् + ऐ→स्त्रियै

ईकारान्तः स्त्रीलिङ्गः श्रीशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	श्री+सु(स्)→श्रीः	श्री+औ→श्रियौ	श्री+जस्(अस्)→ श्रियः
द्वितीया	श्री+अम्→ श्रियम्	श्री+औट्(औ)→ श्रियौ	श्री+शस्(अस्)→ श्रियः
तृतीया	श्री+टा(आ)→ श्रिया	श्री+भ्याम्→ श्रीभ्याम्	श्री+भिस्→ श्रीभिः
चतुर्थी	श्री+ङे(ए)→ श्रियै/श्रिये	श्री+भ्याम्→ श्रीभ्याम्	श्री+भ्यस्→ श्रीभ्यः
पञ्चमी	श्री+ङसि(अस्)→ श्रियाः/श्रियः	श्री+भ्याम्→ श्रीभ्याम्	श्री+भ्यस्→ श्रीभ्यः
षष्ठी	श्री+ङस्(अस्)→ श्रियाः/श्रियः	श्री+ओस्→ श्रियोः	श्री+आम्→ श्रीणाम्/श्रियाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
सप्तमी	श्री+ङि(इ)→ श्रियाम्/श्रियि	श्री+ओस्→ श्रियोः	श्री+सुप्(सु)→ श्रीषु
सम्बोधनम्	हे श्री+सु→हे श्रीः!	हे श्री+औ→हे श्रियौ!	हे श्री+जस्→हे श्रियः!

श्रीशब्दः ङ्यन्तः नास्ति। अतः संबुद्धौ सुलोपो न।

1. श्रीशब्दस्य अजादौ प्रत्यये परे इयङ्-आदेशः भवति।[21]



इयङुवङ्स्थानी नित्यस्त्रीलिङ्गः ईकारान्तः, ऊकारान्तश्च नदीसंज्ञकः न भवति।[22] स्त्रीशब्दः इयङ्स्थानी तदापि तस्य निषेधो न भवति।

2. श्रीशब्दः इयङ्-स्थानी नित्यस्त्रीलिङ्गश्च। अतः ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा।[23]

3. आमि विकल्पेन नदीसंज्ञा भवति।[24] नदीसंज्ञायां तन्निमित्तकानि कार्याणि भवन्ति।

4. नदीसंज्ञायां ङे, ङसि, ङस्, ङि - प्रत्ययानाम् आट्-आगमः, वृद्धिश्च। आम्-प्रत्ययस्य नुट्-आगमः। ङिप्रत्ययस्य आम्-आदेशः, वृद्धिश्च भवति।

नदीसंज्ञायाम्-

श्री+ङे→श्री+ए→श्रिय्+ए→श्रिय्+आट्+ए→श्रिय्+आ+ए→श्रिय्+ऐ→श्रियै।

नदीसंज्ञाभावपक्षे - श्री + ङे→श्री + ए→श्रिय् + ए→श्रिये।

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
ङे, ङसि, ङस्, ङि	-	आट्(आ)[25]	वृद्धिः[26]
आम्	-	नुट्(न्)[27]	
ङि	आम्[28]	-	-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ईकारान्तः नपुंसकलिङ्गः सुधीशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सुधी+सु(स्)→ सुधि	सुधी+औ→ सुधिनी	सुधी+जस्(अस्)→ सुधीनि
द्वितीया	सुधी+अम्→ सुधि	सुधी+औट्(औ)→ सुधिनी	सुधी+शस्(अस्)→ सुधीनि
तृतीया	सुधी+टा(आ)→ सुधिया/सुधिना	सुधी+भ्याम्→ सुधिभ्याम्	सुधि+भिस्→ सुधिभिः
चतुर्थी	सुधी+ङे(ए)→ सुधिये/सुधिने	सुधी+भ्याम्→ सुधिभ्याम्	सुधी+भ्यस्→ सुधिभ्यः
पञ्चमी	सुधी+ङसि(अस्)→ सुधियः/सुधिनः	सुधी+भ्याम्→ सुधिभ्याम्	सुधी+भ्यस्→ सुधिभ्यः
षष्ठी	सुधी+ङस्(अस्)→ सुधियः/सुधिनः	सुधी+ओस्→ सुधियोः	सुधी+आम्→ सुधियाम्/सुधीनाम्
सप्तमी	सुधी+ङि(इ)→ सुधियि/सुधिनि	सुधी+ओस्→ सुधियोः	सुधी+सुप्(सु)→ सुधिषु
सम्बोधने	हे सुधी+सु→ हे सुधे!/सुधि!	हे सुधी+औ→ हे सुधिनी!	हे सुधी+जस्→ हे सुधीनि!

1. नपुंसकलिङ्गे सुधी इति दीर्घान्तस्य प्रातिपदिकस्य ह्रस्वः भवति।[29] अतः ह्रस्व-इकारान्तः।
2. सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् भवति।[30] सुधि। औ-स्थाने शी-आदेशः भवति।[31] जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च शि-आदेशः भवति।[32] सुधि+औ→ सुधि+शी→सुधि+ई, इगन्तस्य अचि नुमागमः→सुधिन्+ ई→सुधिनी। सुधी+जस्→सुधि+जस्→सुधि+शि→सर्वनामस्थाने नुम्→सुधिन्। नान्तस्य उपधायाः दीर्घः→सुधीन् + इ→सुधीनि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. सुधीशब्दस्य अजादौ प्रत्यये परे इयङ्-आदेशः भवति।[33]

4. टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु परेषु रूपद्वयं भवति। एतेषु प्रत्ययेषु परेषु सुधीशब्दस्य विकल्पेन पुंवद्भावः भवति।[34] अतः पुंवद्भावे इयङ्-आदेशः भवति। तदभावे वारिशब्दवत् प्रक्रिया ज्ञेया।

पुंवद्-भावः - पुलिङ्गवत् कार्याणि भवन्ति।

पुंवद्भावे - सुधी + टा→ सुधि + आ→सुधिय् + आ→सुधिया। एवं सुधिये इत्यादि। पुंवद्भाव-अभावपक्षे - सुधी+टा→सुधि+आ→सुधिन्+आ→सुधिने। एवं सुधिने इत्यादि।

5. पुंवद्भाव-अभावे प्रातिपदिकस्य इगन्तत्वात् अजादौ प्रत्यये परे नुम्-आगमः।[35] आमः तु नुट्-आगमः। अतः सुधियाम्, सुधीनाम् इति।

पाठसारः -

1. गौरीशब्दात् सु-प्रत्यये, उकारस्य अनुबन्धलोपे अवशिष्टस्य सकारस्य लोपः। औ, औट्, जस् - प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः। तस्य निषेधः भवति। अतः यणादेशः क्रियते। अमि पूर्वरूपं भवति। शसि पूर्वसवर्णदीर्घः भवति। गौरीशब्दस्य नदीसंज्ञा वर्तते। अतः नदीसंज्ञानिमित्तकानि कार्याणि भवन्ति। नदीसंज्ञानिमित्तकानि कार्याणि -

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
ङे, ङसि, ङस्, ङि	-	आट्(आ)[36]	वृद्धिः[37]
आम्	-	नुट्(न)[38]	
ङि	आम्[39]	-	-
सम्बुद्धौ	ह्रस्वः	-	-

2. स्त्रीशब्दात् परस्य सु-प्रत्ययस्य सकारस्य लोपः भवति। स्त्रीशब्दस्य अजादौ प्रत्यये परे इयङ् आदेशः भवति। अतः औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - एतेषु प्रत्ययेषु परेषु नित्यम् इयङ्। अमि, शसि च विकल्पेन इयङ्। इयङ्-अभावे अमि पूर्वरूपम्। शसि पूर्वसवर्णदीर्घः। स्त्रीशब्दस्य नदीसंज्ञा वर्तते। अतः तन्निमित्तकानि कार्याणि भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. श्रीशब्दस्य अजादौ प्रत्यये परे इयङ्-आदेशः भवति। श्रीशब्दः इयङ्-स्थानी नित्यस्त्रीलिङ्गश्च। अतः ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति। आमि विकल्पेन नदीसंज्ञा भवति। नदीसंज्ञायां ङे, ङसि, ङस्, ङि प्रत्ययानाम् आट्-आगमः। आम्-प्रत्ययस्य नुट्-आगमश्च। ङिप्रत्ययस्य आम्-आदेशश्च विकल्पेन भवति।

4. नपुंसकलिङ्गः सुधीशब्दः - नपुंसकलिङ्गे सुधी इत्यस्य प्रातिपदिकस्य ह्रस्वः भवति। सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति। औ-स्थाने शी-आदेशः भवति। जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च शि-आदेशः भवति। सुधीशब्दस्य अजादौ प्रत्यये परे इयङ्-आदेशः भवति। टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु परेषु रूपद्वयं भवति। एतेषु प्रत्ययेषु परेषु सुधीशब्दस्य विकल्पेन पुंवद्भावः भवति। अतः पुंवद्भावे इयङ्-आदेशः भवति। तदभावे वारिशब्दवत् रूपाणि भवन्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. स्त्रीशब्दस्य अजादौ प्रत्यये किं कार्यं भवति ?
2. गौरीशब्दस्य प्रथमैकवचने किं कार्यम् ?
3. श्रीशब्दस्य स्त्रीलिङ्गे अजादौ प्रत्यये किं कार्यम् ?
4. श्रीशब्दस्य स्त्रीलिङ्गे ङित्सु किं कार्यम् ?
5. सुधीशब्दस्य पुंवद्भावः केषु प्रत्ययेषु भवति ?

योग्यं समाधानं चिनुत -

1. गौरीशब्दस्य जस्-प्रत्यये किं कार्यम् ?
   अ) पूर्वसवर्णदीर्घः आ) यणादेशः इ) पूर्वरूपम्
2. स्त्रीशब्दस्य अमि इयङ् कथं भवति ?
   अ) नित्यम् आ) विकल्पेन इ) बहुलम्
3. स्त्रीशब्दस्य शसि किं कार्यम् ?
   अ) इयङ् आ) पूर्वसवर्णदीर्घः इ) उभयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. स्त्रीशब्दस्य सम्बुद्धौ किं रूपम्?

अ) हे स्त्री आ)हे स्त्रि इ) हे स्त्रे

5. श्रीशब्दस्य स्त्रीलिङ्गे ङिप्रत्यये किं रूपम्?

अ) श्रियाम् आ) श्रियि इ) उभयम्

6. श्रीशब्दस्य सम्बुद्धौ किं रूपम् ?

अ) हे श्रीः आ) हे श्रि इ) हे श्री

7. श्री+अम् - अत्र किं कार्यम्(स्त्री.) ?

अ) पूर्वरूपम् आ) पूर्वसवर्णदीर्घः इ) इयङादेशः

8. श्रीशब्दस्य आमि नदीसंज्ञा कथम्(स्त्री.) ?

अ) विकल्पेन आ) नित्यम् इ) बहुलम्

9. सुधीशब्दस्य नपुंसकलिङ्गे ङेप्रत्यये किं रूपम्?

अ) सुधिये आ) सुधिने इ) उभयम्

10. सुधीशब्दस्य नपुंसकलिङ्गे सम्बुद्धौ किं रूपम्?

अ) सुधे आ) सुधि इ) सुधी

योजयत -

1. गौरी + शस् लुक्
2. स्त्री + शस् पूर्वसवर्णदीर्घः
3. श्री + शस् विकल्पेन इयङ्
4. सुधि + अम्(नपुं.) नित्यम् इयङ्

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. श्री + आम्
2. स्त्री + आम्
3. सुधी + आम्
4. गौरी + आम्

एतेषां प्रक्रियां विलिख्य, भेदान् लिखत -

1. गौरी + आम्, स्त्री + आम्
2. गौरी + अम्, स्त्री + अम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. स्त्री + ङस्, श्री + ङस्
4. सुधी (पुं) + ङस्, सुधी + (नपुं) ङस्
5. गौरी + आम्, श्री + आम्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. श्रियः
2. सुधिनः
3. गौर्याम्
4. स्त्रीः

परियोजना -

नदी, देवी - इत्यादीनां रूपाणि लिखत।

---

1. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
2. यू स्त्र्याख्यौ नदी (1-4-3) - ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः।
3. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
4. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
5. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
6. अम्बार्थनद्योर्ह्रस्वः (7-3-107) - अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात् सम्बुद्धौ।
7. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
8. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
9. इको यणचि (7-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
10. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
11. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
12. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
13. स्त्रियाः (6-4-79) - स्त्रीशब्दस्येयङ् स्यादजादौ प्रत्यये परे।
14. वाम्शसोः (6-4-80) - अमि शसि च स्त्रिया इयङ् वा स्यात्।
15. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
16. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
17. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
18. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

19. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
20. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
21. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
22. नेयङुवङ्स्थानावस्त्री (1-4-4) - इयङुवङोः स्थितिर्ययोः तावीदूतौ नदीसंज्ञौ न स्तः, न तु स्त्री।
23. ङिति ह्रस्वश्च (1-4-6) - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।
24. वामि (1-4-5) - इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री।
25. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
26. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
27. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
28. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
29. ह्रस्वो नपुंसके प्रातिपदिकस्य (1-2-47) - क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्।
30. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
31. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
32. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
33. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
34. तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (7-1-74) - प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि।
35. इकोऽचि विभक्तौ (7-1-73) - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ।
36. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
37. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
38. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
39. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टमः पाठः - उकारान्तशब्दाः

सप्तमस्य पाठस्य पुनरावृत्तिः -

- गौरीशब्दात् सु-प्रत्यये उकारस्य अनुबन्धलोपे अवशिष्टस्य सकारस्य लोपः। औ, औट्, जस् - प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः। तस्य निषेधः भवति। अतः यणादेशः क्रियते। अमि पूर्वरूपं भवति। शसि पूर्वसवर्णदीर्घः भवति। गौरीशब्दस्य नदीसंज्ञा वर्तते। अतः नदीसंज्ञानिमित्तकानि कार्याणि भवन्ति।
- स्त्रीशब्दात् परस्य सु-प्रत्ययस्य सकारस्य लोपः भवति। स्त्रीशब्दस्य अजादौ प्रत्यये परे इयङ् आदेशः भवति। अतः औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - एतेषु प्रत्ययेषु परेषु नित्यम् इयङ्। अमि, शसि च विकल्पेन इयङ्। इयङ्-अभावे अमि पूर्वरूपम्। शसि पूर्वसवर्णदीर्घः। स्त्रीशब्दस्य नदीसंज्ञा वर्तते। अतः तन्निमित्तकानि कार्याणि भवन्ति।
- श्रीशब्दस्य अजादौ प्रत्यये परे इयङ् आदेशः भवति। श्रीशब्दः इयङ्-स्थानी नित्यस्त्रीलिङ्गश्च। अतः ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति। आमि च विकल्पेन नदीसंज्ञा भवति। नदीसंज्ञायां ङे, ङसि, ङस्, ङि प्रत्ययानाम् आट्-आगमः। आम्-प्रत्ययस्य नुट्-आगमः। ङिप्रत्ययस्य आम् आदेशश्च भवति।
- नपुंसकलिङ्गः सुधीशब्दः - नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वः भवति। सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति। औ-स्थाने शी-आदेशः भवति। जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च शि-आदेशः भवति। सुधीशब्दस्य अजादौ प्रत्यये परे इयङ्-आदेशः भवति। टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस्-प्रत्ययेषु परेषु रूपद्वयं भवति। एतेषु प्रत्ययेषु परेषु सुधीशब्दस्य विकल्पेन पुंवद्भावः भवति। अतः पुंवद्भावे इयङ्-आदेशः भवति। तदभावे वारिशब्दवत् रूपाणि भवन्ति।

प्रयोजनानि -

1. अस्मिन् पाठे शम्भुशब्दस्य रूपाणि पठामः।
2. पुंलिङ्गे क्रोष्टुशब्दस्य कानि कार्याणि भवन्तीति जानीमः।
3. धेनुशब्दस्य रूपाणि स्त्रीलिङ्गे कथं भवन्तीति पश्यामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. क्रोष्टुशब्दस्य स्त्रियां कथं रूपाणि भवन्तीति पठामः।

5. मधुशब्दस्य रूपाणि पठामः।

उकरान्तः पुंलिङ्गः शम्भुशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	शम्भु+सु(स्)→ शम्भुः	शम्भु+औ→ शम्भू	शम्भु+जस्(अस्)→ शम्भवः
द्वितीया	शम्भु+अम्→ शम्भुम्	शम्भु+औट्(औ)→ शम्भू	शम्भु+शस्(अस्)→ शम्भून्
तृतीया	शम्भु+टा(आ)→ शम्भुना	शम्भु+भ्याम्→ शम्भुभ्याम्	शम्भु+भिस्→ शम्भुभिः
चतुर्थी	शम्भु+ङे(ए)→ शम्भवे	शम्भु+भ्याम्→ शम्भुभ्याम्	शम्भु+भ्यस्→ शम्भुभ्यः
पञ्चमी	शम्भु+ङसि(अस्)→ शम्भोः	शम्भु+भ्याम्→ शम्भुभ्याम्	शम्भु+भ्यस्→ शम्भुभ्यः
षष्ठी	शम्भु+ङस्(अस्)→ शम्भोः	शम्भु + ओस्→ शम्भ्वोः	शम्भु+आम्→ शम्भूनाम्
सप्तमी	शम्भु+ङि(इ)→ शम्भौ	शम्भु+ओस्→ शम्भ्वोः	शम्भु+सुप्(सु)→ शम्भुषु
सम्बोधने	हे शम्भु+सु→ हे शम्भो!	हे शम्भु+औ→ हे शम्भू!	हे शम्भु+जस्→ हे शम्भवः!

अस्य घिसंज्ञा अस्ति।[1] घिसंज्ञानिमित्तकानि कार्याणि

प्रत्ययः	आदेशः	सामान्यं कार्यम्
टा	ना[2]	
ङि	औ	इ/उ - अ[3]
ङे, ङसि, ङस् (ङित्)		गुणः[4]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. औ-प्रत्यये, औट्-प्रत्यये च परे पूर्वसवर्णदीर्घः भवति।[5] शम्भू।
2. जसि गुणः भवति।[6] सम्बुद्धौ अपि गुणः भवति।[7] शम्भवः।
3. अमि पूर्वरूपम् एकादेशः भवति।[8] शम्भुम्।
3. घिसंज्ञानिमित्तानि कार्याणि उपरि उक्तानि।
शम्भु+टा→शम्भु+आ, शम्भुशब्दः घिसंज्ञकः। तस्मात् परस्य टा प्रत्ययस्य ना-आदेशः[9] शम्भुना।
शम्भु+ङे→शम्भु+ए,ङिति घिसंज्ञकस्य गुणः।[10]शम्भो ए→अवादेशः→शम्भवे।
4. ङसि-प्रत्यये, ङस्-प्रत्यये च गुणकरणात् परम् ओकार-अकारयोः पूर्वरूपं भवति।[11]
शम्भु+ङसि/ङस्→शम्भु+अस्→शम्भो+अस्→शम्भोस्→शम्भोर्→शम्भोः।
5. आम्-प्रत्यये नुट्-आगमः भवति।[12] उकारस्य दीर्घः अपि भवति।[13] शम्भूनाम्।
6. ओसि यणादेशः भवति।[14] शम्भ्वोः।
7. ङि-प्रत्ययस्य औ-आदेशे[15], इकारस्य अकारादेशे च कृते[16] अकार-औकारयोः वृद्धिः भवति।[17]
शम्भु + ङि→शम्भु + औ→शम्भ + औ→शम्भौ।
8. शम्भु + सुप्, अत्र सकारस्य षकारादेशः भवति। शम्भुषु।

उकारान्तः पुंलिङ्गः क्रोष्टुशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	क्रोष्टु+सु(स्)→ क्रोष्टा	क्रोष्टु+औ→ क्रोष्टारौ	क्रोष्टु+जस्(अस्)→ क्रोष्टारः
द्वितीया	क्रोष्टु+अम्→ क्रोष्टारम्	क्रोष्टु+औट्(औ)→ क्रोष्टारौ	क्रोष्टु+शस्(अस्)→ क्रोष्टून्
तृतीया	क्रोष्टु+टा(आ)→ क्रोष्ट्रा/क्रोष्टुना	क्रोष्टु+भ्याम्→ क्रोष्टुभ्याम्	क्रोष्टु+भिस्→ क्रोष्टुभिः
चतुर्थी	क्रोष्टु+ङे(ए)→ क्रोष्ट्रे/क्रोष्टवे	क्रोष्टु+भ्याम्→ क्रोष्टुभ्याम्	क्रोष्टु+भ्यस्→ क्रोष्टुभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
पञ्चमी	क्रोष्टु+ङसि(अस्)→ क्रोष्टुः/क्रोष्टोः	क्रोष्टु+भ्याम्→ क्रोष्टुभ्याम्	क्रोष्टु+भ्यस्→ क्रोष्टुभ्यः
षष्ठी	क्रोष्टु+ङस्(अस्)→ क्रोष्टुः/क्रोष्टोः	क्रोष्टु+ओस्→ क्रोष्ट्रोः/क्रोष्ट्वोः	क्रोष्टु+आम्→ क्रोष्टूनाम्
सप्तमी	क्रोष्टु+ङि(इ)→ क्रोष्टरि/क्रोष्टौ	क्रोष्टु+ओस्→ क्रोष्ट्रोः/क्रोष्ट्वोः	क्रोष्टु+सुप्(सु)→ क्रोष्टुषु
सम्बोधनम्	हे क्रोष्टु+सु→ हे क्रोष्टो!	हे क्रोष्टु+औ→ हे क्रोष्टारौ!	हे क्रोष्टु+जस्→ हे क्रोष्टारः!

1. सर्वनामस्थाने प्रत्यये(सु, औ, जस्, अम्, औट्) क्रोष्टुशब्दः तृज्वत् भवति।[18] तृच्-प्रत्ययान्तवत् भवति। तृच् इति कश्चन कृत्-प्रत्ययः। तदन्ताः यथा - कर्तृ, दातृ इत्यादयः। तद्वत् क्रोष्टुशब्दः अपि ऋकारान्तः भवति। अर्थात् क्रोष्टृ इति भवति। क्रोष्टु + सु→क्रोष्टृ + सु।
2. सुप्रत्यये परे ऋकारान्तस्य अङ्गस्य अनङ् आदेशः भवति।[19] अनङ् आदेशे अन् अवशिष्टः। सः अन्त्यस्य ऋकारस्य स्थाने भवति। क्रोष्टन् + स्
3. सर्वनामस्थानप्रत्यये परे तृजन्तस्य उपधायाः दीर्घः भवति।[20] क्रोष्टुशब्दः तृज्वत् भवतीति पूर्वं पठितम्। अतः अत्रापि उपधायाः दीर्घः भवति। क्रोष्टान् + स् हलः परस्य सुप्रत्ययस्य सकारस्य लोपः भवति।
4. प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः भवति।[21] क्रोष्टन् इति सुबन्तः। अतः पदसंज्ञा वर्तते। अतः नकारस्य लोपः भवति। क्रोष्टा इति भवति। क्रोष्टु + सु→क्रोष्टृ + सु→क्रोष्टृ + स्→क्रोष्टन् + स्→क्रोष्टान् + स्→ क्रोष्टा।
5. सर्वनामस्थाने ङि प्रत्यये च परे ऋकारान्तस्य अङ्गस्य गुणः भवति।[22] ततः उपधायाः दीर्घः।[23] क्रोष्टु + औ→क्रोष्टृ + औ→क्रोष्टर् + औ→क्रोष्टार् + औ→क्रोष्टारौ। एवं क्रोष्टारः, क्रोष्टारम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

6. शसि तु तृज्वद्भावः न भवति। अतः पूर्वसवर्णदीर्घः भवति।[24] ततः शसः सकारस्य नकारादेशः।[25]
क्रोष्टु + शस्→क्रोष्टु + अस्→क्रोष्टूस्→क्रोष्टून्।
7. टा, ङे, ङसि, ङस्, ओस्, ओस् - एतेषु प्रत्ययेषु परेषु क्रोष्टुशब्दस्य विकल्पेन तृज्वद्भावः।[26] तृज्वद्भावः भवति चेत् यणादेशः भवति। पक्षे घिसंज्ञायां शम्भुशब्दवद्रूपाणि भवन्ति। हलादौ विभक्तौ अपि शम्भुवदेव रूपाणि भवन्ति।
क्रोष्टु+टा, ङे, ओस्→क्रोष्टु+आ, ए, ओस्, यणादेशः→क्रोष्ट्रा, क्रोष्ट्रे, क्रोष्ट्रोः।
8. क्रोष्टु + ङसि/ङस् तृज्वद्भावे क्रोष्टृ + अस्, अत्र ऋकार-अकारयोः उकारः एकादेशः भवति।[27] सः रपरः भवति।[28] क्रोष्टुर् स् इति स्थितौ सकारस्य लोपः भवति।[29] क्रोष्टुर् अत्र रेफस्य विसर्गः। क्रोष्टुः।
9. आमि तृज्वद्भावः प्राप्तः। नुट्-आगमः अपि प्राप्तः। उभयोः मध्ये नुट्-आगमः एव भवति।[30] तस्मिन् परे उकारस्य दीर्घः भवति।[31]
क्रोष्टु+आम्→क्रोष्टु+नुट्+आम्→क्रोष्टु+न्+आम्→क्रोष्टू+नाम्→क्रोष्टूनाम्।
क्रोष्टु+ङि→विकल्पेन तृज्वद्भावः→क्रोष्टृ+इ→ऋकारस्य गुणः क्रोष्टर्+इ→क्रोष्टरि। अत्र सर्वत्र तृज्वद्भावे शम्भुशब्दवत् रूपाणि।
10. सम्बुद्धौ तृज्वद्भावः न भवति। अतः उकारस्य गुणः भवति।[32]



प्रत्ययः	प्रकृत्यादेशः	आगमः
सु	ऋकारस्य अनङ्, उपधादीर्घः	-
औ, जस्, अम्, औट्	ऋकारस्य गुणः, उपधादीर्घः	-
आम्	-	नुट्(न्)
ङि	गुणः	-

Digitization by eGangotri-South Center
CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

उकरान्त: स्त्रीलिङ्ग: धेनुशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	धेनु+सु(स्)→ धेनुः	धेनु+औ→ धेनू	धेनु+जस्(अस्)→ धेनवः
द्वितीया	धेनु+अम्→ धेनुम्	धेनु+औट्(औ)→ धेनू	धेनु+शस्(अस्)→ धेनूः
तृतीया	धेनु+टा(आ)→ धेन्वा	धेनु+भ्याम्→ धेनुभ्याम्	धेनु+भिस्→ धेनुभिः
चतुर्थी	धेनु+ङे(ए)→ धेन्वै/धेनवे	धेनु+भ्याम्→ धेनुभ्याम्	धेनु+भ्यस्→ धेनुभ्यः
पञ्चमी	धेनु+ङसि(अस्)→ धेन्वाः/धेनोः	धेनु+भ्याम्→ धेनुभ्याम्	धेनु+भ्यस्→ धेनुभ्यः
षष्ठी	धेनु+ङस्(अस्)→ धेन्वाः/धेनोः	धेनु+ओस्→ धेन्वोः	धेनु+आम्→ धेनूनाम्
सप्तमी	धेनु+ङि(इ)→ धेन्वाम्/धेनौ	धेनु+ओस्→ धेन्वोः	धेनु+सुप्(सु)→ धेनुषु
सम्बोधनम्	हे धेनु+सु→ हे धेनो!	हे धेनु+औ→ हे धेनू!	हे धेनु+जस्→ हे धेनवः!



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. औ, औट्, शस् प्रत्ययेषु पूर्वसवर्णदीर्घः भवति।[33] धेनू, धेनूः।
2. अमि पूर्वरूपं भवति।[34] टाप्रत्यये यणादेशः भवति।[35] धेनुम्।
3. धेनुशब्दस्य ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति।[36] नदीसंज्ञायाः अभावे घिसंज्ञा भवति।[37]
4. नदीसंज्ञायां ङे, ङसि, ङस्, ङि - प्रत्ययानाम् आट्-आगमः भवति।[38] आट्-आगमे कृते वृद्धिः भवति।[39]
   धेनु + ङे→धेनु + आट् + ङे→धेनु + आ + ए→धेनु + ऐ→धेन्वै।
   धेनु + ङसि/ङस्→धेनु + आट् + अस्→धेनु + आस्→धेन्वास्→धेन्वाः।
5. इकार-उकाराभ्यां नदीसंज्ञकाभ्याम् उत्तरस्य ङिप्रत्ययस्य आम् आदेशः भवति।[40]
   धेनु + ङि→धेनु + आट् + ङि→धेनु + आ + आम्→धेनु + आम्→धेन्वाम्।
6. आम्-प्रत्ययस्य नुट्-आगमः भवति।[41] नामि अङ्गस्य दीर्घः भवति।[42] धेनूनाम्।
7. नदीसंज्ञा-अभावपक्षे, घिसंज्ञायां ङित्सु प्रत्ययेषु परेषु गुणः भवति।[43]
   धेनु + ङे→धेनु + ए→धेनो + ए→धेनव् + ए→धेनवे।
   धेनु + ङसि/ङस्→धेनु + अस्→धेनो + अस्→धेनोस्→धेनोः।
8. घिसंज्ञायां ङिस्थाने औ-आदेशः, इकारस्य अकार-आदेशः भवति।[44]
   धेनु + ङि→धेनु + औ→धेन + औ→धेनौ।
9. सम्बुद्धौ ह्रस्वस्य गुणः भवति।[45]

नदीसंज्ञानिमित्तकानि कार्याणि

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
सु(स्)	लोपः[46]	-	
ङे, ङसि, ङस्, ङि	-	आट्(आ)[47]	वृद्धिः[48]
आम्	-	नुट्(न्)[49]	दीर्घः
ङि	आम्[50]	-	-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

घिसंज्ञानिमित्तकानि कार्याणि -

प्रत्ययः	आदेशः	सामान्यं कार्यम्
टा	ना	
ङि	औ	इ/उ-अ
ङे, ङसि, ङस्	गुणः	

उकारान्तः स्त्रीलिङ्गः क्रोष्टुशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	क्रोष्टु+सु(स्)→ क्रोष्ट्री	क्रोष्टु+औ→ क्रोष्ट्र्यौ	क्रोष्टु+जस्(अस्)→ क्रोष्ट्र्यः
द्वितीया	क्रोष्टु+अम्→ क्रोष्ट्रीम्	क्रोष्टु+औट्(औ)→ क्रोष्ट्र्यौ	क्रोष्टु+शस्(अस्)→ क्रोष्ट्रीः
तृतीया	क्रोष्टु+टा(आ)→ क्रोष्ट्र्या	क्रोष्टु+भ्याम्→ क्रोष्ट्रीभ्याम्	क्रोष्टु+भिस्→ क्रोष्ट्रीभिः
चतुर्थी	क्रोष्टु+ङे(ए)→ क्रोष्ट्र्यै	क्रोष्टु+भ्याम्→ क्रोष्ट्रीभ्याम्	क्रोष्टु+भ्यस्→ क्रोष्ट्रीभ्यः
पञ्चमी	क्रोष्टु+ङसि(अस्)→ क्रोष्ट्र्याः	क्रोष्टु+भ्याम्→ क्रोष्ट्रीभ्याम्	क्रोष्टु+भ्यस्→ क्रोष्ट्रीभ्यः
षष्ठी	क्रोष्टु+ङस्(अस्)→ क्रोष्ट्र्याः	क्रोष्टु+ओस्→ क्रोष्ट्र्योः	क्रोष्टु+आम्→ क्रोष्ट्रीणाम्
सप्तमी	क्रोष्टु+ङि(इ)→ क्रोष्ट्र्याम्	क्रोष्टु+ओस्→ क्रोष्ट्र्योः	क्रोष्टु+सुप्(सु)→ क्रोष्ट्रीषु
सम्बोधने	हे क्रोष्टु+सु→ हे क्रोष्ट्रि !	हे क्रोष्टु+औ→ हे क्रोष्ट्र्यौ !	हे क्रोष्टु+जस्→ हे क्रोष्ट्र्यः !

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. स्त्रियां क्रोष्टुशब्दस्य तृज्वद्भाव: भवति।[51] तेन क्रोष्टृ इति ऋकारान्त: भवति। अत: स्त्रियां ङीप्-प्रत्यय: भवति।[52] तेन क्रोष्ट्री इति रूपं सिध्यति। तस्य रूपाणि गौरीशब्दवत् भवन्ति।

उकारान्त: नपुंसकलिङ्ग: मधुशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मधु+सु(स्)→ मधु	मधु+औ→ मधुनी	मधु+जस्(अस्)→ मधूनि
द्वितीया	मधु+अम्→ मधु	मधु+औट्(औ)→ मधुनी	मधु+शस्(अस्)→ मधूनि
तृतीया	मधु+टा(आ)→ मधुना	मधु+भ्याम्→ मधुभ्याम्	मधु+भिस्→ मधुभि:
चतुर्थी	मधु+ङे(ए)→ मधुने	मधु+भ्याम्→ मधुभ्याम्	मधु+भ्यस्→ मधुभ्य:
पञ्चमी	मधु+ङसि(अस्)→ मधुन:	मधु+भ्याम्→ मधुभ्याम्	मधु+भ्यस्→ मधुभ्य:
षष्ठी	मधु+ङस्(अस्)→ मधुन:	मधु+ओस्→ मधुनो:	मधु+आम्→ मधूनाम्
सप्तमी	मधु+ङि(इ)→ मधुनि	मधु+ओस्→ मधुनो:	मधु+सुप्(सु)→ मधुषु
सम्बोधनम्	हे मधु+सु→ हे मधो/हे मधु!	हे मधु+औ→ हे मधुनी!	हे मधु+जस्→ हे मधूनि!

1. नपुंसकात् परयो: सु-अमो: लुक् (लोप:) भवति।[53] मधु + सु/अम्→मधु।
2. औ, औट् प्रत्यययो: शी-आदेश: भवति।[54] शकारस्य इत्संज्ञायां लोपे ईकार: अवशिष्ट:।
3. इगन्तस्य नपुंसकस्य अङ्गस्य नुम्-आगम: भवति अच्-आदौ प्रत्यये परे।[55]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मित्-आगमः स्थानिनः अन्तिमात् अचः परः भवति।[56]

मधु + औ→मधु + शी→मधु + ई→मधुन् + ई→मधुनी।

4. जस्, शस् प्रत्यययोः शि-आदेशः भवति।[57] शकारस्य इत्संज्ञायां लोपे इकारः अवशिष्टः भवति।

शि-इत्यस्य **सर्वनामस्थानम्** इति संज्ञा भवति।[58] सर्वनामस्थाने परे नुम्।

5. सर्वनामस्थाने परे नान्तस्य उपधायाः दीर्घः भवति।[59] मधूनि।
मधु + जस्/शस्→मधु + शि→मधु + इ→मधुन् + इ→मधून् + इ→मधूनि।

6. मधुशब्दात् परस्य टाप्रत्ययस्य स्थाने ना-आदेशः भवति।[60] मधुना।

7. ङे, ङसि, ङस्, ङि, ओस् - एतेषु परेषु इगन्तस्य नुम्-आगमः भवति।
मधु + ङे→मधु + ए→मधुन् + ए→मधुने। मधु + ङसि। ङस्। ङि। ओस्।
मधु+अस्, इ, ओस्, नुमागमः→मधुन्+अस्, इ, ओस्→मधुनः, मधुनि, मधुनोः।

8. आमः नुट्-आगमः प्राप्तः[61], नुम्-आगमश्च प्राप्तः।[62] तत्र नुट्-आगमः एव भवति।[63] नुटि न् अवशिष्टः। तस्मिन् परे अचः दीर्घः भवति।[64] मधु + न् + आम्→मधु + नाम्→मधूनाम्।

9. सम्बुद्धौ सोः लोपानन्तरम् अपि विकल्पेन प्रत्ययः अस्तीति मत्वा गुणः क्रियते।[65] तदा हे **मधो !** इति भवति। प्रत्ययः नास्तीति पक्षे गुणः न भवति। **हे मधु !** इति च भवति।

पाठसारः -

1. शम्भुशब्दः - औ-प्रत्यये, औट्-प्रत्यये च परे पूर्वसवर्णदीर्घः भवति। अमि पूर्वरूपं भवति। जसि गुणः भवति। सम्बुद्धौ अपि गुणः भवति। घिसंज्ञा-निमित्तकानि कार्याणि भवन्ति।
2. क्रोष्टुशब्दः - सर्वनामस्थाने प्रत्यये (सु, औ, जस्, अम्, औट्) परे क्रोष्टुशब्दः तृज्वत् भवति। सुप्रत्यये परे ऋकारान्तस्य अङ्गस्य अनङ्-आदेशः भवति। सर्वनामस्थानप्रत्यये परे तृजन्तस्य उपधायाः दीर्घः भवति। टा, ङे, ङसि, ङस्, ओस्, ङि, ओस्-एतेषु प्रत्ययेषु परेषु क्रोष्टुशब्दस्य विकल्पेन तृज्वद्भावः।
3. धेनुशब्दः - औ, औट्, शस्-प्रत्ययेषु पूर्वसवर्णदीर्घः भवति। अमि पूर्वरूपं भवति। टाप्रत्यये यणादेशः भवति। धेनुशब्दस्य ङे, ङसि, ङस्, ङि-प्रत्ययेषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

परेषु विकल्पेन नदीसंज्ञा भवति। नदीसंज्ञाया: अभावे घिसंज्ञा भवति।

4. स्त्रियां क्रोष्टुशब्दस्य तृज्वद्भाव: भवति। तेन क्रोष्टृ इति ऋकारान्त: भवति। अत: स्त्रियां ङीप्-प्रत्यय: भवति। तेन क्रोष्ट्री इति रूपं सिध्यति। तस्य रूपाणि गौरीशब्दवत् भवन्ति।

5. मधुशब्द: - नपुंसकात् परयो: सु-अमो: लुक् (लोप:) भवति। औ, औट् प्रत्यययो: शी-आदेश: भवति। इगन्तस्य नपुंसकस्य अङ्गस्य नुम्-आगम: भवति अच्-आदौ प्रत्यये परे। जस्, शस् प्रत्यययो: शि-आदेश: भवति। मधुशब्दात् परस्य टाप्रत्ययस्य स्थाने ना-आदेश: भवति। ङे, ङसि, ङस्, ङि, ओस् - एतेषु परेषु इगन्तस्य नुम्-आगम: भवति। आम् प्रत्यये नुट्-आगम: सम्बोधने उकारस्य वा गुण: भवति।

अभ्यास:

एकेन वाक्येन समाधत्त -

1. क्रोष्टुशब्द: तृज्वत् कदा भवति ?
2. ऋकारान्तस्य सुप्रत्यये किं कार्यम् ?
3. सर्वनामस्थाने परे ऋकारान्तस्य किं कार्यम् ?
4. क्रोष्टुशब्दस्य आमि किं कार्यम् ?
5. धेनुशब्दस्य नदीसंज्ञा कदा भवति ?

योग्यं समाधानं चिनुत -

1. क्रोष्टु + टा - अत्र तृज्वत्-भाव:
   अ) भवति आ) न भवति इ) विकल्पेन भवति
2. धेनु + अम् - अत्र किं कार्यम् ?
   अ) यणादेश: आ) पूर्वरूपम् इ) पूर्वसवर्णदीर्घ:
3. धेनुशब्दस्य ङेप्रत्यये किं रूपम् ?
   अ) धेन्वै आ) धेनवे इ) उभयम्
4. धेनुशब्दस्य ङिप्रत्यये का संज्ञा ?
   अ) नदीसंज्ञा आ) घिसंज्ञा इ) संज्ञाद्वयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. धेनुशब्दात् परस्य ङिप्रत्ययस्य आदेशः कः ?
अ) आम् आ) औ इ) उभयम्

6. धेनुशब्दस्य टाप्रत्यये का संज्ञा ?
अ) नदीसंज्ञा आ) घिसंज्ञा इ) न कापि संज्ञा

7. मधुशब्दस्य सम्बुद्धौ किं रूपम् ?
अ) हे मधु आ) हे मधो इ) उभयम्

8. मधु + जस् - अत्र जसः आदेशः कः ?
अ) शी आ) शि इ) न उभयम्

9. मधुशब्दस्य अजादौ प्रत्यये परे किं कार्यम् ?
अ) नुम्-आगमः आ) नुट्-आगमः इ) सुट्-आगमः

10. तृजन्तस्य सर्वनामस्थाने परे किं कार्यम् ?
अ) वृद्धिः आ) गुणः इ) उपधायाः दीर्घः

योजयत -

1. मधु + शस्	मधुनी
2. मधु + औ	पूर्वसवर्णदीर्घः
3. शम्भु + ङि	मधूनि
4. क्रोष्टु + शस्	औ-आदेशः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. क्रोष्टु + ङसि
2. शम्भु + ङसि
3. मधु + ङसि
4. धेनु + ङसि

प्रक्रियां लिखित्वा भेदान् लिखत -

1. शम्भु + अम्, मधु(नपुं) + अम्
2. शम्भु + ङस्, क्रोष्टु + ङस्
3. क्रोष्टु (पुं) + सु, क्रोष्टु (स्त्री) + सु
4. मधु + आम्, क्रोष्टु (पुं) + आम्
5. धेनु + टा, क्रोष्टु (स्त्री) + टा

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. धेनोः
2. क्रोष्टारौ
3. मधुनि
4. शम्भवे

परियोजना -

1. गुरु, भानु - इत्यादीनाम् उकारान्तानां रूपाणि लिखत।
2. लघु, तनु - इत्यादीनां उकारान्तानां नपुंसकलिङ्गे रूपाणि लिखत।

---

1. शेषो घ्यसखि (1-4-7) - अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
2. आङो नाऽस्त्रियाम् (7-3-120) - घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासञ्ज्ञा प्राचाम्।
3. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
4. घेर्ङिति (7-3-111) - घिसंज्ञकस्य ङिति सुपि गुणः स्यात्।
5. जसि च (7-3-109) - ह्रस्वान्तस्याऽङ्गस्य गुणः स्याज्जसि परे।
6. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
7. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
8. ह्रस्वस्य गुणः (7-3-108) - ह्रस्वस्य गुणः स्यात्संबुद्धौ।
9. आङो नाऽस्त्रियाम् (7-3-120) - घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासञ्ज्ञा प्राचाम्।
10. घेर्ङिति (7-3-111) - घिसंज्ञकस्य ङिति सुपि गुणः स्यात्।
11. ङसिङसोश्च (6-1-110) - एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्।
12. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
13. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
14. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
15. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
16. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
17. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
18. तृज्वत्क्रोष्टुः (7-1-95) - क्रोष्टुशब्दस्तृजन्तेन तुल्यं वर्तते असंबुद्धौ सर्वनामस्थाने परे। क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः।
19. ऋदुशनस्पुरुदंसोऽनेहसां च (7-1-94) - ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे।
20. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (6-4-11) - अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

21. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
22. ऋतो ङिसर्वनामस्थानयोः (7-3-110) - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्।
23. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (6-4-11) - अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
24. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
25. तस्माच्छसो नः पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।
26. विभाषा तृतीयादिष्वचि (7-1-97) - अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत्।
27. ऋत उत् (6-1-111) - ऋदन्तान् ङसिङसोरति परे उकार एकादेशः स्यात्। रपरत्वम्।
28. उरण् रपरः (1-1-51) - ऋस्थाने योऽण् स रपरः सन्नेव प्रवर्तते।
29. रात्सस्य (8-2-24) - रेफात् संयोगान्तस्य सस्यैव लोपः, नान्यस्य।
30. नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन
31. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
32. ऋतो ङिसर्वनामस्थानयोः (7-3-110) - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्।
33. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
34. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
35. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
36. ङिति ह्रस्वश्च (1-4-6) - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।
37. शेषो घ्यसखि (1-4-7) - अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
38. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
39. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
40. इदुद्भ्याम् (7-3-117) - नदीसंज्ञकाभ्यामिदुद्भ्यां परस्य ङेराम् स्यात्।
41. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
42. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
43. घेर्ङिति (7-3-111) - घिसंज्ञकस्य ङिति सुपि गुणः स्यात्।
44. अच्च घेः (7-3-119) - इदुद्भ्यामुत्तरस्य ङेरौत्स्याद् घेरन्तादेशश्चाकारः।
45. ह्रस्वस्य गुणः (7-3-108) - ह्रस्वस्य गुणः स्यात्संबुद्धौ।
46. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
47. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
48. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
49. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

50. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
51. स्त्रियां च (7-1-96) - स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते।
52. ऋन्नेभ्यो ङीप् (4-1-5) - ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप्स्यात्।
53. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
54. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
55. इकोऽचि विभक्तौ (7-1-73) - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ।
56. मिदचोन्त्यात्परः (1-1-47) - अचां मध्ये योऽन्त्यस्तस्मात्परस्यैवान्तावयवो मित् स्यात्।
57. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
58. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
59. सर्वनामस्थाने चाऽसंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
60. आङो नाऽस्त्रियाम् (7-3-120) - घेः परस्याङो ना स्यादस्त्रियाम्। आङिति टासञ्ज्ञा प्राचाम्।
61. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
62. इकोऽचि विभक्तौ (7-1-73) - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ।
63. नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वप्रतिषेधेन (वा. 7374) - नुम्-आगम-नुट्-आगमयोः पूर्वविप्रतिषेधेन नुट् भवति। "अचि र ऋतः" इति सूत्रेण विहितस्य नुडागमस्य च युगपत् प्राप्तौ नुट् पूर्वविप्रतिषेधेन भवति। तृज्वद्भावनुट्-आगमयोः नुट् पूर्वविप्रतिषेधेन भवति।
64. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।
65. ह्रस्वस्य गुणः (7-3-108) - ह्रस्वस्य गुणः स्यात्संबुद्धौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नवमः पाठः - ऊकारान्तशब्दाः (1)

अष्टमस्य पाठस्य पुनरावृत्तिः -

- शम्भुशब्दस्य रूपाणि पठितवन्तः। तस्य घिसंज्ञा भवति इति पठितवन्तः। अतः अस्य रूपाणि हरिशब्दवत् भवन्तीति ज्ञातवन्तः।
- क्रोष्टुशब्दस्य तृज्वद्-भावः सर्वनामस्थाने प्रत्यये नित्यं भवति इति, टा, ङे, ङसि, ङस्, ओस्, ङि, ओस् - एतेषु प्रत्ययेषु परेषु विकल्पेन तृज्वद्भावः इति पठितवन्तः।
- धेनुशब्दस्य ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति। नदीसंज्ञायाः अभावे घिसंज्ञा भवति इति ज्ञातवन्तः।
- स्त्रियां क्रोष्टुशब्दस्य तृज्वद्भावः भवति। तेन क्रोष्टृ इति ऋकारान्तः भवति। अतः स्त्रियां ङीप्-प्रत्ययः भवति। तेन क्रोष्ट्री इति रूपं सिध्यति। तस्य रूपाणि गौरीशब्दवत् भवन्तीति ज्ञातवन्तः।
- मधुशब्दस्य रूपाणि वारिशब्दवत् भवन्तीति ज्ञातवन्तः।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे वयं हूहूशब्दस्य पुंसि रूपाणि पठामः।
2. अतिचमूशब्दस्य पुंलिङ्गे रूपाणि पठामः।
3. खलपूशब्दस्य पुंसि रूपाणि पठामः।
4. स्वभूशब्दस्य रूपाणि पठामः।

ऊकारान्तः पुंलिङ्गः हूहूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	हूहू+सु(स्)→हूहूः	हूहू+औ→हूह्वौ	हूहू+जस्(अस्)→ हूह्वः
द्वितीया	हूहू+अम्→ हूहूम्	हूहू+औट्(औ)→ हूह्वौ	हूहू+शस्(अस्)→ हूहून्
तृतीया	हूहू+टा(आ)→ हूह्वा	हूहू+भ्याम्→ हूहूभ्याम्	हूहू+भिस्→ हूहूभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	हूहू+ङे(ए)→ हूह्वे	हूहू+भ्याम्→ हूहूभ्याम्	हूहू+भ्यस्→ हूहूभ्यः
पञ्चमी	हूहू+ङसि(अस्)→ हूह्वः	हूहू+भ्याम्→ हूहूभ्याम्	हूहू+भ्यस्→ हूहूभ्यः
षष्ठी	हूहू+ङस्(अस्)→ हूह्वः	हूहू+ओस्→ हूह्वोः	हूहू+आम्→ हूह्वाम्
सप्तमी	हूहू+ङि(इ)→ हूह्वि	हूहू+ओस्→ हूह्वोः	हूहू+सुप्(सु)→ हूहूषु
सम्बोधनम्	हे हूहू+सु→ हे हूहूः!	हे हूहू+औ→ हे हूह्वौ!	हे हूहू+जस्→ हे हूह्वः!

1. हूहू इति ऊकारान्तः शब्दः।
2. औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - एतेषु यणादेशः भवति।
3. अमि पूर्वरूपम्।[1]
4. शसि पूर्वसवर्णदीर्घः।[2] तदनन्तरं सकारस्य नकारादेशः।[3]
5. हूहू इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तः। अतः आमः नुट्-आगमः न भवति।

ऊकारान्तः पुंलिङ्गः अतिचमूशब्दः

चमूशब्दः ऊकारान्तः। समासात् प्राक् स्त्रियां विद्यमानः, समासवशात् पुंसि वर्तते, तथापि तस्य नदीसंज्ञा भवति।[4] अतः नदीसंज्ञानिमित्तकानि कार्याणि सर्वाणि अत्र भवन्ति।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अतिचमू+सु(स्)→ अतिचमूः	अतिचमू+औ→ अतिचम्वौ	अतिचमू+जस्(अस्)→ अतिचम्वः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
द्वितीया	अतिचमू+अम्→ अतिचमूम्	अतिचमू+औट् (औ)→अतिचम्वौ	अतिचमू+शस्(अस्)→ अतिचमून्
तृतीया	अतिचमू+टा(आ)→ अतिचम्वा	अतिचमू+भ्याम्→ अतिचमूभ्याम्	अतिचमू+भिस्→ अतिचमूभिः
चतुर्थी	अतिचमू+ङे(ए)→ अतिचम्वै	अतिचमू+भ्याम्→ अतिचमूभ्याम्	अतिचमू+भ्यस्→ अतिचमूभ्यः
पञ्चमी	अतिचमू+ङसि (अस्)→अतिचम्वाः	अतिचमू+भ्याम्→ अतिचमूभ्याम्	अतिचमू+भ्यस्→ अतिचमूभ्यः
षष्ठी	अतिचमू+ङस् (अस्)→अतिचम्वाः	अतिचमू+ओस्→ अतिचम्वोः	अतिचमू+आम्→ अतिचमूनाम्
सप्तमी	अतिचमू+ङि(इ)→ अतिचम्वाम्	अतिचमू+ओस्→ अतिचम्वोः	अतिचमू + सुप्(सु)→ अतिचमूषु
सम्बोधनम्	हे अतिचमू+सु→ हे अतिचमु !	हे अतिचमू+औ→ हे अतिचम्वौ !	हे अतिचमू+जस्→ हे अतिचम्वः !

1. अमि पूर्वरूपम्, शसि पूर्वसवर्णदीर्घः। अन्येषु अजादिषु प्रत्ययेषु यणादेशः।
2. अतिचमू + अम्→अतिचमूम्। अतिचमू + शस्→अतिचमूः।
3. अतिचमू + आ। यणादेशः→अतिचम्वा।
4. अतिचमू + ङे, ङसि, ङस्→आट् आगमः। अतिचमू आ ए अस्, वृद्धिः→ अतिचम्वै। अतिचम्वाः।
5. अतिचमू + ङि→ङिस्थाने, आम् आदेशः आट् आगमः→अतिचमू आ आम्, वृद्धिः→यणादेशः→अतिचम्वाम्।
6. अतिचमू + आम्→नुट् आगमः→अतिचमूनाम्।
7. अतिचमू + सु, सम्बुद्धौ ह्रस्वः→अतिचमू + सु, ह्रस्वात् परस्य सम्बुद्धेः हलः लोपः→हे अतिचमु !।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
ङे, ङसि, ङस्, ङि	-	आट्(आ)[5]	वृद्धिः[6]
आम्	-	नुट्(न्)[7]	
ङि	आम्[8]	-	-
सम्बुद्धौ	ह्रस्वः	-	-

ऊकारान्तः पुंलिङ्गः खलपूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	खलपू+सु(स्)→ खलपूः	खलपू+औ→ खलप्वौ	खलपू+जस्(अस्)→ खलप्वः
द्वितीया	खलपू+अम्→ खलप्वम्	खलपू+औट् (औ)→खलप्वौ	खलपू+शस्(अस्)→ खलप्वः
तृतीया	खलपू+टा(आ)→ खलप्वा	खलपू+भ्याम्→ खलपूभ्याम्	खलपू+भिस्→ खलपूभिः
चतुर्थी	खलपू+ङे(ए)→ खलप्वे	खलपू+भ्याम्→ खलपूभ्याम्	खलपू + भ्यस्→ खलपूभ्यः
पञ्चमी	खलपू+ङसि (अस्)→खलप्वः	खलपू+भ्याम्→ खलपूभ्याम्	खलपू+भ्यस्→ खलपूभ्यः
षष्ठी	खलपू+ङस् (अस्)→खलप्वः	खलपू+ओस्→ खलप्वोः	खलपू+आम्→ खलप्वाम्
सप्तमी	खलपू+ङि(इ)→ खलप्वि	खलपू+ओस्→ खलप्वोः	खलपू+सुप्(सु)→ खलपूषु
सम्बोधनम्	हे खलपू+सु→ हे खलपूः!	हे खलपू+औ→ हे खलप्वौ!	हे खलपू+जस्→ हे खलप्वः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. खलपू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गमपि। अतः अचि सर्वत्र यणादेशः एव भवति।[9]
2. औ, औट्, जस् - प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः। परन्तु दीर्घात् इचि, जसि च परे पूर्वसवर्णदीर्घस्य निषेधः भवति।[10] उवङादेशः प्राप्तः, तं बाधित्वा यणादेशः। खलप्वौ, खलप्वः।
3. अमि पूर्वरूपं प्राप्तम्[11] परन्तु तद् बाधित्वा धातोः ऊकारस्य उवङादेशः प्राप्तः। तं बाधित्वा यणादेशः एव भवति। खलपू + अम्→खलप्वम्।
4. शसि पूर्वसवर्णदीर्घः प्राप्तः।[12] तं बाधित्वा उवङादेशः प्राप्तः। तं बाधित्वा यणादेशः→खलप्वः।
5. खलपू इति न ह्रस्वान्तः, नदीसंज्ञकः न, नापि आबन्तोऽपि न। अतः आमः नुट्-आगमः न भवति। खलप्वाम्।
6. ङिप्रत्यये यणादेशः एव। खलप्वि।

खलपू + टा, ङ, ङे, ङसि, ओस्, आम्, ङि, ओस् - एतेषु धातोः ऊकारस्य अचि उवङादेशः प्राप्तः। तं बाधित्वा यणादेशः विधीयते। खल्प्वा, खल्प्वे, खल्प्वः, खल्प्वोः, खल्प्वाम्, खलप्वि।

ऊकारान्तः पुंलिङ्गः स्वभूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	स्वभू+सु(स्)→ स्वभूः	स्वभू+औ→ स्वभुवौ	स्वभू+जस्(अस्)→ स्वभुवः
द्वितीया	स्वभू+अम्→ स्वभुवम्	स्वभू+औट्(औ)→ स्वभुवौ	स्वभू+शस्(अस्)→ स्वभुवः
तृतीया	स्वभू+टा(आ)→ स्वभुवा	स्वभू+भ्याम्→ स्वभूभ्याम्	स्वभू+भिस्→ स्वभूभिः
चतुर्थी	स्वभू+ङे(ए)→ स्वभुवे	स्वभू+भ्याम्→ स्वभूभ्याम्	स्वभू+भ्यस्→ स्वभूभ्यः
पञ्चमी	स्वभू+ङसि (अस्)→स्वभुवः	स्वभू+भ्याम्→ स्वभूभ्याम्	स्वभू+भ्यस्→ स्वभूभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
षष्ठी	स्वभू+ङस्(अस्)→ स्वभुवः	स्वभू+ओस्→ स्वभुवोः	स्वभू+आम्→ स्वभुवाम्
सप्तमी	स्वभू+ङि(इ)→ स्वभुवि	स्वभू+ओस्→ स्वभुवोः	स्वभू+सुप्(सु)→ स्वभूषु
सम्बोधनम्	हे स्वभू+सु→ हे स्वभूः!	हे स्वभू+औ→ हे स्वभुवौ!	हे स्वभू+जस्→ हे स्वभुवः!

1. स्वभू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्र अचि यणादेशः प्राप्तः।[13] परन्तु तस्य निषेधः विधीयते।[14]
2. धातोः उ/ऊकारस्य अच्-आदौ प्रत्यये परे उवङ्-आदेशः भवति।[15] उवङ्-आदेशे उव् इति अवशिष्टः भवति। अयम् अन्त्यस्य उ/ऊकारस्य स्थाने भवति। स्वभू + औ→स्वभुव् + औ→स्वभुवौ।
3. औ, औट्, जस्-प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः।[16] तस्य निषेधः भवति।[17] यणादेशः प्राप्तः[18], तस्यापि निषेधः विधीयते।[19] अतः उवङ्-आदेशः एव भवति।[20] स्वभुवः।
4. अमि पूर्वरूपं प्राप्तम्।[21] तद् बाधित्वा यणादेशः प्राप्तः।[22] तस्य निषेधः कृतः[23] अतः उवङ्-आदेशः भवति।[24] स्वभू + अम्→स्वभुवम्।
5. शसि पूर्वसवर्णदीर्घः प्राप्तः।[25] तं बाधित्वा यणादेशः प्राप्तः।[26] तस्य निषेधः भवति।[27] अतः उवङ्-आदेशः भवति।[28] स्वभू + शस्→स्वभुवः।
स्वभू + टा, ङे, ङसि, ङस्, ओस्, ङि, आम् - अत्र सर्वत्र अचि उवङादेशः प्राप्तः। तं बाधित्वा यणादेशः प्राप्तः। यणादेशस्य निषेधः। अतः उवङ् स्वभुवा, स्वभुवे, स्वभुवः, स्वभुवोः, स्वभुवाम्, स्वभुवि।
6. स्वभू इति न ह्रस्वान्तः, नदीसंज्ञकः न, आबन्तोऽपि न। अतः आमः नुट्-आगमः न भवति। स्वभू + आम्। यणादेशं बाधित्वा उवङादेशः→स्वभुवाम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठसार: -

1. हूहू इति ऊकारान्तः शब्दः। औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - एतेषु यणादेशः भवति। अमि पूर्वरूपम्। शसि पूर्वसवर्णदीर्घः।
2. चमूशब्दः ऊकारान्तः। समासात् प्राक् स्त्रियां विद्यमानः, समासवशात् पुंसि वर्तते। तथापि तस्य नदीसंज्ञा भवति। अतः नदीसंज्ञानिमित्तकानि कार्याणि सर्वाणि अत्र भवन्ति।
3. खलपू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ईकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गमपि। अतः अचि सर्वत्र यणादेशः भवति।
4. स्वभू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्रापि अचि यणादेशः प्राप्तः। परन्तु तस्य निषेधः विधीयते। धातोः उ/ऊकारस्य अच्-आदौ प्रत्यये परे उवङ्-आदेशः भवति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. हूहूशब्दस्य यणादेशः केषु प्रत्ययेषु भवति?
2. अतिचमूशब्दे चमूशब्दस्य कथं नदीसंज्ञा?
3. खलपूशब्दस्य यणादेशः कदा भवति?
4. स्वभूशब्दस्य अजादिषु प्रत्ययेषु किं कार्यम्?
5. अतिचमूशब्दस्य सम्बुद्धौ किं कार्यं भवति?

योग्यं समाधानं चिनुत -

1. हूहू + अम् - किं रूपम्?
   अ) हूहूम् आ) हूह्वम् इ) हूहुवम्
2. हूहूशब्दस्य सम्बुद्धौ किं रूपम्?
   अ) हे हूहो आ) हे हूहूः इ) हे हूहु
3. अतिचमू + ङि - किं रूपम्?
   अ) अतिचम्वाम् आ) अतिचम्वि इ) अतिचमुवि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. अतिचमू + टा - किं रूपम्?
   अ) अतिचमुना आ) अतिचम्वा इ) उभयम्
5. अतिचमूशब्दस्य सम्बुद्धौ किं रूपम्?
   अ) हे अतिचमु आ) हे अतिचमूः इ) हे अतिचमू
6. खलपू + ङस् - किं रूपम्?
   अ) खलप्वः आ) खलपुवः इ) उभयम्
7. खलपूशब्दस्य सम्बुद्धौ किं रूपम्?
   अ) हे खलपूः आ) हे खलपुः इ) हे खलपु
8. खलपू + टा - किं रूपम्?
   अ) खलप्वा आ) खलपुना इ) खलपुवा
9. स्वभू + ङि - किं रूपम्?
   अ) स्वभ्वि आ) स्वभुवि इ) स्वभ्वाम्
10. स्वभूशब्दस्य सम्बुद्धौ किं रूपम्?
   अ) हे स्वभूः आ) हे स्वभू इ) हे स्वभु

योजयत -

1. खलपू + ङे	पूर्वसवर्णदीर्घः
2. अतिचमू + ङे	उवङ्-आदेशः
3. स्वभू + ङे	आट्-आगमः
4. हूहू + शस्	यण्-आदेशः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. अतिचमू + ङसि
2. स्वभू + ङसि
3. हूहू + ङसि
4. खलपू + ङसि

प्रक्रियां लिखित्वा, भेदान् दर्शयत -

1. अतिचमू + अम्, खलपू + अम्
2. खलपू + ङि, स्वभू + ङि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. हूहू + ङे, अतिचमू + ङे
4. खलपू + ङसि, हूहू + ङसि
5. अतिचमू + आम्, स्वभू + आम्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. खलप्वे
2. अतिचम्वै
3. स्वभुवे
4. हूह्वे

परियोजना -

1. सुलूशब्दस्य पुंलिङ्गे रूपाणि लिखत।
2. स्वयम्भूशब्दस्य पुंलिङ्गे रूपाणि लिखत।

---

1. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
2. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
3. तस्माच्छसो नः पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।
4. प्रथमलिङ्गग्रहणं च (वा) पूर्वं स्त्र्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः।
5. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
6. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
7. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
8. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
9. ओः सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
10. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
11. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
12. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
13. ओः सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
14. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
15. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

16. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
17. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयो: पूर्वसवर्णदीर्घो न स्यात्।
18. ओ: सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
19. न भूसुधियो: (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
20. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातो: "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे। "ङिच्च" (सू. 43) इत्यन्तादेश:।
21. अमि पूर्व: (6-1-107) - अकोऽम्यचि परत: पूर्वरूपमेकादेश: स्यात्।
22. ओ: सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्याऽनेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
23. न भूसुधियो: (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
24. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातो: "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
25. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
26. ओ: सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
27. न भूसुधियो: (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
28. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातो: "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दशमः पाठः - ऊकारान्तशब्दाः(2)

नवमस्य पाठस्य पुनरावृत्तिः -

1. हूहू इति ऊकारान्तः शब्दः। औ, जस्, औट्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - एतेषु यणादेशः भवति। अमि पूर्वरूपम् एकादेशः। शसि पूर्वसवर्णदीर्घः।
2. चमूशब्दः ऊकारान्तः। समासात् प्राक् स्त्रियां विद्यमानः, समासवशात् पुंसि वर्तते। तथापि तस्य नदीसंज्ञा भवति। अतः नदीसंज्ञानिमित्तकानि कार्याणि सर्वाणि अत्र भवन्ति।
3. खलपू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गमपि। अतः अचि सर्वत्र यणादेशः एव भवति।
4. स्वभू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्रापि अचि यणादेशः प्राप्तः, परन्तु तस्य निषेधः विधीयते। धातोः उ/ऊकारस्य अच्-आदौ प्रत्यये परे उवङ्-आदेशः भवति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे वयं वर्षाभूशब्दस्य पुंलिङ्गे रूपाणि पठामः।
2. ऊकारान्तस्य स्त्रीलिङ्गस्य वधूशब्दस्य रूपाणि पठामः।
3. भ्रूशब्दस्य स्त्रियां रूपाणि पठामः।
4. स्वयम्भूशब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
5. सुलूशब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।

ऊकारान्तः पुंलिङ्गः वर्षाभूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	वर्षाभू+सु(स्)→ वर्षाभूः	वर्षाभू+औ→ वर्षाभ्वौ	वर्षाभू+जस्(अस्)→ वर्षाभ्वः
द्वितीया	वर्षाभू+अम्→ वर्षाभ्वम्	वर्षाभू+औट्(औ)→ वर्षाभ्वौ	वर्षाभू+शस्(अस्)→ वर्षाभ्वः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	वर्षाभू+टा(आ)→ वर्षाभ्वा	वर्षाभू+भ्याम्→ वर्षाभूभ्याम्	वर्षाभू+भिस्→ वर्षाभूभिः
चतुर्थी	वर्षाभू+ङे(ए)→ वर्षाभ्वे	वर्षाभू+भ्याम्→ वर्षाभूभ्याम्	वर्षाभू+भ्यस्→ वर्षाभूभ्यः
पञ्चमी	वर्षाभू+ङसि(अस्)→ वर्षाभ्वः	वर्षाभू+भ्याम्→ वर्षाभूभ्याम्	वर्षाभू+भ्यस्→ वर्षाभूभ्यः
षष्ठी	वर्षाभू+ङस्(अस्)→ वर्षाभ्वः	वर्षाभू+ओस्→ वर्षाभ्वोः	वर्षाभू+आम्→ वर्षाभ्वाम्
सप्तमी	वर्षाभू+ङि(इ)→ वर्षाभ्वि	वर्षाभू+ओस्→ वर्षाभ्वोः	वर्षाभू+सुप्(सु)→ वर्षाभूषु
सम्बोधनम्	हे वर्षाभू+सु→ हे वर्षाभूः!	हे वर्षाभू+औ→ हे वर्षाभ्वौ!	हे वर्षाभू+जस्→ हे वर्षाभ्वः!

1. वर्षाभू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते, ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्र अचि यणादेशः प्राप्तः[1], तस्य निषेधः विधीयते।[2] तं निषेधमपि बाधित्वा अच्-आदौ सुपि वर्षाभूशब्दस्य यणादेशः अन्येन विधीयते।[3]

2. वर्षाभू + औ→यण् प्राप्तः, तं बाधित्वा पूर्वसवर्णदीर्घः प्राप्तः, दीर्घात् परः औ अतः पूर्वसवर्णदीर्घस्य निषेधः। धातोः ऊकारस्य अचि उवङादेशः प्राप्तः, तं बाधित्वा अजादौ सुपि यणादेशः - वर्षाभ्वौ। जसि, औटि, शसि च एवमेव प्रक्रिया। वर्षाभ्वौ, वर्षाभ्वः, वर्षाभ्वः।

3. वर्षाभू + अम्, पूर्वरूपं प्राप्तम्। तद् बाधित्वा अजादौ सुपि यणादेशः। वर्षाभ्वम्।

4. वर्षाभू + टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - अत्र वस्तुतः यणादेशः प्राप्तः। तं बाधित्वा धातोः ऊकारस्य अचि उवङादेशः प्राप्तः। तं बाधित्वा अजादौ सुपि यणादेशः। वर्षाभ्वा, वर्षाभ्वे-इत्यादीनि रूपाणि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऊकारान्तः स्त्रीलिङ्गः वधूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	वधू+सु(स्)→ वधूः	वधू+औ→ वध्वौ	वधू+जस्(अस्)→ वध्वः
द्वितीया	वधू+अम्→ वधूम्	वधू+औट्(औ)→ वध्वौ	वधू+शस्(अस्)→ वधूः
तृतीया	वधू+टा(आ)→ वध्वा	वधू+भ्याम्→ वधूभ्याम्	वधू+भिस्→ वधूभिः
चतुर्थी	वधू+ङे(ए)→ वध्वै	वधू+भ्याम्→ वधूभ्याम्	वधू+भ्यस्→ वधूभ्यः
पञ्चमी	वधू+ङसि(अस्)→ वध्वाः	वधू+भ्याम्→ वधूभ्याम्	वधू+भ्यस्→ वधूभ्यः
षष्ठी	वधू+ङस्(अस्)→ वध्वाः	वधू+ओस्→ वध्वोः	वधू+आम्→ वधूनाम्
सप्तमी	वधू+ङि(इ)→ वध्वाम्	वधू+ओस्→ वध्वोः	वधू+सुप्(सु)→ वधूषु
सम्बोधनम्	हे वधू+सु→ हे वधु !	हे वधू+औ→ हे वध्वौ !	हे वधू+जस्→ हे वध्वः !

1. वधूशब्दात् सु-प्रत्यये उकारस्य अनुबन्धलोपः। सस्य रुत्वे, विसर्गे च वधूः।
2. वधूशब्दस्य नदीसंज्ञा वर्तते।[4] अतः नदीसंज्ञानिमित्तकानि कार्याणि भवन्ति।
3. नदीसंज्ञानिमित्तकानि कार्याणि -

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
ङे, ङसि, ङस्, ङि	-	आट्(आ)[5]	वृद्धिः[6]
आम्	-	नुट्(न्)[7]	
ङि	आम्[8]	-	-
सम्बुद्धौ	ह्रस्वः[9]	-	-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. औ, औट्, जस् - प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः।[10] तस्य निषेधः भवति।[11] अतः यणादेशः क्रियते।[12] वधू + औ/औट्/जस् वध्वौ, वध्वः।

5. अमि पूर्वरूपं भवति।[13] शसि पूर्वसवर्णदीर्घः भवति।[14]

वधू + अम्→वधूम्/वधू + शस्→वधूः। वधू + आ→वध्वा।

वधू + ङे, ङसि, ङस् - आट् आगमः, वधू + आ + ए अस् अस्, वृद्धिः→वध्वै, वध्वः।

वधू + आम् नदीसंज्ञायां नुट्→वधूनाम्, दीर्घः→वधूनाम्।

वधू + ङि→ङिस्थाने आम्। आट् आगमः→वधू+आ+आम्, वृद्धिः→वध्वाम्।

ऊकारान्तः स्त्रीलिङ्गः भ्रूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	भ्रू+सु(स्)→ भ्रूः	भ्रू+औ→ भ्रुवौ	भ्रू+जस्(अस्)→ भ्रुवः
द्वितीया	भ्रू+अम्→ भ्रुवम्	भ्रू+औट्(औ)→ भ्रुवौ	भ्रू+शस्(अस्)→ भ्रुवः
तृतीया	भ्रू+टा(आ)→ भ्रुवा	भ्रू+भ्याम्→ भ्रूभ्याम्	भ्रू+भिस्→ भ्रूभिः
चतुर्थी	भ्रू+ङे(ए)→ भ्रुवै/भ्रुवे	भ्रू+भ्याम्→ भ्रूभ्याम्	भ्रू+भ्यस्→ भ्रूभ्यः
पञ्चमी	भ्रू+ङसि(अस्)→ भ्रुवाः/भ्रुवः	भ्रू+भ्याम्→ भ्रूभ्याम्	भ्रू+भ्यस्→ भ्रूभ्यः
षष्ठी	भ्रू+ङस्(अस्)→ भ्रुवाः/भ्रुवः	भ्रू+ओस्→ भ्रुवोः	भ्रू+आम्→ भ्रूणाम्/ भ्रुवाम्
सप्तमी	भ्रू+ङि(इ)→ भ्रुवाम्/ भ्रुवि	भ्रू+ओस्→ भ्रुवोः	भ्रू+सुप(सु)→ भ्रूषु
सम्बोधने	हे भ्रू+सु→हे भ्रूः!	हे भ्रू+औ→हे भ्रुवौ!	हे भ्रू+जस्→हे भ्रुवः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

भ्रू + औ/औट्/जस्, भ्रू + औ/अस्, पूर्वसवर्णदीर्घः प्राप्तः। तस्य निषेधः। अचि उवङादेशः→भ्रुव् + औ/अस्→भ्रुवौ/भ्रुवः।

1. भ्रूशब्दस्य अजादौ प्रत्यये परे उवङ्-आदेशः भवति।[15]



2. भ्रूशब्दः उवङ्-स्थानी। अतः ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति।[16]

3. आमि विकल्पेन नदीसंज्ञा भवति।[17] नदीसंज्ञायां नुट्-आगमः भवति।[18] पक्षे ऊकारस्य उवङ्।

4. विकल्पेन नदीसंज्ञायां ङे, ङसि, ङस्, ङि प्रत्ययानाम् आट्-आगमः। आम्-प्रत्ययस्य नुट्-आगमश्च। ङिप्रत्ययस्य आम्-आदेशश्च भवति। नदीसंज्ञायाः अभावे ऊकारस्य उवङ्आदेशः।

नदीसंज्ञायाम्- भ्रू + ङे→भ्रू + ए→भ्रुव् + ए→भ्रुव् + आट् + ए→भ्रुव् + आ + ए→भ्रुव् + ऐ→भ्रुवै।

नदीसंज्ञाऽभावपक्षे - भ्रू + ङे→भ्रू + ए→भ्रुव् + ए→भ्रुवे।

5. भ्रू + ङसि/ङस्→नदीसंज्ञायाम् आट् आगमः→भ्रू आ अस्→वृद्धिः→भ्रू आः→उवङ्→भ्रुवाः। नदीसंज्ञायाः अभावे→भ्रुवः।

6. भ्रू + आम्, नदीसंज्ञायां नुट्→भ्रू + न् + आम्, नस्य णत्वम्→भ्रूणाम्, नदीसंज्ञायाः अभावे नुट् न भवति, अजादौ उवङादेशः→भ्रुवाम्।

7. भ्रु + ङि→नदीसंज्ञायां ङेः आम्→भ्रू + आम्, आट् आगमः→वृद्धिः→भ्रू + आम्→उवङादेशः→भ्रुवाम्। नदीसंज्ञायाः अभावे→भ्रुवि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	आदेशः	आगमः	सामान्यकार्यम्
ङे, ङसि, ङस्, ङि	-	आट्(आ)[19]	वृद्धिः[20]
आम्	-	नुट्(न)[21]	
ङि	आम्[22]	-	-

ऊकारान्तः स्त्रीलिङ्गः स्वयम्भूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	स्वयम्भू+सु(स्)→ स्वयम्भूः	स्वयम्भू+औ→ स्वयम्भुवौ	स्वयम्भू+जस(अस्)→ स्वयम्भुवः
द्वितीया	स्वयम्भू+अम्→ स्वयम्भुवम्	स्वयम्भू+औट् (औ)→स्वयम्भुवौ	स्वयम्भू+शस्(अस्)→ स्वयम्भुवः
तृतीया	स्वयम्भू+टा(आ)→ स्वयम्भुवा	स्वयम्भू+भ्याम्→ स्वयम्भूभ्याम्	स्वयम्भू+भिस्→ स्वयम्भूभिः
चतुर्थी	स्वयम्भू+ङे(ए)→ स्वयम्भुवे	स्वयम्भू+भ्याम्→ स्वयम्भूभ्याम्	स्वयम्भू+भ्यस्→ स्वयम्भूभ्यः
पञ्चमी	स्वयम्भू+ङसि (अस्)→स्वयम्भुवः	स्वयम्भू+भ्याम्→ स्वयम्भूभ्याम्	स्वयम्भू+भ्यस्→ स्वयम्भूभ्यः
षष्ठी	स्वयम्भू+ङस् (अस्)→स्वयम्भुवः	स्वयम्भू+ओस्→ स्वयम्भुवोः	स्वयम्भू+आम्→ स्वयम्भुवाम्
सप्तमी	स्वयम्भू+ङि(इ)→ स्वयम्भुवि	स्वयम्भू+ओस्→ स्वयम्भुवोः	स्वयम्भू+सुप्(सु)→ स्वयम्भूषु
सम्बोधनम्	हे स्वयम्भू+सु→ हे स्वयम्भूः!	हे स्वयम्भू+औ→ हे स्वयम्भुवौ!	हे स्वयम्भू+जस्→ हे स्वयम्भुवः!

स्वयम्भूशब्दः पुंवत् भवति। अयं नित्यस्त्रीलिङ्गशब्दः नास्ति। अतः नदीसंज्ञा न भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. स्वयम्भू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्र अचि यणादेशः प्राप्तः।[23] परन्तु तस्य निषेधः विधीयते।[24]

2. धातोः उ/ऊकारस्य अच्-आदौ प्रत्यये परे उवङ्-आदेशः भवति।[25] उवङ्-आदेशे उव् इति अवशिष्टः भवति। अयम् अन्त्यस्य उ/ऊकारस्य स्थाने भवति। स्वयम्भू + औ→स्वयम्भुव् + औ→स्वयम्भुवौ।

3. औ, औट्, जस्-प्रत्ययेषु पूर्वसवर्णदीर्घः प्राप्तः।[26] तस्य निषेधः भवति।[27] यणादेशः प्राप्तः।[28] तस्यापि निषेधः विधीयते।[29] अतः उवङ्-आदेशः एव भवति।[30]

4. अमि पूर्वरूपं प्राप्तम्[31], तद् बाधित्वा यणादेशः प्राप्तः[32], तस्य निषेधः कृतः।[33] अतः उवङ्-आदेशः भवति।[34] स्वयम्भू+अम्, स्वयम्भुव+अम्→स्वयम्भुवम्।

5. शसि पूर्वसवर्णदीर्घः प्राप्तः।[35] तं बाधित्वा यणादेशः प्राप्तः।[36] तस्य निषेधः भवति।[37] अतः उवङ्-आदेशः भवति।[38] स्वयम्भू + शस्, स्वयम्भू + अस्→ स्वयम्भुव् + अस्→स्वयम्भुवः।

6. स्वयम्भू इति न ह्रस्वान्तः, नदीसंज्ञकः न, आबन्तोऽपि न। अतः आमः नुट्-आगमः न भवति।

7. स्वयम्भू + टा, ङे, ङसि, ङस्, आस्, आम्, ङि प्रत्ययेषु यणादेशः प्राप्तः, तस्य निषेधः। अतः उवङादेशः। स्वयम्भुव् + आ, ए, अस्, ओस्, आम्, इ। स्वयम्भुवा, स्वयम्भुवे, स्वयम्भुवः, स्वयम्भुवोः, स्वयम्भुवाम्, स्वयम्भुवि।

ऊकारान्तः नपुंसकलिङ्गः सुलूशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सुलू+सु(स्)→ सुलु	सुलू+औ→ सुलुनी	सुलू+जस्(अस्)→ सुलूनि
द्वितीया	सुलू+अम्→ सुलु	सुलू+औट्(औ)→ सुलुनी	सुलू+शस्(अस्)→ सुलूनि
तृतीया	सुलू+टा(आ)→ सुल्वा/सुलुना	सुलू+भ्याम्→ सुलुभ्याम्	सुलू+भिस्→ सुलुभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	सुलू+ङे(ए)→ सुल्वे/सुलुने	सुलू+भ्याम्→ सुलुभ्याम्	सुलू+भ्यस्→ सुलुभ्यः
पञ्चमी	सुलू+ङसि(अस्)→ सुल्वः/सुलुनः	सुलू+भ्याम्→ सुलुभ्याम्	सुलू+भ्यस्→ सुलुभ्यः
षष्ठी	सुलू+ङस्(अस्)→ सुल्वः/सुलुनः	सुलू+ओस्→ सुल्वोः/सुलुनोः	सुलू+आम्→ सुल्वाम्/सुलूनाम्
सप्तमी	सुलू+ङि(इ)→ सुल्वि/सुलुनि	सुलू+ओस्→ सुल्वोः/सुलुनोः	सुलू+सुप्(सु)→ सुलुषु
सम्बोधनम्	हे सुलू+सु→ हे सुलो!/हे सुलु!	हे सुलू+औ→ हे सुलुनी!	हे सुलू+जस्→ हे सुलूनि!

1. ऊकारान्तस्य सुलूशब्दस्य नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वः भवति।[39]
2. सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति।[40] सुलु। औ-स्थाने शी-आदेशः भवति।[41] जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च शि-आदेशः भवति।[42] सुलु + औ औट्→सुलु + औ→सुलु + शी→सुलु + ई→इगन्तस्य नुम्→ सुलुन् + ई→सुलुनी।

   सुलु + जस् शस्→सुलु + शि→सुलु इ→नुम् - सुलुन् + इ। नान्तस्य उपधायाः दीर्घः→ सुलून् + इ सुलूनि।
3. अजादौ प्रत्यये परे यण्-आदेशः भवति।[43]
4. टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु परेषु रूपद्वयं भवति। एतेषु प्रत्ययेषु परेषु सुलूशब्दस्य विकल्पेन पुंवद्भावः भवति।[44] अतः पुंवद्भावे यण्-आदेशः भवति। तदभावे वारिशब्दवत् प्रक्रिया भवति।

   पुंवद्-भावः - पुलिङ्गवत् कार्याणि भवन्ति।

   पुंवद्भावे - सुलू + ङे→सुलु + ए→सुलुव् + ए→सुल्वे। सुल्वः इत्यादि। पुंवद्भाव-अभावपक्षे - सुलू + ङे→सुलु + ए→सुलुन् + ए→सुलुने। सुलुनः इत्यादि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. पुंवद्भाव-अभावे प्रातिपदिकस्य इगन्तत्वात् अजादौ प्रत्यये परे नुम्-आगमः। आमः तु नुट्-आगमः।

पाठसारः -

1. वर्षाभू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्र अचि यणादेशः प्राप्तः। तस्य निषेधः विधीयते। तं निषेधमपि बाधित्वा अच्-आदौ सुपि वर्षाभूशब्दस्य यणादेशः विधीयते।
2. वधूशब्दस्य नदीसंज्ञा वर्तते। अतः नदीसंज्ञानिमित्तकानि कार्याणि भवन्ति। औ, औट्, जस् - प्रत्ययेषु यणादेशः क्रियते।
3. भ्रूशब्दस्य अजादौ प्रत्यये परे उवङ्-आदेशः भवति। भ्रूशब्दः उवङ्-स्थानी। अतः ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति। आमि च विकल्पेन नदीसंज्ञा भवति।
4. स्वयम्भू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्र अचि यणादेशः प्राप्तः। परन्तु तस्य निषेधः विधीयते। अतः धातोः उ/ऊकारस्य अच्-आदौ प्रत्यये परे उवङ्-आदेशः भवति।
6. सुलूशब्दः - नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वः भवति। सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति। औ-स्थाने शी-आदेशः भवति। जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च शि-आदेशः भवति। सुलूशब्दस्य अजादौ प्रत्यये परे यण्-आदेशः भवति। टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु परेषु विकल्पेन पुंवद्भावः भवति। अतः पुंवद्भावे यण्-आदेशः भवति। तदभावे मधुशब्दवत् प्रक्रिया भवति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. वर्षाभूशब्दस्य अजादौ प्रत्यये किं कार्यम्?
2. वधूशब्दस्य प्रथमैकवचने रूपं किम्? तत्र किं कार्यं भवति?
3. भ्रूशब्दस्य नदीसंज्ञा कदा भवति? कथं भवति?
4. स्वयम्भूशब्दस्य अजादौ प्रत्यये किं कार्यम्?
5. सुलूशब्दस्य पुंवद्भावः कदा भवति?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योग्यं चिनुत -

1. वर्षाभू + शस् - किं रूपम्?
   अ) वर्षाभू: आ) वर्षाभ्वः इ) वर्षाभुवः
2. वर्षाभू + ओस् - किं कार्यम्?
   अ) यणादेशः आ) उवङ्-आदेशः इ) न उभयम्
3. वधूशब्दस्य नदीसंज्ञा....
   अ) नित्यं भवति आ) न भवति इ) वा भवति
4. वधू + अम् - किं रूपम्?
   अ) वध्वम् आ) वधूम् इ) वधुम्
5. भ्रू + आम् अत्र - नदीसंज्ञा...
   अ) नित्यं भवति आ) वा भवति इ) न भवति
6. भ्रू + ङे किं - रूपम्?
   अ) भ्रुवे आ) भ्रुवै इ) उभयम्
7. स्वयम्भू + शस् - किं रूपम्?
   अ) स्वयम्भून् आ) स्वयम्भू: इ) स्वयम्भुवः
8. स्वयम्भू + ओस् - किं रूपम्?
   अ) स्वयम्भ्वोः आ) स्वयम्भुवोः इ) उभयम्
9. सुलूशब्दस्य सम्बुद्धौ किं रूपम्?
   अ) हे सुलो आ) हे सुलु अ) उभयम्
10. सुलू + ओस् - किं रूपम्?
   अ) सुल्वोः आ) सुलुनोः इ) उभयम्

योजयत -

1. वर्षाभू + ङि	वा पुंवद्भावः
2. वधू + ङि	वा नदीसंज्ञा
3. भ्रू + ङि	यणादेशः
4. स्वयम्भू + ङि	आम्-आदेशः
5. सुलू + ङि	उवङ्-आदेशः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. वर्षाभू + ओस्
2. वधू + ओस्
3. सुलू + ओस्
4. स्वयम्भू + ओस्
5. भ्रू + ओस्

प्रक्रियां लिखित्वा भेदान् बोधयत -

1. वधू + ङस्, भ्रू + ङस्
2. भ्रू + ङे, स्वयम्भू + ङे
3. वर्षभू + अम्, वधू + अम्
4. स्वयम्भू + अम्, भ्रू + अम्
5. वधू + अम्, भ्रू + अम्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. सुलुने
2. वध्वै
3. भ्रुवे
4. वर्षाभ्वे

परियोजना -

वर्षाभूशब्दवत् दृन्भू, करभू, पुनर्भू शब्दानां रूपाणि लिखत।

---

1. ओः सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
2. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
3. वर्षाभ्वश्च (6-4-84) - अस्योवर्णस्य यण् स्यादचि सुपि।
4. यू स्त्र्याख्यौ नदी (1-4-3) - ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः।
5. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
6. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
7. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
9. अम्बार्थनद्योर्ह्रस्वः (7-3-107) - अम्बार्थानां नद्यन्तानां च ह्रस्वः स्यात्संबुद्धौ।
10. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
11. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
12. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
13. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
14. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
15. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
16. ङिति ह्रस्वश्च (1-4-6) - इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ ह्रस्वौ च इ-उवर्णौ स्त्रियां वा नदीसंज्ञौ स्तो ङिति परे।
17. वामि (1-4-5) - इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री।
18. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
19. आण्नद्याः (7-3-112) - नद्यन्तात्परेषां ङितामाडागमः स्यात्।
20. आटश्च (6-1-90) - आटोऽचि परे वृद्धिरेकादेशः स्यात्।
21. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
22. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
23. ओः सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
24. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
25. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
26. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
27. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
28. ओः सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
29. न भूसुधियोः (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
30. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातोः "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
31. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

32. ओ: सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
33. न भूसुधियो: (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
34. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातो: "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
35. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
36. ओ: सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
37. न भूसुधियो: (6-4-85) - एतयोर्यण् न स्यादचि सुपि।
38. अचि श्नुधातुभ्रुवां य्वोरियङुवङौ (6-4-77) - श्नुप्रत्ययान्तस्य इवर्णोवर्णान्तस्य धातो: "भ्रू" इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे।
39. ह्रस्वो नपुंसके प्रातिपदिकस्य (1-2-47) - क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्व: स्यात्।
40. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयो: स्वमोर्लुक् स्यात्।
41. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङ: शी स्यात्।
42. जश्शसो: शि: (7-1-20) - क्लीबादनयो: शि: स्यात्।
43. ओ: सुपि (6-4-83) - धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादजादौ सुपि।
44. तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (7-1-74) - प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकादशः पाठः - ऋकारान्तशब्दाः

दशमस्य पाठस्य पुनरावृत्तिः -

- वर्षाभू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्रापि अचि यणादेशः प्राप्तः, तस्य निषेधः विधीयते। तं निषेधमपि बाधित्वा अच्-आदौ सुपि वर्षाभूशब्दस्य यणादेशः अन्येन विधीयते।
- वधूशब्दस्य नदीसंज्ञा वर्तते। अतः नदीसंज्ञानिमित्तकानि कार्याणि भवन्ति। औ, औट्, जस् प्रत्ययेषु यणादेशः क्रियते।
- भ्रूशब्दस्य अजादौ प्रत्यये परे उवङ्-आदेशः भवति। भ्रूशब्दः उवङ्-स्थानी। अतः ङे, ङसि, ङस्, ङि - प्रत्ययेषु परेषु विकल्पेन नदीसंज्ञा भवति। आमि च विकल्पेन नदीसंज्ञा भवति।
- स्वयम्भू इत्यत्र ऊकारान्तः धातुः अन्ते विद्यते। ऊकारात् प्राक् संयोगः नास्ति। अनेकाच् अङ्गम्। अतः अत्रापि अचि यणादेशः प्राप्तः। परन्तु तस्य निषेधः विधीयते। अतः धातोः उ/ऊकारस्य अच्-आदौ प्रत्यये परे उवङ्-आदेशः भवति।
- सुलूशब्दः - नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वः भवति। सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति। औ-स्थाने शी-आदेशः भवति। जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च शि-आदेशः भवति। सुलूशब्दस्य अजादौ प्रत्यये परे यण्-आदेशः भवति। टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु परेषु सुलूशब्दस्य विकल्पेन पुंवद्भावः भवति। अतः पुंवद्भावे यण्-आदेशः भवति। तदभावे मधुशब्दवत् रूपाणि भवन्ति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे वयं ऋकारान्तेषु भेदान् पश्यामः।
2. कर्तृशब्दस्य रूपाणि पुंलिङ्गे पठामः।
3. पितृशब्दस्य रूपाणि पठामः।
4. मातृशब्दस्य रूपाणि पठामः।
5. धातृशब्दस्य नपुंसकलिङ्गे रूपाणि पश्यामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऋकारान्तेषु द्विधा विभागः कर्तुं शक्यः।

ऋकारान्तः

- **तृन्-अन्तः, तृच्-अन्तः। स्वसृ, नप्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ - इति।**
  - **सर्वनामस्थानप्रत्ययेषु परेषु उपधादीर्घः**
- **तदितरे**

तृन्, तृच्-इति कृत्प्रत्ययौ स्तः। अत्र तृन् इत्यनेन तृन्नन्तः, तृच् इत्यनेन तृजन्तः विवक्षितः। तृचि तृनि च तृ एव प्रयोगेषु दृश्यते। यथा - तृच्-कर्तृ, तृन्-दातृ।

ऋकारान्तः पुंलिङ्गः कर्तृशब्दः (तृच्-अन्तः)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	कर्तृ+सु(स्)→ कर्ता	कर्तृ+औ→ कर्तारौ	कर्तृ+जस्(अस्)→ कर्तारः
द्वितीया	कर्तृ+अम्→ कर्तारम्	कर्तृ+औट्(औ)→ कर्तारौ	कर्तृ+शस्(अस्)→ कर्तॄन्
तृतीया	कर्तृ+टा(आ)→ कर्त्रा	कर्तृ+भ्याम्→ कर्तृभ्याम्	कर्तृ+भिस्→ कर्तृभिः
चतुर्थी	कर्तृ+ङे(ए)→ कर्त्रे	कर्तृ+भ्याम्→ कर्तृभ्याम्	कर्तृ+भ्यस्→ कर्तृभ्यः
पञ्चमी	कर्तृ+ङसि(अस्)→ कर्तुः	कर्तृ+भ्याम्→ कर्तृभ्याम्	कर्तृ+भ्यस्→ कर्तृभ्यः
षष्ठी	कर्तृ+ङस्(अस्)→ कर्तुः	कर्तृ+ओस्→ कर्त्रोः	कर्तृ+आम्→ कर्तॄणाम्
सप्तमी	कर्तृ+ङि(इ)→ कर्तरि	कर्तृ+ओस्→ कर्त्रोः	कर्तृ+सुप्(सु)→ कर्तृषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
सम्बोधनम्	हे कर्तृ+सु→ हे कर्तः!	हे कर्तृ+औ→ हे कर्तारौ!	हे कर्तृ+जस्→ हे कर्तारः!

1. सुप्रत्यये परे ऋकारान्तस्य अङ्गस्य अनङ्-आदेशः भवति।[1] अनङ्-आदेशे अन् अवशिष्टः। सः अन्त्यस्य ऋकारस्य स्थाने भवति।
कर्तृ + सु→कर्त् + अन् + सु→कर्तन् + स्।
2. सर्वनामस्थानप्रत्यये परे तृजन्तस्य उपधायाः दीर्घः भवति।[2] कर्तान् + स्। हलः परस्य सुप्रत्ययस्य = सकारस्य लोपः भवति।
3. प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः भवति।[3] कर्ता।
4. सर्वनामस्थाने ङि प्रत्यये परे ऋकारान्तस्य अङ्गस्य गुणः भवति।[4] ततः उपधायाः दीर्घः।[5] कर्तृ + औ→कर्तर् + औ→कर्तार् + औ→कर्तारौ। एवं कर्तारः।
5. शसि पूर्वसवर्णदीर्घः भवति।[6] ततः शसः सकारस्य नकारादेशः।[7]
कर्तृ + शस्→कर्तृ + अस्→कर्तॄ→अस्→कर्तॄ→न्→कर्तॄन्।
6. टा, ङे, ओस्, ओस् - एतेषु प्रत्ययेषु परेषु ऋकारस्य यणादेशः भवति। कर्त्रा इत्यादि।
7. कर्तृ + ङसि/ङस्→कर्तृ + अस्। अत्र ऋकार-अकारयोः उकारः एकादेशः भवति।[8] सः रपरः भवति।[9] कर्तुर् स् इति स्थितौ सकारस्य लोपः भवति।[10] कर्तुर् अत्र रेफस्य विसर्गः। कर्तुः। कर्तृ + आम्। कर्तृ आम् - नुट् आगमः[11], नामि अजन्तस्य अङ्गस्य दीर्घः।[12] ऋकारात् परस्य नस्य णत्वम्। कर्तॄणाम्। कर्तृ ङि - ङिपरे ऋकारस्य गुणः।[13] कर्तरि।

प्रत्ययः	प्रकृत्यादेशः	आगमः
सु	ऋकारस्य अनङ्, उपधादीर्घः	-
औ, जस्, अम्, औट्	ऋकारस्य गुणः[14], उपधादीर्घः[15]	-
आम्	-	नुट्(न्)[16]
ङि	गुणः	

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऋकारान्त: पुंलिङ्ग: पितृशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पितृ+सु(स्)→ पिता	पितृ+औ→ पितरौ	पितृ+जस्(अस्)→ पितर:
द्वितीया	पितृ+अम्→ पितरम्	पितृ+औट्(औ)→ पितरौ	पितृ+शस्(अस्)→ पितॄन्
तृतीया	पितृ+टा(आ)→ पित्रा	पितृ+भ्याम्→ पितृभ्याम्	पितृ+भिस्→ पितृभि:
चतुर्थी	पितृ+ङे(ए)→ पित्रे	पितृ+भ्याम्→ पितृभ्याम्	पितृ+भ्यस्→ पितृभ्य:
पञ्चमी	पितृ+ङसि (अस्)→पितु:	पितृ+भ्याम्→ पितृभ्याम्	पितृ+भ्यस्→ पितृभ्य:
षष्ठी	पितृ+ङस्(अस्)→ पितु:	पितृ+ओस्→ पित्रो:	पितृ+आम्→ पितॄणाम्
सप्तमी	पितृ+ङि(इ)→ पितरि	पितृ+ओस्→ पित्रो:	पितृ+सुप्(सु)→ पितृषु
सम्बोधनम्	हे पितृ+सु→ हे पित:!	हे पितृ+औ→ हे पितरौ!	हे पितृ+जस्→ हे पितर:!

1. अयं तृच्-अन्त: वा तृन्-अन्त: वा नास्ति। अत: सर्वनामस्थानप्रत्ययेषु परेषु उपधाया: दीर्घ: न भवति। अन्यानि रूपाणि कर्तृशब्दवदेव भवन्ति।

प्रत्यय:	प्रकृत्यादेश:	आगम:
सु	ऋकारस्य अनङ्[17]	-
औ, जस्, अम्, औट्, ङि	ऋकारस्य गुण:[18]	-
आम्		नुट्(न्)[19]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऋकारान्तः स्त्रीलिङ्गः मातृशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मातृ+सु(स्)→ माता	मातृ+औ→ मातरौ	मातृ+जस्(अस्)→ मातरः
द्वितीया	मातृ+अम्→ मातरम्	मातृ+औट्(औ)→ मातरौ	मातृ+शस्(अस्)→ मातॄः
तृतीया	मातृ+टा(आ)→ मात्रा	मातृ+भ्याम्→ मातृभ्याम्	मातृ+भिस्→ मातृभिः
चतुर्थी	मातृ+ङे(ए)→ मात्रे	मातृ+भ्याम्→ मातृभ्याम्	मातृ+भ्यस्→ मातृभ्यः
पञ्चमी	मातृ+ङसि(अस्)→ मातुः	मातृ+भ्याम्→ मातृभ्याम्	मातृ+भ्यस्→ मातृभ्यः
षष्ठी	मातृ+ङस्(अस्)→ मातुः	मातृ+ओस्→ मात्रोः	मातृ+आम्→ मातृणाम्
सप्तमी	मातृ+ङि(इ)→ मातरि	मातृ+ओस्→ मात्रोः	मातृ+सुप्(सु)→ मातृषु
सम्बोधनम्	हे मातृ+सु→ हे मातः!	हे मातृ+औ→ हे मातरौ!	हे मातृ+जस्→ हे मातरः!

1. अयं तृच्-अन्तः वा तृन्-अन्तः वा नास्ति। अतः सर्वनामस्थानप्रत्ययेषु परेषु उपधायाः दीर्घः न भवति।

2. अयं शब्दः स्त्रीलिङ्गे वर्तते। अतः शसि पूर्वसवर्णदीर्घात् परं सकारस्य नकारादेशः न भवति। अन्यानि रूपाणि पितृशब्दवदेव भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ऋकारान्तः नपुंसकलिङ्गः धातृशब्दः (तृच्-अन्तः)

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	धातृ+सु(स्)→ धातृ	धातृ+औ→ धातृणी	धातृ+जस(अस्)→ धातॄणि
द्वितीया	धातृ+अम्→ धातृ	धातृ+औट्(औ)→ धातृणी	धातृ+शस(अस्)→ धातॄणि
तृतीया	धातृ+टा(आ)→ धात्रा/धातृणा	धातृ+भ्याम्→ धातृभ्याम्	धातृ+भिस्→ धातृभिः
चतुर्थी	धातृ+ङे(ए)→ धात्रे/धातृणे	धातृ+भ्याम्→ धातृभ्याम्	धातृ+भ्यस्→ धातृभ्यः
पञ्चमी	धातृ+ङसि(अस्)→ धातुः/धातृणः	धातृ+भ्याम्→ धातृभ्याम्	धातृ+भ्यस्→ धातृभ्यः
षष्ठी	धातृ+ङस्(अस्)→ धातुः/धातृणः	धातृ+ओस्→ धात्रोः/धातृणोः	धातृ+आम्→ धातॄणाम्
सप्तमी	धातृ+ङि(इ)→ धातरि/धातृणि	धातृ+ओस्→ धात्रोः/धातृणोः	धातृ+सुप(सु)→ धातृषु
सम्बोधनम्	हे धातृ+सु→ हे धातः !/हे धातृ !	हे धातृ+औ→ हे धातृणी !	हे धातृ+जस्→ हे धातॄणि !

1. नपुंसकलिङ्गे विद्यमानत्वात् सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति।[20] धातृ।
2. औप्रत्ययस्य औट्-प्रत्ययस्य च शी-आदेशः भवति।[21] धातृणी।
3. जस्-प्रत्ययस्य शस्-प्रत्ययस्य च शि-आदेशः भवति।[22] धातॄणि।
4. टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु परेषु रूपद्वयं भवति। एतेषु प्रत्ययेषु परेषु धातृशब्दस्य विकल्पेन पुंवद्भावः भवति।[23] कर्तृशब्दवत् भवन्ति। पुंवद्भाव-अभावे नुमागमः भवति।[24] धात्रा, धातृणा-इत्यादि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठसार: -

1. कर्तृशब्दः - अयं तृच्-अन्तः। सुप्रत्यये परे ऋकारान्तस्य अङ्गस्य अनङ्-आदेशः भवति। सर्वनामस्थानप्रत्यये परे तृजन्तस्य उपधायाः दीर्घः भवति। सर्वनामस्थाने ङि प्रत्यये च परे ऋकारान्तस्य अङ्गस्य गुणः भवति। शसि तु पूर्वसवर्णदीर्घः भवति। टा, ङे, ङसि, ङस्, ओस्, ङि, ओस् - एतेषु प्रत्ययेषु परेषु यणादेशः भवति। कर्तृ + ङसि/ङस्→कर्तृ + अस् अत्र ऋकार-अकारयोः उकारः एकादेशः भवति।
2. पितृशब्दः - अयं तृच्-अन्तः वा तृन्-अन्तः वा नास्ति। अतः सर्वनामस्थानप्रत्ययेषु परेषु उपधायाः दीर्घः न भवति। अन्यानि रूपाणि कर्तृशब्दवदेव भवन्ति।
3. मातृशब्दः - अयं तृच्-अन्तः वा तृन्-अन्तः वा नास्ति। अतः सर्वनामस्थानप्रत्ययेषु परेषु उपधायाः दीर्घः न भवति। अयं शब्दः स्त्रीलिङ्गे वर्तते। अतः शसि पूर्वसवर्णदीर्घात् परं सकारस्य नकारादेशः न भवति। अन्यानि रूपाणि पितृशब्दवदेव भवन्ति।
4. धातृशब्दः - नपुंसकलिङ्गे विद्यमानत्वात् सुप्रत्ययस्य अम्-प्रत्ययस्य च लोपः (लुक्) भवति। औप्रत्ययस्य औट्-प्रत्ययस्य च शी-आदेशः भवति। जस्-प्रत्ययस्य शस्-प्रत्ययस्य च शि-आदेशः भवति। टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु धातृशब्दस्य विकल्पेन पुंवद्भावः भवति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. तृजन्तस्य सर्वनामस्थानप्रत्यये परे किं कार्यम्?
2. ऋकारान्तस्य ङिप्रत्यये परे किं कार्यम्?
3. अनङ्-आदेशः कस्य कदा भवति?
4. कर्तृ + अस् अत्र किं कार्यं भवति?

योग्यं समाधानं चिनुत -

1. कर्तृ + सु - किं कार्यम्?
   अ) गुणः आ) उपधादीर्घः इ) उभयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. पितृ + अम् - अत्र किं कार्यम्?

अ) गुणः आ) उपधादीर्घः इ) पूर्वरूपम्

3. पितृशब्दः-

अ) तृन्-अन्तः आ) तृच्-अन्तः इ) न कश्चन

4. पितृशब्दस्य सम्बुद्धौ किं रूपम्?

अ) हे पितः आ) हे पिता इ) हे पितृ

5. मातृ + औ - अत्र किं कार्यम्?

अ) गुणः आ) उपधादीर्घः इ) उभयम्

6. मातृ + आम् - किं रूपम्?

अ) मातृणाम् आ)मातॄणाम् इ) मात्राम्

7. मातृशब्दः-

अ) तृन्-अन्तः आ) तृच्-अन्तः इ) न कश्चन

8. धातृशब्दस्य नपुंसके सम्बुद्धौ किं रूपम्?

अ) हे धा तः आ) हे धातृ इ) उभयम्

9. धातृ + ओस् नपुंसके किं रूपम्?

अ) धात्रोः आ) धातृणोः इ) उभयम्

9. कर्तृशब्दः -

अ) तृन्-अन्तः आ) तृच्-अन्तः इ) न कश्चन

योजयत -

1. धातृ + टा(नपुं) गुणः
2. मातृ + शस् वा पुंवद्भावः
3. कर्तृ + अम् पूर्वसवर्णदीर्घः
4. पितृ + ङि गुणः, उपधादीर्घः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. मातृ + ङे
2. पितृ + ङे
3. कर्तृ + ङे
4. धातृ + ङे(नपुं)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रक्रियायाः भेदान् लिखत -

1. कर्तृ + अम्, मातृ + अम्
2. कर्तृ + औट्, पितृ + औट्
3. पितृ + शस्, मातृ + शस्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. धातृणः
2. मातरि
3. पितरः
4. कर्तारः

परियोजना -

1. दातृ, धातृ - इत्यादीनाम् ऋकारान्तां पुंलिङ्गे रूपाणि लिखत।
2. स्वसृ, दुहितृ - इत्यादीनाम् ऋकारान्तानां रूपाणि लिखत।
3. भ्रातृशब्दस्य रूपाणि लिखत।

---

1. ऋदुशनस्पुरुदंसोऽनेहसां च (7-1-94) - ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे।
2. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (6-4-11) - अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
3. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
4. ऋतो ङिसर्वनामस्थानयोः (7-3-110) - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्।
5. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (6-4-11) - अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
6. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
7. तस्माच्छसो नः पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।
8. ऋत उत् (6-1-111) - ऋदन्तान् ङसिङसोरति परे उकार एकादेशः स्यात्। रपरत्वम्।
9. उरण् रपरः (1-1-51) - "ऋ इति त्रिंशत सञ्ज्ञा" इत्युक्तम्, तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते।
10. रात्सस्य (8-2-24) - रेफात् संयोगान्तस्य सस्यैव लोपः, नान्यस्य।
11. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
12. नामि (6-4-3) - नामि परेऽजन्ताङ्गस्य दीर्घः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

13. ऋतो ङिसर्वनामस्थानयोः (7-3-110) - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्।
11. ऋतो ङिसर्वनामस्थानयोः (7-3-110) - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्।
12. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (6-4-11) - अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
13. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
14. ऋदुशनस्पुरुदंसोऽनेहसां च (7-1-94) - ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे।
15. अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणाम् (6-4-11) - अबादीनामुपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
16. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
17. ऋदुशनस्पुरुदंसोऽनेहसां च (7-1-94) - ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ परे।
18. ऋतो ङिसर्वनामस्थानयोः (7-3-110) - ङौ सर्वनामस्थाने च परे ऋदन्ताङ्गस्य गुणः स्यात्।
19. ह्रस्वनद्यापो नुट् (7-1-54) - ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः स्यात्।
20. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
21. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
22. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
23. तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य (7-1-74) - प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा स्याट्टादावचि।
24. इकोऽचि विभक्तौ (7-1-73) - इगन्तस्य क्लीबस्य नुमागमः स्यादचि विभक्तौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वादशः पाठः - ओकारान्तशब्दाः

एकादशस्य पाठस्य पूनरावृत्तिः -

➢ कर्तृशब्दः - अयं तृच्-अन्तः। सुप्रत्यये परे ऋकारान्तस्य अङ्गस्य अनङ्-आदेशः भवति। सर्वनामस्थानप्रत्यये परे तृजन्तस्य उपधायाः दीर्घः भवति। सर्वनामस्थाने ङि प्रत्यये च परे ऋकारान्तस्य अङ्गस्य गुणः भवति। शसि तु पूर्वसवर्णदीर्घः भवति। टा, ङे, ङसि, ङस्, ओस्, ङि, ओस् - एतेषु प्रत्ययेषु परेषु यणादेशः भवति। कर्तृ + ङसि/ङस्→कर्तृ + अस् अत्र ऋकार-अकारयोः उकारः एकादेशः भवति।

➢ पितृशब्दः - अयं तृच्-अन्तः वा तृन्-अन्तः वा नास्ति। अतः सर्वनामस्थान-प्रत्ययेषु परेषु उपधायाः दीर्घः न भवति। अन्यानि रूपाणि कर्तृशब्दवदेव भवन्ति।

➢ मातृशब्दः - अयं तृच्-अन्तः वा तृन्-अन्तः वा नास्ति। अतः सर्वनामस्थानप्रत्ययेषु परेषु उपधायाः दीर्घः न भवति। अयं शब्दः स्त्रीलिङ्गे वर्तते। अतः शसि पूर्वसवर्णदीर्घात् परं सकारस्य नकारादेशः न भवति। अन्यानि रूपाणि पितृशब्दवदेव भवन्ति।

➢ धातृशब्दः - नपुंसकलिङ्गे विद्यमानत्वात् सुप्रत्ययस्य अम्-प्रत्ययस्य च लोपः (लुक्) भवति। औप्रत्ययस्य औट्-प्रत्ययस्य च शी-आदेशः भवति। जस्-प्रत्ययस्य शस्-प्रत्ययस्य च शि-आदेशः भवति। टा, ङे, ङसि, ङस्, ओस्, आम्, ङि, ओस् - प्रत्ययेषु धातृशब्दस्य विकल्पेन पुंवद्भावः भवति।

अस्य पाठस्य प्रयोजनानि -

1. ओकारान्तस्य गोशब्दस्य पुंलिङ्गे स्त्रीलिङ्गे च रूपाणि पठामः।
2. ऐकारान्तस्य रैशब्दस्य पुंलिङ्गे रूपाणि पठामः।
3. औकारान्तस्य ग्लौशब्दस्य पुंलिङ्गे रूपाणि पठामः।
4. औकारान्तस्य नौशब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
5. प्रद्योशब्दस्य, प्रैशब्दस्य, सुनौशब्दस्य च रूपाणि नपुंसकलिङ्गे पठामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ओकारान्त: पुंलिङ्ग: गोशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गो+सु(स्)→गौ:	गो+औ→गावौ	गो+जस्(अस्)→गाव:
द्वितीया	गो+अम्→ गाम्	गो+औट्(औ)→ गावौ	गो+शस्(अस्)→ गा:
तृतीया	गो+टा(आ)→ गवा	गो+भ्याम्→ गोभ्याम्	गो+भिस्→ गोभि:
चतुर्थी	गो+ङे(ए)→ गवे	गो+भ्याम्→ गोभ्याम्	गो+भ्यस्→ गोभ्य:
पञ्चमी	गो+ङसि(अस्)→ गो:	गो+भ्याम्→ गोभ्याम्	गो+भ्यस्→ गोभ्य:
षष्ठी	गो+ङस्(अस्)→ गो:	गो+ओस्→ गवो:	गो+आम्→ गवाम्
सप्तमी	गो+ङि(इ)→गवि	गो+ओस्→गवो:	गो+सुप्(सु)→गोषु
सम्बोधनम्	हे गो+सु→हे गौ: !	हे गो+औ→हे गावौ !	हे गो+जस्→हे गाव: !

1. गोशब्दात् परेषां सु, औ, जस्, अम्, औट् - प्रत्ययानां णिद्-वद्भाव: भवति।[1]

> णिद्-वद्भाव: - णकार-इत्संज्ञक: नास्ति चेदपि तद्वत् स्वीक्रियते। तेन णिति उक्तानि कार्याणि अत्र भवन्ति।

2. गोशब्दात् सुप्रत्यये, सुप्रत्ययस्य णिद्वद्भाव:। तेन णिति यत् कार्यमुक्तं अजन्तस्य वृद्धि:[2], तदत्रापि भवति। गो + सु→गो + स्→गौ + स्→गौ + रु→गौ + र्→गौ + स्→गौ:।
3. गोशब्दात् औ/औट्प्रत्यये, तस्य णिद्-वद्भाव:। तेन ओकारस्य वृद्धि:(औ) भवति। अनन्तरम् औकारस्य आवादेश:। गो+औ→गौ+औ→गाव्+औ→गावौ।
4. गोशब्दात् जस्-प्रत्यये, जस: णिद्-वद्भाव:। ओकारस्य वृद्धि:(औ) वृद्धि:। अनन्तरम् औकारस्य आवादेश:।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गो+जस्→गो+अस्→गौ+अस्→गाव्+अस्→गावरु→गावर्→गावः।

5. गोशब्दात् अम्-प्रत्यये, यद्यपि तस्य णिद्-वद्भावः अस्ति, अतः वृद्धिः प्राप्ता। तथापि वृद्धिं बाधित्वा ओकारस्य अम्-परे ओकार-अकारयोः आकारः एकादेशः भवति।[3] गो + अम्→गाम्।

6. गोशब्दात् शस्-प्रत्यये, शसि अस् अवशिष्टः, गो अस् इति स्थितौ ओकार-अकारयोः आकारः एकादेशः भवति।[4]

गो + शस्→गो + अस्→गास्→गार्→गाः।

7. टा, ङे, ओस्, आम्, ङि-प्रत्ययेषु इत्संज्ञालोपानन्तरम् अच् अवशिष्टः भवति। अतः तेषु परेषु गोशब्दस्य ओकारस्य अव्-आदेशः भवति।[5]

8. भ्याम्, भिस्, सु-प्रत्ययेषु परेषु विशिष्टं कार्यं नास्ति किमपि।

9. गो + ङसि/ङस् इत्यत्र ङसिङसोः अस् इति अवशिष्टः। गो + अस् अत्र ओकार-अकारयोः पूर्वरूपम् एकादेशः भवति।[6] गोः।

10. गो + सुप्, गो + सु अत्र सकारस्य षकारः।[7] गोषु।

गोशब्दस्य स्त्रीलिङ्गेऽपि एषा एव प्रक्रिया।

ऐकारान्तः पुंलिङ्गः रैशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	रै+सु(स्)→राः	रै+औ→रायौ	रै+जस्(अस्)→रायः
द्वितीया	रै+अम्→रायम्	रै+औट्(औ)→रायौ	रै+शस्(अस्)→रायः
तृतीया	रै+टा(आ)→राया	रै+भ्याम्→राभ्याम्	रै+भिस्→राभिः
चतुर्थी	रै+ङे(ए)→राये	रै+भ्याम्→राभ्याम्	रै+भ्यस्→राभ्यः
पञ्चमी	रै+ङसि(अस्)→ रायः	रै+भ्याम्→ राभ्याम्	रै+भ्यस्→ राभ्यः
षष्ठी	रै+ङस्(अस्)→ रायः	रै+ओस्→ रायोः	रै+आम्→ रायाम्
सप्तमी	रै+ङि(इ)→रायि	रै+ओस्→रायोः	रै+सुप्(सु)→रासु
सम्बोधनम्	हे रै+सु→हे राः!	हे रै+औ→हे रायौ!	हे रै+जस्→हे रायः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. रैशब्दस्य अजादिषु प्रत्ययेषु ऐकारस्य आय्-आदेश:।[8] रायौ इत्यादि।
2. रैशब्दस्य हलादिषु प्रत्ययेषु परेषु ऐकारस्य आकारादेश: भवति।[9] राभ्याम् इत्यादि।

औकारान्त: पुंलिङ्ग: ग्लौशब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	ग्लौ+सु(स्)→ ग्लौ:	ग्लौ+औ→ ग्लावौ	ग्लौ+जस्(अस्)→ ग्लाव:
द्वितीया	ग्लौ+अम्→ ग्लावम्	ग्लौ+औट्(औ)→ ग्लावौ	ग्लौ+शस्(अस्)→ ग्लाव:
तृतीया	ग्लौ+टा(आ)→ ग्लावा	ग्लौ+भ्याम्→ ग्लौभ्याम्	ग्लौ+भिस्→ ग्लौभि:
चतुर्थी	ग्लौ+ङे(ए)→ ग्लावे	ग्लौ+भ्याम्→ ग्लौभ्याम्	ग्लौ+भ्यस्→ ग्लौभ्य:
पञ्चमी	ग्लौ+ङसि(अस्)→ ग्लाव:	ग्लौ+भ्याम्→ ग्लौभ्याम्	ग्लौ+भ्यस्→ ग्लौभ्य:
षष्ठी	ग्लौ+ङस्(अस्)→ ग्लाव:	ग्लौ+ओस्→ ग्लावो:	ग्लौ+आम्→ ग्लावाम्
सप्तमी	ग्लौ+ङि(इ)→ ग्लावि	ग्लौ+ओस्→ ग्लावो:	ग्लौ+सुप्(सु)→ ग्लौषु
सम्बोधनम्	हे ग्लौ+सु→ हे ग्लौ:!	हे ग्लौ+औ→ हे ग्लावौ!	हे ग्लौ+जस्→ हे ग्लाव:!

1. ग्लौशब्दस्य अजादिषु प्रत्ययेषु आव्-आदेश: भवति।[10] हलादिषु प्रत्ययेषु प्रक्रियायां विशेष: नास्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

औकारान्तः स्त्रीलिङ्गः नौशब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	नौ+सु(स्)→नौः	नौ+औ→नावौ	नौ+जस्(अस्)→नावः
द्वितीया	नौ+अम्→ नावम्	नौ+औट्(औ)→ नावौ	नौ+शस्(अस्)→ नावः
तृतीया	नौ+टा(आ)→ नावा	नौ+भ्याम्→ नौभ्याम्	नौ+भिस्→ नौभिः
चतुर्थी	नौ+ङे(ए)→नावे	नौ+भ्याम्→नौभ्याम्	नौ+भ्यस्→नौभ्यः
पञ्चमी	नौ+ङसि(अस्)→ नावः	नौ+भ्याम्→ नौभ्याम्	नौ+भ्यस्→ नौभ्यः
षष्ठी	नौ+ङस्(अस्)→ नावः	नौ+ओस्→ नावोः	नौ+आम्→ नावाम्
सप्तमी	नौ+ङि(इ)→नावि	नौ+ओस्→नावोः	नौ+सुप्(सु)→नौषु
सम्बोधनम्	हे नौ+सु→हे नौः!	हे नौ+औ→हे नावौ!	हे नौ+जस्→हे नावः!

1. नौशब्दस्य अजादिषु प्रत्ययेषु आवादेशः भवति।[11] हलादिषु प्रत्ययेषु प्रक्रियायां विशेषः नास्ति।

ओकारान्तः नपुंसकलिङ्गः प्रद्योशब्दः

प्रकृष्टा द्यौः यस्मिन् इति बहुव्रीहौ प्रद्यो इति ओकारान्तः निष्पन्नः। तस्य नपुंसकलिङ्गे ह्रस्वः भवति।[12] ओकारस्य ह्रस्वः नाम उकारः भवति।[13] अतः अस्य रूपाणि मधुशब्दवत् भवन्ति।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	प्रद्यु+सु(स्)→प्रद्यु	प्रद्यु+औ→प्रद्युनी	प्रद्यु+जस्(अस्)→प्रद्यूनि
द्वितीया	प्रद्यु + अम्→ प्रद्यु	प्रद्यु+औट्(औ)→ प्रद्युनी	प्रद्यु+शस्(अस्)→ प्रद्यूनि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	प्रद्यु+टा(आ)→ प्रद्युना	प्रद्यु+भ्याम्→ प्रद्युभ्याम्	प्रद्यु+भिस्→ प्रद्युभिः
चतुर्थी	प्रद्यु+ङे(ए)→ प्रद्युने	प्रद्यु+भ्याम्→ प्रद्युभ्याम्	प्रद्यु+भ्यस्→ प्रद्युभ्यः
पञ्चमी	प्रद्यु+ङसि(अस्)→ प्रद्युनः	प्रद्यु+भ्याम्→ प्रद्युभ्याम्	प्रद्यु+भ्यस्→ प्रद्युभ्यः
षष्ठी	प्रद्यु+ङस्(अस्)→ प्रद्युनः	प्रद्यु+ओस्→ प्रद्युनोः	प्रद्यु+आम्→ प्रद्यूनाम्
सप्तमी	प्रद्यु+ङि(इ)→ प्रद्युनि	प्रद्यु+ओस्→ प्रद्युनोः	प्रद्यु+सुप्(सु)→ प्रद्युषु
सम्बोधनम्	हे प्रद्यु+सु→ हे प्रद्यो !/हे प्रद्यु !	हे प्रद्यु+औ→ हे प्रद्युनी !	हे प्रद्यु+जस्→ हे प्रद्यूनि !

ऐकारान्तः नपुंसकलिङ्गः प्ररैशब्दः

प्रकृष्टः राः यस्मिन् इति बहुव्रीहौ प्ररै इति ऐकारान्तः निष्पन्नः। तस्य नपुंसकलिङ्गे ह्रस्वः भवति।[14] ऐकारस्य ह्रस्वः नाम इकारः भवति।[15]

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	प्ररि+सु(स्)→ प्ररि	प्ररि+औ→ प्ररिणी	प्ररि+जस्(अस्)→ प्ररीणि
द्वितीया	प्ररि+अम्→ प्ररि	प्ररि+औट्(औ)→ प्ररिणी	प्ररि+शस्(अस्)→ प्ररीणि
तृतीया	प्ररि+टा(आ)→ प्ररिणा	प्ररि+भ्याम्→ प्रराभ्याम्	प्ररि+भिस्→ प्रराभिः
चतुर्थी	प्ररि+ङे(ए)→ प्ररिणे	प्ररि+भ्याम्→ प्रराभ्याम्	प्ररि+भ्यस्→ प्रराभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
पञ्चमी	प्ररि+ङसि(अस्)→ प्ररिणः	प्ररि+भ्याम्→ प्राभ्याम्	प्ररि+भ्यस्→ प्राभ्यः
षष्ठी	प्ररि+ङस्(अस्)→ प्ररिणः	प्ररि+ओस्→ प्ररिणोः	प्ररि+आम्→ प्ररीणाम्
सप्तमी	प्ररि+ङि(इ)→ प्ररिणि	प्ररि+ओस्→ प्ररिणोः	प्ररि+सुप्(सु)→ प्रासु
सम्बोधने	हे प्ररि+सु→ हे प्ररि!/हे प्ररे!	हे प्ररि+औ→ हे प्ररिणी!	हे प्ररि+जस्→ हे प्ररीणि!

1. हलादिषु प्रत्ययेषु एकदेशविकृतन्यायेन इकारस्य आकरः आदेशः भवति।[16] अन्यत्र सर्वत्र च वारिशब्दवत् रूपाणि भवन्ति। सुप्रत्यस्य लुप्तत्वात् तत्र आकारादेशः न भवति।

औकारान्तः नपुंसकलिङ्गः सुनौशब्दः

सु(शोभना) नौः यस्मिन् इति बहुव्रीहौ सुनौ इति निष्पन्नः। तस्य नपुंसकलिङ्गे ह्रस्वः भवति।[17] औकारस्य ह्रस्वः नाम उकारः भवति।[18] अतः अस्य रूपाणि मधुशब्दवत् भवन्ति।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सुनु+सु(स्)→सुनु	सुनु+औ→सुनुनी	सुनु+जस्(अस्)→सुनूनि
द्वितीया	सुनु+अम्→ सुनु	सुनु+औट्(औ)→ सुनुनी	सुनु+शस्(अस्)→ सुनूनि
तृतीया	सुनु+टा(आ)→ सुनुना	सुनु+भ्याम्→ सुनुभ्याम्	सुनु+भिस्→ सुनुभिः
चतुर्थी	सुनु+ङे(ए)→ सुनुने	सुनु+भ्याम्→ सुनुभ्याम्	सुनु+भ्यस्→ सुनुभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
पञ्चमी	सुनु+ङसि(अस्)→ सुनुन:	सुनु+भ्याम्→ सुनुभ्याम्	सुनु+भ्यस्→ सुनुभ्य:
षष्ठी	सुनु+ङस्(अस्)→ सुनुन:	सुनु+ओस्→ सुनुनो:	सुनु+आम्→ सुनूनाम्
सप्तमी	सुनु+ङि(इ)→ सुनुनि	सुनु+ओस्→ सुनुनो:	सुनु+सुप्(सु)→ सुनुषु
सम्बोधनम्	हे सुनु+सु→ हे सुनो !/हे सुनु !	हे सुनु+औ→ हे सुनुनी !	हे सुनु+जस्→ हे सुनूनि !

अभ्यास:

एकेन वाक्येन समाधत्त -

1. गा: - इति कथं सिध्यति ?
2. राभ्याम् - इति कथं सिध्यति ?
3. प्रद्यूनाम् - इत्यस्य सिद्धि: कथम् ?
4. प्ररीणाम् - इत्यस्य सिद्धि: कथम् ?
5. सुनौशब्दस्य नपुंसकलिङ्गे किं कार्यं भवति ?

योग्यम् उत्तरं चिनुत -

1. गोशब्दात् पर: सुप्रत्यय: कीदृश: भवति ?
   अ) किद्-वत् आ) ञिद्-वत् इ) णिद्-वत्
2. गो + अम् - इत्यत्र किं कार्यम् ?
   अ) आ-आदेश: आ) अव्-आदेश: इ) पूर्वरूपम्
3. गो + आम् - अत्र किं कार्यम् ?
   अ) नुट् आ) अव्-आदेश: इ) आकार-आदेश:
4. णित्-प्रत्ययेषु परेषु किं कार्यं भवति ?
   अ) गुण: आ) अजन्तस्य अङ्गस्य वृद्धि: इ) पूर्वरूपम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. रै + भ्याम् - अत्र किं कार्यम्?

अ) आय्-आदेशः आ) ह्रस्वः इ) आकार-आदेशः

6. प्रद्यु + टा - नपुंसके किं कार्यम्?

अ) टास्थाने ना आ) नुम्-आगमः इ) नुट्-आगमः

7. प्रद्योशब्दस्य नपुंसकलिङ्गे षष्ठीबहुवचने किं रूपम्?

अ) प्रद्युनाम् आ) प्रद्यूनाम् इ) प्रद्यौनाम्

8. प्ररैशब्दस्य नपुंसकलिङ्गे षष्ठीबहुवचने किं रूपम्?

अ) प्ररीणाम् आ) प्ररिणाम् इ) प्ररैणाम्

9. सुनौशब्दस्य नपुंसकलिङ्गे षष्ठीबहुवचने किं रूपम्?

अ) सुनौनाम् आ) सुनूनाम् इ) सुनुनाम्

10. प्ररिशब्दस्य नपुंसकलिङ्गे सम्बुद्धौ किं रूपम्?

अ) हे प्ररे आ) हे प्ररि इ) उभयम्

योजयत -

1. प्रद्यु + जस् प्ररिणि
2. प्रद्यु + औट् प्ररि
3. प्ररि + सुप् प्रद्युनी
4. प्ररि+ सु प्रद्यूनि

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. हे सुनु + सु
2. सुनु + ङि
3. प्ररै + भ्यस्
4. ग्लौ + आम्
5. हे रै + सु

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. रासु
2. प्ररिणः
3. सुनूनि
4. प्रद्यो
5. गाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. गोतो णित् (7-1-90) - गोशब्दात्परं सर्वनामस्थानं णिद्वत् स्यात्।
2. अचो ञ्णिति (7-2-115) - ञिति णिति च परेऽजन्ताङ्गस्य वृद्धिः स्यात्।
3. औतोऽम्शसो: (6-1-93) - आ ओत इति छेदः। ओकारादम्शसोरचि परे आकार एकादेशः स्यात्। शसा साहचर्यात्सुबेव अम् गृह्यते।
4. औतोऽम्शसो: (6-1-93) - आ ओत इति छेदः। ओकारादम्शसोरचि परे आकार एकादेशः स्यात्। शसा साहचर्यात्सुबेव अम् गृह्यते।
5. एचोऽयवायाव: (6-1-78) - एचः क्रमादय् अव् आय् आव् एते स्युरचि।
6. ङसिङसोश्च (6-1-110) - एङो ङसिङसोरति परे पूर्वरूपमेकादेशः स्यात्।
7. आदेशप्रत्यययो: (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
8. एचोऽयवायाव: (6-1-78) - एचः क्रमादय् अव् आय् आव् एते स्युरचि।
9. रायो हलि (7-2-85) - रैशब्दस्याऽऽकारोऽन्तादेशः स्याद्धलि विभक्तौ।
10. एचोऽयवायाव: (6-1-78) - एचः क्रमादय् अव् आय् आव् एते स्युरचि।
11. एचोऽयवायाव: (6-1-78) - एचः क्रमादय् अव् आय् आव् एते स्युरचि।
12. ह्रस्वो नपुंसके प्रातिपदिकस्य (1-2-47) - क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्।
13. एच इग्घ्रस्वादेशे (1-1-48) - आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात्।
14. ह्रस्वो नपुंसके प्रातिपदिकस्य (1-2-47) - क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्।
15. एच इग्घ्रस्वादेशे (1-1-48) - आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात्।
16. रायो हलि (7-2-85) - रैशब्दस्याऽऽकारोऽन्तादेशः स्याद्धलि विभक्तौ।
17. ह्रस्वो नपुंसके प्रातिपदिकस्य (1-2-47) - क्लीबे प्रातिपदिकस्याजन्तस्य ह्रस्वः स्यात्।
18. एच इग्घ्रस्वादेशे (1-1-48) - आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

हलन्तशब्दाः

प्रथमः पाठः - तकारान्तशब्दाः (1)

सूचना - इतः पूर्वम् अजन्तेषु शब्देषु द्वादश पाठाः पठिताः। इदानीं हलन्तपाठाः आरभ्यन्ते।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे मरुत्-शब्दस्य रूपाणि जानीमः।
2. सरित्-शब्दस्य रूपाणि जानीमः।
3. जगत्-शब्दस्य रूपाणि जानीमः।
4. भवत्-शब्दस्य पुंलिङ्गे रूपाणि जानीमः।
5. ज्ञातवत्-शब्दस्य पुंलिङ्गे रूपाणि जानीमः।

आदौ सुप्-प्रत्ययानां विभागं पश्यामः।

सुप्-प्रत्ययानाम् आदौ विद्यमानं वर्णमनुसृत्य अजादि-प्रत्ययः, हलादि-प्रत्ययः इति द्विधा विभागः।

अयञ्च विभागः इत्संज्ञायाः लोपात् परमेव कर्तव्यः।

अजादि-प्रत्ययाः - औ, अस्(जस्), अम्, औ(औट्), अस्(जस्), अस्(शस्), आ(टा), ए(ङे), अस्(ङसि), अस्(ङस्), ओस्, आम्, इ(ङि), ओस्।

हलादि-प्रत्ययाः - भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप्।

सामान्यतया हलन्तेभ्यः शब्देभ्यः अजादिषु सुप्-प्रत्ययेषु, भेदः न कश्चन भवति। हलादिषु विभक्तिप्रत्ययेषु परेषु एव सन्धिः, विशेषविधयः अपि सन्ति। तत्र आदौ तकारान्तानां शब्दानां रूपाणि पश्यामः। तकारान्तेषु सामान्यानां त्रिषु लिङ्गेषु प्रक्रियां पठामः। ततः विशिष्टानां प्रक्रियां पठामः।

हलन्तेभ्यः परस्य प्रथमैकवचनस्य (सु-स्) लोपः भवति।

तकारान्तः पुंलिङ्गः मरुत्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मरुत्+सु(स्)→ मरुत्	मरुत्+औ→ मरुतौ	मरुत्+जस्(अस्)→ मरुतः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
द्वितीया	मरुत्+अम्→ मरुतम्	मरुत्+औट्(औ)→ मरुतौ	मरुत्+शस्(अस्)→ मरुतः
तृतीया	मरुत्+टा(आ)→ मरुता	मरुत्+भ्याम्→ मरुद्भ्याम्	मरुत्+भिस्→ मरुद्भिः
चतुर्थी	मरुत्+ङे(ए)→ मरुते	मरुत्+भ्याम्→ मरुद्भ्याम्	मरुत्+भ्यस्→ मरुद्भ्यः
पञ्चमी	मरुत्+ङसि (अस्)→मरुतः	मरुत्+भ्याम्→ मरुद्भ्याम्	मरुत्+भ्यस्→ मरुद्भ्यः
षष्ठी	मरुत्+ङस् (अस्)→मरुतः	मरुत्+ओस्→ मरुतोः	मरुत्+आम्→ मरुताम्
सप्तमी	मरुत्+ङि(इ)→ मरुति	मरुत्+ओस्→ मरुतोः	मरुत्+सुप्(सु)→ मरुत्सु
सम्बोधनम्	हे मरुत्+सु(स्)→ हे मरुत्!	हे मरुत्+औ→ हे मरुतौ!	हे मरुत्+जस्(अस्)→ हे मरुतः!

1. हलन्तेभ्यः परस्य प्रथमा-एकवचनस्य सकारस्य लोपः।[1] मरुत्।
2. मरुत्-शब्दे अजादिषु प्रत्ययेषु परेषु विशिष्टं कार्यं किमपि न वर्तते। मरुतौ इत्यादि।
3. हलादिषु प्रत्ययेषु परेषु तु मरुत् इत्यस्य पदसंज्ञा भवति।[2] अतः तकारस्य दकारादेशः (जश्त्वसन्धिः)[3] कृतः। मरुद्भ्याम्-इत्यादि।

तकारान्तः स्त्रीलिङ्गः सरित्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	सरित्+सु(स्)→ सरित्	सरित्+औ→ सरितौ	सरित्+जस्(अस्)→ सरितः
द्वितीया	सरित्+अम्→ सरितम्	सरित्+औट्(औ)→ सरितौ	सरित्+शस्(अस्)→ सरितः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	सरित्+टा(आ)→ सरिता	सरित्+भ्याम्→ सरिद्भ्याम्	सरित्+भिस्→ सरिद्भिः
चतुर्थी	सरित्+ङे(ए)→ सरिते	सरित्+भ्याम्→ सरिद्भ्याम्	सरित्+भ्यस्→ सरिद्भ्यः
पञ्चमी	सरित्+ङसि(अस्)→ सरितः	सरित्+भ्याम्→ सरिद्भ्याम्	सरित्+ भ्यस्→ सरिद्भ्यः
षष्ठी	सरित्+ङस्(अस्)→ सरितः	सरित्+ओस्→ सरितोः	सरित्+आम्→ सरिताम्
सप्तमी	सरित्+ङि(इ)→ सरिति	सरित्+ओस्→ सरितोः	सरित्+सुप्(सु)→ सरित्सु
सम्बोधनम्	हे सरित्+सु(स्)→ हे सरित्!	हे सरित्+औ→ हे सरितौ!	हे सरित्+जस्(अस्)→ हे सरितः!

स्त्रीलिङ्गे अपि रूपाणि पुंलिङ्गवदेव भवन्ति।

तकारान्तः नपुंसकलिङ्गः जगत्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	जगत्+सु(स्)→ जगत्	जगत्+औ→ जगती	जगत्+जस्(अस्)→ जगन्ति
द्वितीया	जगत्+अम्→ जगत्	जगत्+औट्(औ)→ जगती	जगत्+शस्(अस्)→ जगन्ति
तृतीया	जगत्+टा(आ)→ जगता	जगत्+भ्याम्→ जगद्भ्याम्	जगत्+भिस्→ जगद्भिः
चतुर्थी	जगत्+ङे(ए)→ जगते	जगत्+भ्याम्→ जगद्भ्याम्	जगत्+भ्यस्→ जगद्भ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
पञ्चमी	जगत्+ङसि (अस्)→जगतः	जगत्+भ्याम्→ जगद्भ्याम्	जगत्+भ्यस्→ जगद्भ्यः
षष्ठी	जगत्+ङस्(अस्)→ जगतः	जगत्+ओस्→ जगतोः	जगत्+आम्→ जगताम्
सप्तमी	जगत्+ङि(इ)→ जगति	जगत्+ओस्→ जगतोः	जगत्+सुप्(सु)→ जगत्सु
सम्बोधनम्	हे जगत्+सु(स्)→ हे जगत्!	हे जगत्+औ→ हे जगती!	हे जगत्+जस्(अस्)→ हे जगन्ति!

1. नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति।[4]
2. औ,औट् प्रत्यययोः स्थाने शी-आदेशः।[5]
3. जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति।[6]
4. जस्-शसोः स्थाने आदिष्टस्य शि इत्यस्य **सर्वनामस्थानम्** इति संज्ञा।[7]
5. सर्वनामस्थाने परे नुम् आगमः भवति।[8]

1. जगत् + सु, अम् → जगत्।
2. जगत् + औ, औट् → जगत्। जगत् + शी जगत् + ई → जगती।
3. जगत् + जस्, शस् → जगत् + अस् जगत् + इ जगन्त् + इ → जगन्ति।

तकारान्तः पुंलिङ्गः भवत्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	भवत्+सु(स्)→ भवान्	भवत्+औ→ भवन्तौ	भवत्+जस्(अस्)→ भवन्तः
द्वितीया	भवत्+अम्→ भवन्तम्	भवत्+औट्(औ)→ भवन्तौ	भवत्+शस्(अस्)→ भवतः
तृतीया	भवत्+टा(आ)→ भवता	भवत्+भ्याम्→ भवद्भ्याम्	भवत्+भिस्→ भवद्भिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	भवत्+ङे(ए)→ भवते	भवत्+भ्याम्→ भवद्भ्याम्	भवत्+भ्यस्→ भवद्भ्यः
पञ्चमी	भवत्+ङसि(अस्)→ भवतः	भवत्+भ्याम्→ भवद्भ्याम्	भवत्+भ्यस्→ भवद्भ्यः
षष्ठी	भवत्+ङस्(अस्)→ भवतः	भवत्+ओस्→ भवतोः	भवत्+आम्→ भवताम्
सप्तमी	भवत्+ङि(इ)→ भवति	भवत्+ओस्→ भवतोः	भवत्+सुप्(सुप)→ भवत्सु
सम्बोधनम्	हे भवत्+सु(स्)→ हे भवन्!	हे भवत्+औ→ हे भवन्तौ !	हे भवत्+जस्(अस्)→ हे भवन्तः !

1. अत्र सर्वनामस्थानसंज्ञकेषु (सु, औ, जस्, अम्, औट्) प्रत्ययेषु न्(नुम्) आगमः भवति।[9]
2. सु-प्रत्यये परे उपधायाः दीर्घः भवति।[10] ततः नुमागमः।
3. हलन्तेभ्यः परस्य प्रथमा-एकवचनस्य सकारस्य लोपः।[11]
   भवत् + सु→भवत् + स्→भवात् + स्→भवान्त् + स्→भवान्त्→भवान्।
   भवत् + औ, औट्→भवत् + औ→भवन्त् + औ→भवन्तौ। एवं भवन्तः।
   भवत् + अम्→भवन्त् + अम्→भवन्तम्।
4. भवत् + अजादिप्रत्ययाः, प्रकृतिप्रत्यययोः संयोगः। (शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि) भवतः, भवता, भवते - इत्यादि।
5. भवत्+हलादिप्रत्ययाः, पदसंज्ञा।[12] पदान्तस्य झलः जशत्वम्।[13]

तकारान्तः पुंलिङ्गः ज्ञातवत्-शब्दः (पुंसि)

ज्ञातवत् - पुंलिङ्गः

ज्ञाधातोः क्तवतुप्रत्यये ज्ञातवत् इति निष्पन्नम्। क्तवतु इति उगित्। अतः ज्ञातवत् इति प्रातिपदिकस्य उगित्कार्याणि भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	ज्ञातवत्+सु(स्)→ ज्ञातवान्	ज्ञातवत्+औ→ ज्ञातवन्तौ	ज्ञातवत्+जस्(अस्)→ ज्ञातवन्तः
द्वितीया	ज्ञातवत्+अम्→ ज्ञातवन्तम्	ज्ञातवत्+औट् (औ)→ज्ञातवन्तौ	ज्ञातवत्+शस्(अस्)→ ज्ञातवतः
तृतीया	ज्ञातवत्+टा(आ)→ ज्ञातवता	ज्ञातवत्+भ्याम्→ ज्ञातवद्भ्याम्	ज्ञातवत्+भिस्→ ज्ञातवद्भिः
चतुर्थी	ज्ञातवत्+ङे(ए)→ ज्ञातवते	ज्ञातवत्+भ्याम्→ ज्ञातवद्भ्याम्	ज्ञातवत्+भ्यस्→ ज्ञातवद्भ्यः
पञ्चमी	ज्ञातवत्+ङसि (अस्)→ज्ञातवतः	ज्ञातवत्+भ्याम्→ ज्ञातवद्भ्याम्	ज्ञातवत्+भ्यस्→ ज्ञातवद्भ्यः
षष्ठी	ज्ञातवत्+ङस् (अस्)→ज्ञातवतः	ज्ञातवत्+ओस्→ ज्ञातवतोः	ज्ञातवत्+आम्→ ज्ञातवताम्
सप्तमी	ज्ञातवत्+ङि(इ)→ ज्ञातवति	ज्ञातवत्+ओस्→ ज्ञातवतोः	ज्ञातवत्+सुप्(सु)→ ज्ञातवत्सु
सम्बोधनम्	हे ज्ञातवत्+सु (स्)→हे ज्ञातवन्!	हे ज्ञातवत्+औ→ हे ज्ञातवन्तौ!	हे ज्ञातवत्+जस् (अस्)→हे ज्ञातवन्तः!

1. अत्र सर्वनामस्थानसंज्ञकेषु(सु, औ, जस्, अम्, औट्) प्रत्ययेषु न्(नुम्) आगमः भवति।[14]
2. सु-प्रत्यये परे उपधायाः दीर्घः अपि भवति।[15]
3. हलन्तेभ्यः परस्य प्रथमा-एकवचनस्य सकारस्य लोपः।[16]
4. ज्ञातवत् सु - सुप्रत्यये परे उपधायाः दीर्घः भवति।[17] ज्ञातवत् + स् - सुप्रत्ययस्य सर्वनामस्थानम् इति संज्ञा, तस्मिन् परे उगितः नुम् - आगमः भवति[18] - ज्ञातवान्त्, ज्ञातवन्त् स्, हलः परस्य सुप्रत्ययसकारस्य लोपः भवति।[19] - ज्ञातवान्त्, संयोगान्तस्य लोपः[20] - ज्ञातवान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. ज्ञातवत् औ/औट् औप्रत्ययस्य सर्वनामस्थासंज्ञा। सर्वनामस्थाने परे उगितः नुम्-आगमः।[21] ज्ञानवन्त् + औ → ज्ञानवन्तौ।
6. ज्ञातवत् जस् → जसः सर्वनामस्थानसंज्ञा। सर्वनामस्थाने परे उगितः नुम् आगमः। ज्ञातवन्त् + अस् → ज्ञातवन्तः।[22]
7. ज्ञातवत् अम् → अमः सर्वनामस्थानसंज्ञा। सर्वनामस्थाने परे उगितः नुम्-आगमः।[23] ज्ञातवन्त् + अम् → ज्ञातवन्तम्।
8. ज्ञातवत् + शस् → ज्ञातवत् अस् → ज्ञातवतः।
एवं टा, ङे, ङसि, ङस्, ओस्, आम्, ङि - एतेषु प्रत्ययेषु शसः इव प्रक्रिया ज्ञेया।
9. ज्ञातवत् + भ्याम्, भिस्, भ्यस्, सुप्। अत्र ज्ञातवत्-शब्दस्य पदसंज्ञा।[24] पदान्तस्य झलः जश्त्वं भवति।[25] ज्ञातवद्भ्याम्-इत्यादि।

स्त्रीलिङ्गे तु ज्ञातवत्-शब्दात् ङीपि[26] ज्ञातवती, अस्य रूपाणि गौरीशब्दवत् भवन्ति।

पाठसारः -

1. मरुत्-शब्दे अजादिषु प्रत्ययेयेषु परेषु विशिष्टं कार्यं किमपि न वर्तते। हलादिषु प्रत्ययेषु परेषु तु मरुत् इत्यस्य पदसंज्ञा भवति। अतः तकारस्य दकारादेशः (जश्त्वसन्धिः) कृतः।
2. सरित्-शब्दे अजादिषु प्रत्ययेषु परेषु विशिष्टं कार्यं किमपि न वर्तते। हलादिषु प्रत्ययेषु परेषु तु मरुत् इत्यस्य पदसंज्ञा भवति। अतः तकारस्य दकारादेशः(जश्त्वसन्धिः) कृतः।
3. जगत्-शब्दः - नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति। औ,औट् प्रत्यययोः स्थाने शी-आदेशः। जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति। शि इत्यस्य सर्वनामस्थानम् इति संज्ञा। सर्वनामस्थाने परे नुम् आगमः भवति।
4. भवत्-शब्दः - अत्र सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु (नुम्) आगमः भवति। सु-प्रत्यये परे उपधायाः दीर्घः अपि भवति।
5. ज्ञातवत्-शब्दः - अयं क्तवतु-प्रत्ययान्तः। अत्र कार्याणि भवत्-शब्दवत् एव भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यास:

एकेन वाक्येन समाधत्त -

1. हलन्तेभ्य: परस्य सुप्रत्ययस्य किं कार्यम्?
2. भवत्-शब्दस्य प्रथमैकवचने कानि कार्याणि भवन्ति?
3. ज्ञातवत्-शब्दस्य प्रथमैकवचने कानि कार्याणि भवन्ति?
4. जगत्-शब्दस्य सर्वनामस्थाने किं कार्यं भवति?

योग्यम् उत्तरं चिनुत -

1. मरुत्-शब्दस्य सुप्रत्यये परे नुम्-आगम:?
   अ) भवति आ) न भवति इ) विकल्पेन भवति
2. मरुत्-शब्दस्य सुप्रत्यये उपधादीर्घ:?
   अ) भवति आ) न भवति इ) विकल्पेन भवति
3. सरित् + औ - किं रूपम्?
   अ) सरिन्तौ आ) सरितौ इ) सरीन्तौ
4. सरित् + जस्-
   अ) सरिन्त: आ) सरीन्त: इ) सरित:
5. जगत्-शब्द: कस्मिन् लिङ्गे वर्तते?
   अ) स्त्रीलिङ्गे आ) पुंलिङ्गे इ) नपुंसकलिङ्गे
6. जगत् + औ - किं रूपम्?
   अ) जगती आ) जगन्ति इ) जगन्ति
7. भवत्-शब्दस्य पुंलिङ्गे प्रथमैकवचने किं रूपम्?
   अ) भवत् आ) भवन् इ) भवान्
8. भवत् + औ - किं रूपम्?
   अ) भवतौ आ) भवान्तौ इ) भवन्तौ
9. ज्ञातवत् + औ - पुंलिङ्गे किं रूपम्?
   अ) ज्ञातवतौ आ) ज्ञातवन्तौ इ) ज्ञातवान्तौ
10. ज्ञातवत् + अम् - पुंलिङ्गे किं रूपम्?
   अ) ज्ञातवन्तम् आ) ज्ञातवतम् इ) ज्ञातवान्तम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योजयत -

1. जगत् + जस्	जगति
2. जगत् + औ	जगन्ति
3. जगत् + ङि	जगतः
4. जगत् + ङस्	जगती

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. जगत् + औट्
2. मरुत् + भ्यस्
3. सरित् + ङे
4. ज्ञातवत् + ङसि
5. भवत् + ओस्

प्रक्रियायाः भेदान् लिखत -

1. भवत् + सु, मरुत् + सु
2. ज्ञातवान् + अम्, मरुम् + अम्
3. ज्ञातवत् + सु सम्बुद्धिः, मरुत् + सु सम्बुद्धिः
4. मरुत् + जस्, जगत् + जस्
5. मरुत् + अम्, जगत् + अम्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. भवन्तौ
2. ज्ञातवन्तः
3. ज्ञातवतः
4. मरुति
5. जगति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते।
2. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
3. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
4. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
5. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
6. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
7. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
8. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
9. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
10. अत्वसन्तस्य चाधातोः (6-4-14) - अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासंबुद्धौ सौ परे।
11. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते।
12. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
13. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
14. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
15. अत्वसन्तस्य चाधातोः (6-4-14) - अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासंबुद्धौ सौ परे।
16. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते।
17. अत्वसन्तस्य चाधातोः (6-4-14) - अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासंबुद्धौ सौ परे।
18. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
19. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

20. संयोगान्तस्य लोपः (8-2-23) - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।
21. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
22. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
23. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
24. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
25. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
26. उगितश्च (4-1-6) - उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः पाठः - तकारान्तशब्दाः(२)

प्रथमस्य पाठस्य पुनरावृत्तिः -

➢ मरुत्-शब्दे अजादिषु प्रत्ययेषु परेषु विशिष्टं कार्यं किमपि न वर्तते। हलादिषु प्रत्ययेषु परेषु तु मरुत् इत्यस्य पदसंज्ञा भवति। अतः तकारस्य दकारादेशः(जश्त्वसन्धिः) कृतः।

➢ सरित्-शब्दे अजादिषु प्रत्ययेषु परेषु विशिष्टं कार्यं किमपि न वर्तते। हलादिषु प्रत्ययेषु परेषु तु मरुत् इत्यस्य पदसंज्ञा भवति। अतः तकारस्य दकारादेशः(जश्त्वसन्धिः) कृतः।

➢ जगत्-शब्दः - नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति। औ,औट् प्रत्यययोः स्थाने शी-आदेशः। जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति। शि इत्यस्य **सर्वनामस्थानम्** इति संज्ञा। सर्वनामस्थाने परे नुम् आगमः भवति।

➢ भवत्-शब्दः - अत्र सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु (नुम्) आगमः भवति। सु-प्रत्यये परे उपधायाः दीर्घः अपि भवति।

➢ ज्ञातवत्-शब्दः - अयं क्तवतु-प्रत्ययान्तः। अत्र कार्याणि भवत्-शब्दवत् एव भवन्ति। एते अंशाः पठिताः।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे ज्ञातवत्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।
2. बुद्धिमत्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
3. बुद्धिमत्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।
4. गच्छत्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
5. गच्छत्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।

तकारान्तः नपुंसकलिङ्गः - ज्ञातवत्-शब्दः

ज्ञातवत्-शब्दः क्तवतु प्रत्ययान्तः। क्तवतु इति उगित्।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	ज्ञातवत्+सु(स्)→ ज्ञातवत्	ज्ञातवत्+औ→ ज्ञातवती	ज्ञातवत्+जस्(अस्)→ ज्ञातवन्ति

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
द्वितीया	ज्ञातवत्+अम्→ ज्ञातवत्	ज्ञातवत्+औट् (औ)→ज्ञातवती	ज्ञातवत्+शस्(अस्)→ ज्ञातवन्ति
तृतीया	ज्ञातवत्+टा (आ)→ज्ञातवता	ज्ञातवत्+भ्याम्→ ज्ञातवद्भ्याम्	ज्ञातवत्+भिस्→ ज्ञातवद्भिः
चतुर्थी	ज्ञातवत्+ङे(ए)→ ज्ञातवते	ज्ञातवत्+भ्याम्→ ज्ञातवद्भ्याम्	ज्ञातवत्+भ्यस्→ ज्ञातवद्भ्यः
पञ्चमी	ज्ञातवत्+ङसि (अस्)→ज्ञातवतः	ज्ञातवत्+भ्याम्→ ज्ञातवद्भ्याम्	ज्ञातवत्+भ्यस्→ ज्ञातवद्भ्यः
षष्ठी	ज्ञातवत्+ङस् (अस्)→ज्ञातवतः	ज्ञातवत्+ओस्→ ज्ञातवतोः	ज्ञातवत्+आम्→ ज्ञातवताम्
सप्तमी	ज्ञातवत्+ङि(इ)→ ज्ञातवति	ज्ञातवत्+ओस्→ ज्ञातवतोः	ज्ञातवत्+सुप्(सु)→ ज्ञातवत्सु
सम्बोधनम्	हे ज्ञातवत्+सु→ हे ज्ञातवत्!	हे ज्ञातवत्+औ→ हे ज्ञातवती!	हे ज्ञातवत्+जस्→ हे ज्ञातवन्ति!

1. नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति।[1] ज्ञातवत्।
2. औ,औट् प्रत्यययोः स्थाने शी-आदेशः।[2]
   ज्ञातवत् + औ, औट् → ज्ञातवत् + शी → शकारस्य इत्संज्ञायां लोपे ज्ञातवती।
3. जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति।[3]
4. जस्-शसोः स्थाने आदिष्टस्य शि इत्यस्य सर्वनामस्थानम् इति संज्ञा।[4]
5. सर्वनामस्थाने परे नुम् आगमः भवति।[5]
   ज्ञातवत् + जस्, शस् → ज्ञातवत् + शि → ज्ञातवत् + इ → ज्ञातवन्त् + इ→ ज्ञातवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तकारान्तः पुंलिङ्गः - बुद्धिमत्-शब्दः

बुद्धिमत्-शब्दः मतुप्-प्रत्ययान्तः। मतुप्-प्रत्ययः उगित्।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बुद्धिमत्+सु(स्)→ बुद्धिमान्	बुद्धिमत्+औ→ बुद्धिमन्तौ	बुद्धिमत्+जस्(अस्)→ बुद्धिमन्तः
द्वितीया	बुद्धिमत्+अम्→ बुद्धिमन्तम्	बुद्धिमत्+औट् (औ)→बुद्धिमन्तौ	बुद्धिमत्+शस्(अस्)→ बुद्धिमतः
तृतीया	बुद्धिमत्+टा (आ)→बुद्धिमता	बुद्धिमत्+भ्याम्→ बुद्धिमद्भ्याम्	बुद्धिमत्+भिस्→ बुद्धिमद्भिः
चतुर्थी	बुद्धिमत्+ङे(ए)→ बुद्धिमते	बुद्धिमत्+भ्याम्→ बुद्धिमद्भ्याम्	बुद्धिमत्+भ्यस्→ बुद्धिमद्भ्यः
पञ्चमी	बुद्धिमत्+ङसि (अस्)→बुद्धिमतः	बुद्धिमत्+भ्याम्→ बुद्धिमद्भ्याम्	बुद्धिमत्+भ्यस्→ बुद्धिमद्भ्यः
षष्ठी	बुद्धिमत्+ङस् (अस्)→बुद्धिमतः	बुद्धिमत्+ओस्→ बुद्धिमतोः	बुद्धिमत्+आम्→ बुद्धिमताम्
सप्तमी	बुद्धिमत्+ङि(इ)→ बुद्धिमति	बुद्धिमत्+ओस्→ बुद्धिमतोः	बुद्धिमत्+सुप्(सु)→ बुद्धिमत्सु
सम्बोधनम्	हे बुद्धिमत्+सु→ हे बुद्धिमन्!	हे बुद्धिमत्+औ→ हे बुद्धिमन्तौ!	हे बुद्धिमत्+जस्→ हे बुद्धिमन्तः!

1. अत्र सर्वनामस्थानसंज्ञकेषु (सु, औ, जस्, अम्, औट्) प्रत्ययेषु न्(नुम्) आगमः भवति।[6]
2. सु-प्रत्यये परे उपधायाः दीर्घः भवति।[7] ततः नुम् आगमः। हलः परस्य सस्य लोपः[8], संयोगान्तस्य तकारस्य लोपः।[9]
3. बुद्धिमत् + सु→बुद्धिमत् + स्, बुद्धिमात् + स्→नुम् आगमः→बुद्धिमान्त्+ स्→ बुद्धिमान्त् → बुद्धिमान्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. बुद्धिमत् + औ, औट् → उगित्त्वात् सर्वनामस्थाने नुम्-आगमः → बुद्धिमन्तौ।
5. बुद्धिमत् + अम् → उगित्त्वात् सर्वनामस्थाने नुम्-आगमः → बुद्धिमन्तम्।
6. बुद्धिमत् + भ्याम्, भिस्, सुप् → अत्र बुद्धिमत्-शब्दस्य पदसंज्ञा।[10] पदान्तस्य झलः जश्त्वम्।[11] बुद्धिमद्भ्याम्, बुद्धिमद्भ्यः। सुपि-बुद्धिमत्सु।

स्त्रीलिङ्गे तु बुद्धिमत्-शब्दात् ङीपि[12] बुद्धिमती, अस्य रूपाणि गौरीशब्दवत् भवन्ति।

तकारान्तः नपुंसकलिङ्गः बुद्धिमत्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	बुद्धिमत्+सु(स्)→ बुद्धिमत्	बुद्धिमत्+औ→ बुद्धिमती	बुद्धिमत्+जस् (अस्)→बुद्धिमन्ति
द्वितीया	बुद्धिमत्+अम्→ बुद्धिमत्	बुद्धिमत्+औट् (औ)→बुद्धिमती	बुद्धिमत्+शस् (अस्)→बुद्धिमन्ति
तृतीया	बुद्धिमत्+टा (आ)→बुद्धिमता	बुद्धिमत्+भ्याम्→ बुद्धिमद्भ्याम्	बुद्धिमत् + भिस्→ बुद्धिमद्भिः
चतुर्थी	बुद्धिमत्+ङे (ए)→बुद्धिमते	बुद्धिमत्+भ्याम्→ बुद्धिमद्भ्याम्	बुद्धिमत्+भ्यस्→ बुद्धिमद्भ्यः
पञ्चमी	बुद्धिमत्+ङसि (अस्)→बुद्धिमतः	बुद्धिमत्+भ्याम्→ बुद्धिमद्भ्याम्	बुद्धिमत्+भ्यस्→ बुद्धिमद्भ्यः
षष्ठी	बुद्धिमत्+ङस् (अस्)→बुद्धिमतः	बुद्धिमत्+ओस्→ बुद्धिमतोः	बुद्धिमत्+आम्→ बुद्धिमताम्
सप्तमी	बुद्धिमत्+ङि(इ)→ बुद्धिमति	बुद्धिमत्+ओस्→ बुद्धिमतोः	बुद्धिमत्+सुप्(सु)→ बुद्धिमत्सु
सम्बोधनम्	हे बुद्धिमत्+सु→ हे बुद्धिमत्!	हे बुद्धिमत्+औ→ हे बुद्धिमती!	हे बुद्धिमत्+जस्→ हे बुद्धिमन्ति!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति।[13] बुद्धिमत्।
2. औ,औट् प्रत्यययोः स्थाने शी-आदेशः।[14]
   बुद्धिमत् + औ, औट् → बुद्धिमत् + शी → बुद्धिमती।
3. जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति।[15]
4. जस्-शसोः स्थाने आदिष्टस्य शि इत्यस्य सर्वनामस्थानम् इति संज्ञा।[16]
5. सर्वनामस्थाने परे नुम् आगमः भवति।[17]
   बुद्धिमत् + जस्, शस् → बुद्धिमत् + शि → बुद्धिमन्त् + इ → बुद्धिमन्ति।

तकारान्तः पुंलिङ्गः गच्छत्-शब्दः

गच्छत् इति शब्दः शतृ-अन्तः। शतृ इति उगित्।

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गच्छत्+सु(स्)→ गच्छन्	गच्छत्+औ→ गच्छन्तौ	गच्छत्+जस्(अस्)→ गच्छन्तः
द्वितीया	गच्छत्+अम्→ गच्छन्तम्	गच्छत्+औट्→ गच्छन्तौ	गच्छत्+शस्(अस्)→ गच्छतः
तृतीया	गच्छत्+टा(आ)→ गच्छता	गच्छत्+भ्याम्→ गच्छद्भ्याम्	गच्छत्+भिस्→ गच्छद्भिः
चतुर्थी	गच्छत्+ङे(ए)→ गच्छते	गच्छत्+भ्याम्→ गच्छद्भ्याम्	गच्छत्+भ्यस्→ गच्छद्भ्यः
पञ्चमी	गच्छत्+ङसि (अस्)→गच्छतः	गच्छत्+भ्याम्→ गच्छद्भ्याम्	गच्छत्+भ्यस्→ गच्छद्भ्यः
षष्ठी	गच्छत्+ङस् (अस्)→गच्छतः	गच्छत्+ओस्→ गच्छतोः	गच्छत्+आम्→ गच्छताम्
सप्तमी	गच्छत्+ङि(इ)→ गच्छति	गच्छत्+ओस्→ गच्छतोः	गच्छत्+सुप्(सु)→ गच्छत्सु
सम्बोधनम्	हे गच्छत्+सु→ हे गच्छन्!	हे गच्छत्+औ→ हे गच्छन्तौ!	हे गच्छत्+जस्→ हे गच्छन्तः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. अत्र सर्वनामस्थानसंज्ञकेषु प्रत्येषु परेषु न्(नुम्) आगमः भवति।[18]

स्त्रीलिङ्गे तु शतृ-प्रत्ययान्तात् ङीप् भवति[19] अतः अस्य रूपाणि गौरीशब्दवत् भवन्ति।

2. हलः परस्य सस्य लोपः।[20] संयोगान्तस्य तस्य लोपः।[21]

गच्छत् + सु→गच्छत् + स्→गच्छन्त् + स्→गच्छन्त्→गच्छन्।

गच्छत् + औ, जस्, अम्, औट्→गच्छत् + औ, अस्, अम्→नुम्-आगमः→ गच्छन्तौ, गच्छन्तः, गच्छन्तम्।

गच्छत् + भ्याम्, भिस्, भ्यस्, सुप्→पदसंज्ञा।[22] सुपं विहाय अन्यत्र तस्य जश्त्वम्[23]→गच्छद्भ्याम्, गच्छद्भिः, गच्छद्भ्यः, गच्छत्सु।

तकारान्तः नपुंसकलिङ्गः गच्छत्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गच्छत्+सु(स्)→ गच्छत्	गच्छत्+औ→ गच्छन्ती	गच्छत्+जस्(अस्)→ गच्छन्ति
द्वितीया	गच्छत्+अम्→ गच्छत्	गच्छत्+औट्→ गच्छन्ती	गच्छत्+शस्(अस्)→ गच्छन्ति
तृतीया	गच्छत्+टा(आ)→ गच्छता	गच्छत्+भ्याम्→ गच्छद्भ्याम्	गच्छत्+भिस्→ गच्छद्भिः
चतुर्थी	गच्छत्+ङे(ए)→ गच्छते	गच्छत्+भ्याम्→ गच्छद्भ्याम्	गच्छत्+भ्यस्→ गच्छद्भ्यः
पञ्चमी	गच्छत्+ङसि (अस्)→गच्छतः	गच्छत्+भ्याम्→ गच्छद्भ्याम्	गच्छत्+भ्यस्→ गच्छद्भ्यः
षष्ठी	गच्छत्+ङस् (अस्)→गच्छतः	गच्छत्+ओस्→ गच्छतोः	गच्छत्+आम्→ गच्छताम्
सप्तमी	गच्छत्+ङि (इ)→गच्छति	गच्छत्+ओस्→ गच्छतोः	गच्छत्+सुप्(सु)→ गच्छत्सु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
सम्बोधनम्	हे गच्छत्+सु→ हे गच्छत्!	हे गच्छत्+औ→ हे गच्छन्ती!	हे गच्छत्+जस→ हे गच्छन्ति!

1. नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति।[24] गच्छत्।
2. औ,औट् प्रत्यययोः स्थाने शी-आदेशः।[25]
   गच्छत् + औ, औट् → गच्छत् + शी → नुम्-आगमः → गच्छन्ती।
3. शी-परे शतृप्रत्ययान्तानां नुम्-आगमः भवति।[26]
4. जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति।[27]
5. जस्-शसोः स्थाने आदिष्टस्य शि इत्यस्य सर्वनामस्थानम् इति संज्ञा।[28]
6. सर्वनामस्थाने परे नुम् आगमः भवति।[29]
   गच्छत् + जस्, शस् → गच्छत् + अस् → नुम्-आगमः → गच्छन्ति।

पाठसारः -

1. क्तवतुप्रत्ययान्तः ज्ञातवत्-शब्दः पठितः। नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति। औ, औट् प्रत्यययोः स्थाने शी-आदेशः। जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति। जस्-शसोः स्थाने आदिष्टस्य शि इत्यस्य सर्वनामस्थानम् इति संज्ञा।
2. मतुप्-प्रत्ययान्तः बुद्धिमत्-शब्दः पठितः। अत्र सर्वनामस्थानसंज्ञकेषु(सु, औ, जस्, अम्, औट्) प्रत्ययेषु न्(नुम्) आगमः भवति। सु-प्रत्यये परे उपधायाः दीर्घः अपि भवति।
3. शतृप्रत्ययान्तः गच्छत्-शब्दः पठितः। नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः भवति। औ, औट् प्रत्यययोः स्थाने शी-आदेशः। शी-परे शतृप्रत्ययान्तानां नुम्-आगमः भवति। जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति। अत्र सर्वनामस्थानसंज्ञकेषु प्रत्येषु परेषु न्(नुम्) आगमः भवति। उपधायाः दीर्घः न भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः

एकेन वाक्येन समाधत्त -

1. ज्ञातवत्-शब्दस्य नपुंसकलिङ्गे नुमागमः कदा भवति ?
2. गच्छत्-शब्दरूपेषु पुंलिङ्गे नुम्-आगमः कुत्र भवति ?
3. गच्छत्-शब्दस्य नपुंसकलिङ्गे प्रथमाविभक्तौ बहुवचने रूपं किं, तस्य च प्रक्रिया का ?
4. बुद्धिमत्-शब्दस्य पुंलिङ्गे द्वितीयैकवचने किं रूपम्, का प्रक्रिया ?

योग्यमुत्तरं चिनुत -

1. ज्ञातवत् + जस् - नपुंसकलिङ्गे जसः कः आदेशः ?
   अ) शी आ) शि इ) न कश्चन
2. ज्ञातवत् + अम् नपुंसकलिङ्गे किं कार्यम् ?
   अ) अमः लुक् आ) नुमागमः इ) उपधादीर्घः
3. बुद्धिमतः - इति कुत्र भवति ?
   अ) पञ्चम्येकवचने आ) षष्ठ्येकवचने इ) उभयत्र
4. बुद्धिमत् + सु - पुंलिङ्गे किं रूपम् ?
   अ) बुद्धिमन् आ) बुद्धिमान् इ) बुद्धिमन्त्
5. बुद्धिमत् + भ्याम् - किं रूपम् ?
   अ) बुद्धिमद्भ्याम् आ) बुद्धिमत्भ्याम् इ) बुद्धिमध्भ्याम्
6. बुद्धिमती - इति कुत्र भवति ?
   अ) प्रथमाद्विवचने (नपुं) आ) द्वितीयाद्विवचने (नपुं) इ) उभयत्र
7. गच्छत् + अम् - अत्र पुंलिङ्गे किं कार्यम् ?
   अ) उपधायाः दीर्घः आ) नुम्-आगमः इ) उभयम्
8. गच्छत् + सु नपुंसकलिङ्गे किं कार्यम् ?
   अ) सोः लोपः आ) सोः अम्-आदेशः इ) सोः शि-आदेशः
9. गच्छत् + शस् पुंलिङ्गे किं रूपम् ?
   अ) गच्छतः आ) गच्छन्तः इ) गच्छान्तः
10. मतुबन्तात् स्त्रियां कः प्रत्ययः ?
    अ) ङीष् आ) टाप् इ) ङीप्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योजयत -

1. बुद्धिमत् + औट्(पुं)	गच्छन्ती
2. बुद्धिमत् + औट्(नपुं)	गच्छन्तौ
3. गच्छत् + औट्(नपुं)	बुद्धिमन्तौ
4. गच्छत् + औट्(पुं)	बुद्धिमती

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. हे बुद्धिमत् + सु(नपुं)
2. हे बुद्धिमत् + सु(पुं)
3. हे गच्छत् + औ(पुं)
4. हे ज्ञातवत् + औ(नपुं)

प्रक्रियाया: भेदान् लिखत -

1. गच्छत् + सु, बुद्धिमत् + सु
2. बुद्धिमत् + सु (पुं), बुद्धिमत् + सु (नपुं)
3. गच्छत् + औ (पुं), गच्छत् + औ (नपुं)
4. बुद्धिमत् + जस् (पुं), बुद्धिमत् + जस् (नपुं)
5. गच्छत् + जस् (पुं), गच्छत् + जस् (नपुं)

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. गच्छति
2. ज्ञातवति
3. बुद्धिमतो:
4. बुद्धिमन्ति

---

1. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयो: स्वमोर्लुक् स्यात्।
2. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङ: शी स्यात्।
3. जश्शसो: शि: (7-1-20) - क्लीबादनयो: शि: स्यात्।
4. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
5. नपुंसकस्य झलच: (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागम: स्यात्सर्वनामस्थाने परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
7. अत्वसन्तस्य चाधातोः (6-4-14) - अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासंबुद्धौ सौ परे।
8. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात् परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सु ति सि इत्येतदपृक्तं हल् लुप्यते।
9. संयोगान्तस्य लोपः (8-2-23) - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।
10. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
11. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
12. उगितश्च (4-1-6) - उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्।
13. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
14. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
15. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
16. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
17. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
18. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
19. उगितश्च (4-1-6) - उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्।
20. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
21. संयोगान्तस्य लोपः (8-2-23) - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।
22. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
23. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
24. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
25. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
26. शप्श्यनोर्नित्यम् (7-1-81) - शप्श्यनोरात्परोः यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्याच्छीनद्योः परतः।
27. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
28. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
29. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयः पाठः - दकारान्तशब्दाः

द्वितीयस्य पाठस्य पुनरावृत्तिः -

1. क्तवतुप्रत्ययान्तः ज्ञातवत्-शब्दः पठितः। नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्) भवति। औ, औट् प्रत्यययोः स्थाने शी-आदेशः। जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति। जस्-शसोः स्थाने आदिष्टस्य शि इत्यस्य सर्वनामस्थानम् इति संज्ञा।
2. मतुप्-प्रत्ययान्तः बुद्धिमत्-शब्दः पठितः। अत्र सर्वनामस्थानसंज्ञकेषु(सु, औ, जस्, अम्, औट्) प्रत्ययेषु न(नुम्) आगमः भवति। सु-प्रत्यये परे उपधायाः दीर्घः अपि भवति।
3. शतृप्रत्ययान्तः गच्छत्-शब्दः पठितः। नपुंसकलिङ्गे सु, अम् प्रत्यययोः लोपः (लुक्)भवति। औ,औट् प्रत्यययोः स्थाने शी-आदेशः। शी-परे शतृप्रत्ययान्तानां नुम्-आगमः भवति। जस्-शस् प्रत्यययोः स्थाने शि-आदेशः भवति। अत्र सर्वनामस्थानसंज्ञकेषु प्रत्येषु परेषु न(नुम्) आगमः भवति। उपधायाः दीर्घः न भवति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे युष्मद्-शब्दस्य रूपाणि जानीमः।
2. अस्मद्-शब्दस्य रूपाणि पठामः।

दकारान्तः त्रिषु लिङ्गेषु समानरूपः युष्मद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	युष्मद्+सु(स्)→ त्वम्	युष्मद्+औ→ युवाम्	युष्मद्+जस्(अस्)→ यूयम्
द्वितीया	युष्मद्+अम्→ त्वाम्/ त्वा	युष्मद्+औट् (औ)→युवाम्/ वाम्	युष्मद्+शस्(अस्)→ युष्मान्/ वः
तृतीया	युष्मद्+टा (आ)→त्वया	युष्मद्+भ्याम्→ युवाभ्याम्	युष्मद्+भिस्→ युष्माभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्ति	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	युष्मद्+ङे(ए)→ तुभ्यम्/ते	युष्मद्+भ्याम्→ युवाभ्याम्/वाम्	युष्मद्+भ्यस्→ युष्मभ्यम्/वः
पञ्चमी	युष्मद्+ङसि (अस्)→त्वत्	युष्मद्+भ्याम्→ युवाभ्याम्	युष्मद्+भ्यस्→ युष्मत्
षष्ठी	युष्मद्+ङस् (अस्)→तव/ते	युष्मद्+ओस्→ युवयोः/वाम्	युष्मद्+आम्→ युष्माकम्/वः
सप्तमी	युष्मद्+ङि(इ)→ त्वयि	युष्मद्+ओस्→ युवयोः	युष्मद्+सुप्→ युष्मासु

मपर्यन्तम् - युष्मद्, अस्मद् शब्दयोः यः मकारः तावत् पर्यन्तम्।

1. प्रथमा-एकवचनम् - युष्मद् + सु।
   - सुस्थाने अम्-आदेशः भवति।[1] युष्मद् + अम्।
   - युष्मद्-शब्दे मपर्यन्तस्य त्व-आदेशः भवति।[2] युष्म् अद् + अम्→त्व अद् + अम्। त्व अद् अत्र पररूपम् एकादेशः।[3] त्वद् + अम्।
   - अदः लोपः भवति।[4] पूर्वरूपम् एकादेशः भवति।[5] त्व + अम्→त्वम्।
2. प्रथमा-द्विवचनम् - युष्मद् + औ।
   - औस्थाने अम्-आदेशः भवति। युष्मद् + अम्।
   - युष्मद्-शब्दे मपर्यन्तस्य युव-आदेशः।[6] युष्म् अद् + अम्→युव अद् + अम्। युव अद् अत्र पररूपम्। युवद् + अम्
   - प्रथमाद्विवचने युष्मद्-शब्दस्य दकारस्य आकारः आदेशः।[7] युव आ अम्। सवर्णदीर्घः। युवा अम्, पूर्वरूपम्। युवाम्।
3. प्रथमा-बहुवचनम् - युष्मद् + जस्।
   - जसः अम्-आदेशः।[8] युष्मद् + अम्।
   - जसि मपर्यन्तस्य यूय-आदेशः।[9] युष्म् अद् + अम्→यूय अद् + अम्। पररूपम्। यूयद् + अम्।
   - अद् इत्यस्य लोपः।[10] यूय् + अम्→यूयम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. द्वितीया-एकवचनम् - युष्मद् + अम्।
- ➢ अम: अम्-आदेश:।[11] युष्मद् + अम्।
- ➢ मपर्यन्तस्य त्व-आदेश:।[12] युष्म् अद् + अम्→त्व अद् + अम्। पररूपम्। त्वद् + अम्।
- ➢ युष्मद्-शब्दस्य दकारस्य द्वितीयायाम् आकारादेश:।[13] त्व आ + अम्। सवर्णदीर्घ:। त्वा + अम्। पूर्वरूपम्। त्वाम्।
- ➢ पदात् परस्य अपादादौ स्थितस्य द्वितीयाया: एकवचनान्तस्य युष्मद्-शब्दस्य(त्वाम्) त्वा-आदेश: भवति।[14] त्वा। उदाहरणम् - ग्राम: त्वा पश्यति।

5. द्वितीया-द्विवचनम् - युष्मद् + औट्।
- ➢ औट्-स्थाने अम्-आदेश:।[15] युष्मद् + अम्।
- ➢ युष्मद: मपर्यन्तस्य युव-आदेश:।[16] युष्म् अद् + अम्→युव अद् + अम्। पररूपम्। युवद् + अम्।
- ➢ द्वितीया-द्विवचने युष्मद: दकारस्य आकारादेश:।[17] युव आ + अम्। सवर्णदीर्घ:, पूर्वरूपं च। युवाम्।
- ➢ पदात् परस्य अपादादौ स्थितस्य द्वितीयाया: द्विवचनान्तस्य युष्मद्-शब्दस्य वाम्-आदेश:।[18] वाम्। उदाहरणम् - पातु वां विभु:

6. द्वितीया-बहुवचनम् - युष्मद् + शस्
- ➢ युष्मद: दस्य आकार:।[19] युष्म आ + अस्। सवर्णदीर्घ:। युष्मा + अस्।
- ➢ युष्मद: परस्य शस: अकारस्य नकारादेश:।[20] युष्मान्स्। संयोगान्तस्य लोप:। युष्मान्।
- ➢ पदात् परस्य अपादादौ स्थितस्य द्वितीयया: बहुवचनान्तस्य युष्मद्-शब्दस्य वस्-आदेश:।[21] सकारस्य रुत्वम्, विसर्गश्च। व:। पातु व: हरि:।

7. तृतीया-एकवचनम् - युष्मद् + टा।
- ➢ युष्मद्-शब्दस्य मपर्यन्तस्य त्व-आदेश:।[22] युष्म् अद् + आ→त्व अद् + आ। पररूपम्। त्वद् + आ।
- ➢ अनादेशे अजादौ विभक्तौ दकारस्य यकारादेश: भवति।[23] त्वय् + आ→त्वया।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8. तृतीया/चतुर्थी/पञ्चमी-द्विवचनम् - युष्मद् + भ्याम्।

➢ युष्मद्-शब्दस्य मपर्यन्तस्य युव-आदेशः।[24] युष्म् अद् + भ्याम्→युव अद् + भ्याम्। पररूपम्। युवद् + भ्याम्।

➢ अनादेशे हलादौ विभक्तौ परतः युष्मदः दकारस्य आकारादेशः।[25] युव आ + भ्याम्। सवर्णदीर्घः। युवाभ्याम्।

➢ पदात् परस्य अपादादौ स्थितस्य चतुर्थी-द्विवचनान्तस्य युष्मद्-शब्दस्य वाम्-आदेशः।[26] वाम्। चतुर्थी - सुखं वां ददातु।

9. तृतीया-बहुवचनम् - युष्मद् + भिस्।

➢ अनादेशे हलादौ विभक्तौ परतः युष्मदः दकारस्य आकारादेशः।[27] युष्म आ + भिस्। सवर्णदीर्घः। युष्माभिः।

10. चतुर्थी-एकवचनम् - युष्मद् + ङे।

➢ ङेस्थाने अम्-आदेशः।[28] युष्मद् + अम्।

➢ युष्मद्-शब्दस्य मपर्यन्तस्य तुभ्य-आदेशः।[29] युष्म् अद् + अम्→तुभ्य अद् + अम्। पररूपम्। तुभ्यद् + अम्।

➢ दकारस्य लोपः।[30] तुभ्य + अम्। पूर्वरूपम्। तुभ्यम्।

➢ पदात् परस्य अपादादौ स्थितस्य चतुर्थ्येकवचनान्तस्य युष्मद्-शब्दस्य ते-आदेशः।[31] ते। उदाहरणम् - हरिः पुण्यं ते दद्यात्।

11. चतुर्थी-बहुवचनम् - युष्मद् + भ्यस्।

➢ भ्यसः अभ्यम्-आदेशः भवति।[32] युष्मद् + अभ्यम्।

➢ युष्मद्-शब्दस्य अदः लोपः।[33] युष्म् + अभ्यम्→युष्मभ्यम्।

➢ पदात् परस्य अपादादौ स्थितस्य चतुर्थी-बहुवचनान्तस्य युष्मद्-शब्दस्य वस्-आदेशः।[34] सकारस्य रुत्वम्, विसर्गश्च। वः। उदाहरणम् - शिवः वः शिवं दद्यात्।

12. पञ्चमी-एकवचनम् - युष्मद् + ङसि।

➢ ङसेः अत्-आदेशः।[35] युष्मद् + अत्।

➢ युष्मद्-शब्दस्य मपर्यन्तस्य त्व-आदेशः।[36] युष्म् अद् + अत्→त्व अद् + अत्। पररूपम्। त्वद् + अत्।

➢ अद् इत्यस्य लोपः।[37] त्व् + अत्→त्वत्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

13. पञ्चमी-बहुवचनम् - युष्मद् + भ्यस्।
- भ्यस: अत्-आदेश: ।[38] युष्मद् + अत्।
- युष्मद: अद: लोप: ।[39] युष्म् + अत्→युष्मत्।

14. षष्ठी-एकवचनम् - युष्मद् + ङस्।
- ङस: अश्-आदेश: ।[40] युष्मद् + अश्→युष्मद् + अ।
- युष्मद्-शब्दस्य मपर्यन्तस्य तव-आदेश: ।[41] युष्म् अद् + अ→तव अद् + अ। पररूपम्। तवद् + अ।
- अद: लोप: ।[42] तव् + अ→तव।
- पदात् परस्य अपादादौ स्थितस्य षष्ठ्येकवचनान्तस्य युष्मद्-शब्दस्य ते-आदेश: ।[43] ते। उदाहरणम् - पुस्तकं ते स्वीकुरु।

15. षष्ठी/सप्तमी-द्विवचनम् - युष्मद् + ओस्।
- युष्मद्-शब्दस्य मपर्यन्तस्य युव-आदेश: ।[44] युष्म् अद् + ओस्→युव अद् + ओस्। पररूपम्। युवद् + ओस्।
- अनादेशे अजादौ विभक्तौ दकारस्य यकारादेश: भवति।[45] युवय् + ओस्→युवयोस्→युवयोर्→युवयो:।
- पदात् परस्य अपादादौ स्थितस्य षष्ठी-द्विवचनान्तस्य युष्मद्-शब्दस्य वाम्-आदेश: ।[46] वाम्। उदाहरणम् - ग्रामं वाम् आगच्छामि।

16. षष्ठी-बहुवचनम् - युष्मद् + आम्।
- आम: आकम्-आदेश: ।[47] युष्मद् + आकम्।
- अद: लोप: ।[48] युष्म् + आकम्→युष्माकम्।
- पदात् परस्य अपादादौ स्थितस्य षष्ठी-बहुवचनान्तस्य युष्मद्-शब्दस्य वस्-आदेश: ।[49] सकारस्य रुत्वम्, विसर्गश्च। व:। उदाहरणम् - शिव: व: त्राता।

17. सप्तमी-एकवचनम् - युष्मद् + ङि।
- युष्मद: मपर्यन्तस्य त्व-आदेश: ।[50] युष्म् अद् + इ→त्व अद् + इ। पररूपम्। त्वद् + इ।
- अनादेशे अजादौ विभक्तौ दकारस्य यकारादेश: भवति।[51] त्वय् + इ→त्वयि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

18. सप्तमी-बहुवचनम् - युष्मद् + सुप्। पकारस्य लोपः।

➢ अनादेशे हलादौ विभक्तौ परतः युष्मदः दकारस्य आकारादेशः।[52] युष्म आ + सु। सवर्णदीर्घः। युष्मासु।

दकारान्तः त्रिषु लिङ्गेषु समानरूपः अस्मद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अस्मद्+सु(स्)→ अहम्	अस्मद्+औ→ आवाम्	अस्मद्+जस्(अस्)→ वयम्
द्वितीया	अस्मद्+अम्→ माम्/मा	अस्मद्+औट् (औ)→आवाम्/नौ	अस्मद् + शस्(अस्)→ अस्मान्/नः
तृतीया	अस्मद्+टा(आ)→ मया	अस्मद्+भ्याम्→ आवाभ्याम्	अस्मद्+भिस्→ अस्माभिः
चतुर्थी	अस्मद्+ङे(ए)→ मह्यम्/मे	अस्मद्+भ्याम्→ आवाभ्याम्/नौ	अस्मद्+भ्यस्→ अस्मभ्यम्/नः
पञ्चमी	अस्मद्+ङसि (अस्)→मत्	अस्मद्+भ्याम्→ आवाभ्याम्	अस्मद्+भ्यस्→ अस्मत्
षष्ठी	अस्मद्+ङस् (अस्)→मम/मे	अस्मद्+ओस्→ आवयोः/नौ	अस्मद्+आम्→ अस्माकम्/नः
सप्तमी	अस्मद्+ङि(इ)→ मयि	अस्मद्+ओस्→ आवयोः	अस्मद्+सुप्→ अस्मासु

मपर्यन्तम् - युष्मद्, अस्मद् शब्दयोः यः मकारः तावत् पर्यन्तम्।

1. प्रथमा-एकवचनम् - अस्मद् + सु

➢ सुस्थाने अम्-आदेशः भवति।[53] अस्मद् + अम्।

➢ अस्मद्-शब्दस्य मपर्यन्तस्य अह-आदेशः भवति।[54] अस्म् अद् + अम्→अह अद् + अम्। पररूपम्।[55] अहद् + अम्।

➢ अदः लोपः भवति।[56] पूर्वरूपम् एकादेशः भवति।[57] अह + अम्→अहम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. प्रथमा-द्विवचनम् - अस्मद् + औ।
   - औस्थाने अम्-आदेशः भवति। अस्मद् + अम्।
   - अस्मद्-शब्दे मपर्यन्तस्य आव-आदेशः।[58] अस्म् अद् + अम् → आव अद् + अम्। पररूपम्। आवद् + अम्।
   - प्रथमाद्विवचने अस्मद्-शब्दस्य दकारस्य आकारः आदेशः।[59] आव आ अम्। सवर्णदीर्घः। आवा अम्। पूर्वरूपम्। आवाम्।
3. प्रथमा-बहुवचनम् - अस्मद् + जस्।
   - जसः अम्-आदेशः।[60] अस्मद् + अम्।
   - जसि मपर्यन्तस्य वय-आदेशः।[61] अस्म् अद् + अम्→वय अद् + अम्। पररूपम्। वयद् + अम्।
   - अद् इत्यस्य लोपः।[62] वय् + अम्→वयम्।
4. द्वितीया-एकवचनम् - अस्मद् + अम्।
   - अमः अम्-आदेशः।[63] अस्मद् + अम्।
   - मपर्यन्तस्य म-आदेशः।[64] अस्म् अद् + अम्→म अद् + अम्। पररूपम्। मद् + अम्।
   - अस्मद्-शब्दस्य दकारस्य द्वितीयायाम् आकारादेशः।[65] म आ + अम्। सवर्णदीर्घः। मा + अम्। पूर्वरूपम्। माम्।
   - पदात् परस्य अपादादौ स्थितस्य द्वितीयायाः एकवचनान्तस्य अस्मद्-शब्दस्य(माम्) मा-आदेशः भवति।[66] मा। उदाहरणम् - रामः मा पातु।
5. द्वितीया-द्विवचनम् - अस्मद् + औट्।
   - औट्-स्थाने अम्-आदेशः।[67] अस्मद् + अम्
   - अस्मदः मपर्यन्तस्य आव-आदेशः।[68] अस्म् अद् + अम्→आव अद् + अम्। पररूपम्। आवद् + अम्।
   - द्वितीया-द्विवचने अस्मदः दकारस्य आकारादेशः।[69] आव आ + अम्। सवर्णदीर्घः, पूर्वरूपं च। आवाम्।
   - पदात् परस्य अपादादौ स्थितस्य द्वितीयायाः द्विवचनान्तस्य अस्मद्-शब्दस्य नौ-आदेशः।[70] नौ। देवः नौ अवतु।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6. द्वितीया-बहुवचन् - अस्मद् + शस्।
   - अस्मदः दस्य आकारः।[71] अस्म आ + अस्। सवर्णदीर्घः। अस्मा + अस्।
   - अस्मदः परस्य शसः अकारस्य नकारादेशः।[72] अस्मान्स्। संयोगान्तस्य लोपः। अस्मान्।
   - पदात् परस्य अपादादौ स्थितस्य द्वितीययाः बहुवचनान्तस्य अस्मद्-शब्दस्य नस्-आदेशः।[73] सकारस्य रुत्वम्, विसर्गश्च। नः। उदा - पातु नः हरिः।
7. तृतीया-एकवचनम् - अस्मद् + टा।
   - अस्मद्-शब्दस्य मपर्यन्तस्य म-आदेशः।[74] अस्म् अद् + आ→म अद् + आ। पररूपम्। मद् + आ।
   - अनादेशे अजादौ विभक्तौ दकारस्य यकारादेशः भवति।[75] मय्+आ→मया।
8. तृतीया/चतुर्थी/पञ्चमी-द्विवचनम् - अस्मद् + भ्याम्।
   - अस्मद्-शब्दस्य मपर्यन्तस्य आव-आदेशः।[76] अस्म् अद् + भ्याम्→आव अद् + भ्याम्। पररूपम्। आवद् + भ्याम्।
   - अनादेशे हलादौ विभक्तौ परतः अस्मदः दकारस्य आकारादेशः।[77] आव आ + भ्याम्। सवर्णदीर्घः। आवाभ्याम्।
   - पदात् परस्य अपादादौ स्थितस्य चतुर्थी-द्विवचनान्तस्य अस्मद्-शब्दस्य नौ-आदेशः।[78] नौ। चतुर्थी - उदा - मोक्षं नौ देहि कृष्ण।
9. तृतीया-बहुवचनम् - अस्मद् + भिस्।
   - अनादेशे हलादौ विभक्तौ परे अस्मदः दकारस्य आकारादेशः।[79] अस्म आ + भिस्। सवर्णदीर्घः। अस्माभिः।
10. चतुर्थी-एकवचनम् - अस्मद् + ङे।
    - ङेस्थाने अम्-आदेशः।[80] अस्मद् + अम्।
    - अस्मद्-शब्दस्य मपर्यन्तस्य मह्य-आदेशः।[81] अस्म् अद् + अम्→मह्य अद् + अम्। पररूपम्। मह्यद् + अम्।
    - दकारस्य लोपः।[82] मह्य + अम्। पूर्वरूपम्। मह्यम्।
    - पदात् परस्य अपादादौ स्थितस्य चतुर्थ्येकवचनान्तस्य अस्मद्-शब्दस्य मे-आदेशः।[83] मे। उदा - शम्भुः पुण्यं मे दद्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

11. चतुर्थी-बहुवचनम् - अस्मद् + भ्यस्।

➢ भ्यसः अभ्यम्-आदेशः भवति।[84] अस्मद् + अभ्यम्।

➢ अस्मद्-शब्दस्य अदः लोपः।[85] अस्म् + अभ्यम्→अस्मभ्यम्।

➢ पदात् परस्य अपादादौ स्थितस्य चतुर्थी-बहुवचनान्तस्य अस्मद्-शब्दस्य नस्-आदेशः।[86] सकारस्य रुत्वम्, विसर्गश्च। नः। उदा - शिवः शिवं नः दद्यात्।

12. पञ्चमी-एकवचनम् - अस्मद् + ङसि।

➢ ङसेः अत्-आदेशः।[87] अस्मद् + अत्।

➢ अस्मद्-शब्दस्य मपर्यन्तस्य म-आदेशः।[88] अस्म् अद् + अत्→म अद् + अत्। पररूपम्। मद् + अत्।

➢ अद् इत्यस्य लोपः।[89] म् + अत्→मत्।

13. पञ्चमी-बहुवचनम् - अस्मद् + भ्यस्।

➢ भ्यसः अत्-आदेशः।[90] अस्मद् + अत्

➢ अस्मदः अदः लोपः।[91] अस्म् + अत्→अस्मत्।

14. षष्ठी-एकवचनम् - अस्मद् + ङस्।

➢ ङसः अश्-आदेशः।[92] अस्मद् + अश्→अस्मद् + अ

➢ अस्मद्-शब्दस्य मपर्यन्तस्य मम-आदेशः।[93] अस्म् अद् + अ→मम अद् + अ। पररूपम्। ममद् + अ

➢ अदः लोपः।[94] मम् + अ→मम।

➢ पदात् परस्य अपादादौ स्थितस्य षष्ठ्येकवचनान्तस्य अस्मद्-शब्दस्य मे-आदेशः।[95] मे। उदा - वचनं मे श्रुणु।

15. षष्ठी/सप्तमी-द्विवचनम् - अस्मद् + ओस्।

➢ अस्मद्-शब्दस्य मपर्यन्तस्य आव-आदेशः।[96] अस्म् अद् + ओस्→आव अद् + ओस्। पररूपम्। आवद् + ओस्।

➢ अनादेशे अजादौ विभक्तौ दकारस्य यकारादेशः भवति।[97] आवय् + ओस्→आवयोस्→आवयोर्→आवयोः।

➢ पदात् परस्य अपादादौ स्थितस्य षष्ठी-द्विवचनान्तस्य अस्मद्-शब्दस्य नौ-आदेशः।[98] नौ। उदाहरणम् - पार्वतीपरमेश्वरौ नौ पितरौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

16. षष्ठी-बहुवचनम् - अस्मद् + आम्।

➢ आम: आकम्-आदेश: ।[99] अस्मद् + आकम्।

➢ अद: लोप: ।[100] अस्म् + आकम्→अस्माकम्।

➢ पदात् परस्य अपादादौ स्थितस्य चतुर्थी-बहुवचनान्तस्य अस्मद्-शब्दस्य नस्-आदेश: ।[101] सकारस्य रुत्वम्, विसर्गश्च। न:। उदाहरणम् - हरि: न: त्राता।

17. सप्तमी-एकवचनम् - अस्मद् + ङि।

➢ अस्मद: मपर्यन्तस्य म-आदेश: ।[102] अस्म् अद् + इ→म अद् + इ। पररूपम्। मद् + इ।

➢ अनादेशे अजादौ विभक्तौ दकारस्य यकारादेश: भवति ।[103] मय् + इ→मयि।

18. सप्तमी-बहुवचनम् - अस्मद् + सुप्। पकारस्य लोप:।

➢ अनादेशे हलादौ विभक्तौ परत: अस्मद: दकारस्य आकारादेश: ।[104] अस्म आ + सु। सवर्णदीर्घ:। अस्मासु।

विभक्ति:	प्रकृत्यादेशा:		प्रत्ययादेशा:
	युष्मद्	अस्मद्	
सु	त्व, अद्-लोप:	अह, अद्-लोप:	अम्
औ/औट्	युव, दस्य आ	आव, दस्य आ	अम्
जस्	यूय, अद्-लोप:	वय, अद्-लोप:	अम्
अम्	त्व, दस्य आ	म, दस्य आ	अम्
शस्	दस्य आ	दस्य आ	अकारस्य न्
टा	त्व, दस्य य	म, दस्य अ	-
भ्याम्	युव, दस्य आ	आव, दस्य आ	-
भ्यस्	दस्य आ	दस्य आ	-
ङे	तुभ्य, द्-लोप:	मह्य,द्-लोप:	अम्
भ्यस्	अद्-लोप:	अद्-लोप:	अभ्यम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	प्रकृत्यादेशाः		प्रत्ययादेशाः
	युष्मद्	अस्मद्	
ङसि	त्व, अद्-लोपः	म, अद्-लोपः	अत्
भ्यस्	अद्-लोपः	अद्-लोपः	अत्
ङस्	तव, अद्-लोपः	मम, अद्-लोपः	अश्
ओस्	युव, दस्य य	आव, दस्य य	
आम्	अद्-लोपः	अद्-लोपः	आकम्
ङि	त्व, दस्य य	म, दस्य य	
सुप्	दस्य आ	दस्य आ	

पाठसारः -

1. युष्मद्-शब्दः - प्रत्ययादेशाः -
   - ➢ प्रथमाविभक्तिप्रत्ययानां, द्वितीयाविभक्तिप्रत्ययानाञ्च अम्-आदेशः।
   - ➢ शस्-प्रत्यये अकारस्य नकारादेशः।
   - ➢ भ्यसः अभ्यम्-आदेशः।
   - ➢ पञ्चमीविभक्तेः एकवचनस्य, बहुवचनस्य च स्थाने अत्-आदेशः।
   - ➢ ङसः अश्-आदेशः। षष्ठी बहुवचनस्य आकम्-आदेशः
2. युष्मद्-शब्दः - प्रकृत्यादेशाः, अन्ये च आदेशाः -
   - ➢ सुप्रत्यये परे युष्मद्-शब्दस्य मपर्यन्तस्य त्व-आदेशः।
   - ➢ प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी-द्विवचने युव-आदेशः।
   - ➢ प्रथमाद्विवचने युष्मदः दकारस्य आकारादेशः। जसि यूय-आदेशः।
   - ➢ एकत्वविवक्षायां द्वितीयाविभक्तौ, तृतीयाविभक्तौ, पञ्चमीविभक्तौ च युष्मद्-शब्दस्य मपर्यन्तस्य त्व-आदेशः।
   - ➢ द्वितीयाविभक्तौ युष्मदः दकारस्य आकारादेशः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

- पदात् परस्य द्वितीयैकवचनान्तस्य त्वा आदेशः, द्विवचनान्तस्य वाम् आदेशः, बहुवचनान्तस्य वस् आदेशः।
- अनादेशे अजादौ विभक्तौ दकारस्य यकारादेशः भवति।
- अनादेशे हलादौ विभक्तौ परे युष्मदः दकारस्य आकारादेशः।
- शेषे अदः लोपः भवति।
- ङस्-प्रत्यये परे युष्मदः मपर्यन्तस्य तव-आदेशः।

3. अस्मद्-शब्दः - प्रत्ययादेशाः -

- प्रथमाविभक्तिप्रत्ययानां, द्वितीयाविभक्तिप्रत्ययानाञ्च अम्-आदेशः।
- शस्-प्रत्यये अकारस्य नकारादेशः।
- भ्यसः अभ्यम्-आदेशः।
- पञ्चमीविभक्तेः एकवचनस्य, बहुवचनस्य च स्थाने अत्-आदेशः।
- ङसः अश्-आदेशः। षष्ठी बहुवचनस्य आकम्-आदेशः

4. अस्मद्-शब्दः - प्रकृत्यादेशाः -

- सुप्रत्यये परे अस्मद्-शब्दस्य मपर्यन्तस्य अह-आदेशः।
- प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी - द्विवचने आव-आदेशः।
- प्रथमाद्विवचने अस्मदः दकारस्य आकारादेशः। जसि वय-आदेशः।
- एकत्वविवक्षायां द्वितीयाविभक्तौ, तृतीयाविभक्तौ, पञ्चमीविभक्तौ च अस्मद्-शब्दस्य मपर्यन्तस्य म-आदेशः।
- द्वितीयाविभक्तौ अस्मदः दकारस्य आकारादेशः।
- पदात् परस्य द्वितीयैकवचनान्तस्य मा आदेशः, द्विवचनान्तस्य नौ आदेशः, बहुवचनान्तस्य नस् आदेशः।
- अनादेशे अजादौ विभक्तौ दकारस्य यकारादेशः भवति।
- अनादेशे हलादौ विभक्तौ परतः अस्मदः दकारस्य आकारादेशः।
- शेषे अदः लोपः भवति।
- ङस्-प्रत्यये परे अस्मदः मपर्यन्तस्य मम-आदेशः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः

एकेन वाक्येन समाधत्त -

1. पदात् परयोः अपदादौ स्थितयोः युष्मदस्मदोः कासु विभक्तिषु के च आदेशाः उक्ताः?
2. दकारस्य यकारादेशः कदा भवति?
3. दकारस्य आकारादेशः कदा भवति?
4. अमादेशः केषां भवति?
5. म-आदेशः कस्य कदा भवति?

योग्यमुत्तरं चिनुत -

1. युष्मद् + ङि - अत्र युष्मदः कः आदेशः?
   अ) मम　　आ) तव　　इ) म
2. युष्मद् + भ्यस् पञ्चम्यां कः आदेशः?
   अ) अभ्यम्　　आ) भ्याम्　　इ) अत्
3. युष्मद् + ङसि - युष्मदः कः आदेशः?
   अ) तव　　आ) त्वा　　इ) त्व
4. त्वद् + ङि - दकारस्य कः आदेशः?
   अ) आकारः　　आ) यकारः　　इ) लोपः
5. युष्मद् + ङे - ङेस्थाने कः आदेशः?
   अ) अत्　　आ) अम्　　इ) अश्
6. अस्मद् + सु - अत्र दकारस्य किं कार्यम्?
   अ) यकारादेशः　　आ) आकारादेशः　　इ) लोपः
7. अस्मद् + भ्यस् - चतुर्थ्यां भ्यसः कः आदेशः?
   अ) भ्याम्　　आ) अभ्यम्　　इ) अश्
8. अस्मद् + ङे - अस्मदः कः आदेशः?
   अ) मह्य　　आ) मम　　इ) म
9. मह्यद् + अम् - दकारस्य किं कार्यम्?
   अ) आकारः　　आ) यकारः　　इ) लोपः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

10. अस्मद् + शस् - अत्र शसः किं कार्यम् ?
   अ) सकारस्य नकारः
   आ) शसः अकारस्य नकारः
   इ) अम्-आदेशः

योजयत -

1. युष्मद् + सु	मह्य-आदेशः
2. अस्मद् + ङस्	त्व-आदेशः
3. युष्मद् + ङस्	मम-आदेशः
4. अस्मद् + ङे	तव-आदेशः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. गृहम् अस्मद् + ङस् इदम्।
2. किं युष्मद् + ङे रोचते।
3. का पूः युष्मद् + ङस्।
4. ग्रामः अस्मद् + भ्याम् दीयते।
5. कः अस्मद् + शस् आह्वयति

प्रक्रियायाः भेदान् लिखत -

1. मम, मे
2. युवभ्याम्, वाम्
3. अस्माकम्, नः
4. त्वाम्, त्वा
5. तुभ्यम्, ते

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. ग्रामः वां स्वम्।
2. जनपदः नः पश्यति।
3. सह नाववतु।
4. ग्रामः मे स्वम्।
5. ग्रामः वां पश्यति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
2. त्वाहौ सौ (7-2-94) - युष्मदस्मदोर्मपर्यन्तस्य त्व अह इत्येतावादेशौ स्तः सौ परे।
3. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात्।
4. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
5. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
6. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
7. प्रथमायाश्च द्विवचने भाषायाम् (7-2-88) - इह युष्मदस्मदोराकारोऽन्तादेशः स्यात्।
8. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
9. यूयवयौ जसि (7-2-93) - युष्मदस्मदः मपर्यन्तस्य जसि परतः यूय वय इत्येतावादेशौ भवतः।
10. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
11. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
12. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
13. द्वितीयायाञ्च (7-2-87) - युष्मदस्मदोराकारः स्यात्।
14. त्वामौ द्वितीयायाः (8-1-23) - द्वितीयैकवचनान्तयोस्त्वा मा एतौ स्तः।
15. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
16. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
17. द्वितीयायाञ्च (7-2-87) - युष्मदस्मदोराकारः स्यात्।
18. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ (8-1-20) - पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तस्तौ चानुदात्तौ।
19. द्वितीयायाञ्च (7-2-87) - युष्मदस्मदोराकारः स्यात्।
20. शसो न (7-1-29) - नेत्यविभक्तिकम्। युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात्।
21. बहुवचनस्य वस्नसौ (8-1-21) - उक्तविधयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।
22. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
23. योऽचि (7-2-89) - अनयोर्यकारादेशः स्यादनादेशेऽजादो परे।
24. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
25. युष्मदस्मदोरनादेशे (7-2-86) - अनयोराकारः स्यादनादेशे हलादौ परे।
26. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ (8-1-20) - पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तस्तौ चानुदात्तौ।
27. युष्मदस्मदोरनादेशे (7-2-86) - अनयोराकारः स्यादनादेशे हलादौ परे।
28. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
29. तुभ्यमह्यौ ङयि (7-2-95) - अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि।
30. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

31. तेमयावेकवचनस्य (8-1-22) - उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।
32. भ्यसोभ्यम् (7-1-30) - भ्यसः भ्यम्, अभ्यम्, वा आदेशः स्यात्।
33. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
34. बहुवचनस्य वस्नसौ (8-1-21) - उक्तविधयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।
35. एकवचनस्य च (7-1-32) - आभ्यां पञ्चम्येकवचनस्य अत्स्यात्।
36. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
37. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
38. पञ्चम्या अत् (7-1-31) - आभ्यां पञ्चम्या भ्यसोऽत्स्यात्।
39. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
40. युष्मदस्मद्भ्यां ङसोऽश् (7-1-27) - युष्मदः अस्मदः च परस्य ङसः अश्-आदेशः स्यात्।
41. तवममौ ङसि (7-2-96) - अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि।
42. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
43. तेमयावेकवचनस्य (8-1-22) - उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।
44. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
45. योऽचि (7-2-89) - अनयोर्यकारादेशः स्यादनादेशेऽजादौ परे।
46. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ (8-1-20) - पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तस्तौ चानुदात्तौ।
47. साम आकम् (7-1-33) - आभ्यां परस्य साम आकम् स्यात्।
48. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
49. बहुवचनस्य वस्नसौ (8-1-21) - उक्तविधयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।
50. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
51. योऽचि (7-2-89) - अनयोर्यकारादेशः स्यादनादेशेऽजादो परे।
52. युष्मदस्मदोरनादेशे (7-2-86) - अनयोराकारः स्यादनादेशे हलादौ परे।
53. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
54. त्वाहौ सौ (7-2-94) - युष्मदस्मदोर्मपर्यन्तस्य त्व अह इत्येतावादेशौ स्तः सौ परे।
55. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात्।
56. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
57. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
58. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
59. प्रथमायाश्च द्विवचने भाषायाम् (7-2-88) - इह युष्मदस्मदोराकारोऽन्तादेशः स्यात्।
60. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
61. यूयवयौ जसि (7-2-90) - युष्मदस्मदः मपर्यन्तस्य जसि परतः यूय वय इत्येतावादेशौ भवतः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

62. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतः युष्मदस्मदोः अन्त्यस्य लोपः स्यात्।
63. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
64. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
65. द्वितीयायाञ्च (7-2-87) - युष्मदस्मदोराकारः स्यात्।
66. त्वामौ द्वितीयायाः (8-1-23) - द्वितीयैकवचनान्तयोस्त्वा मा एतौ स्तः।
67. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
68. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
69. द्वितीयायाञ्च (7-2-87) - युष्मदस्मदोराकारः स्यात्।
70. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ (8-1-20) - पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तस्तौ चानुदात्तौ।
71. द्वितीयायाञ्च (7-2-87) - युष्मदस्मदोराकारः स्यात्।
72. शसो न (7-1-29) - नेत्यविभक्तिकम्। युष्मदस्मद्भ्यां परस्य शसो नकारः स्यात्।
73. बहुवचनस्य वस्नसौ (8-1-21) - उक्तविधयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।
74. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
75. योऽचि (7-2-89) - अनयोर्यकारादेशः स्यादनादेशेऽजादो परे।
76. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
77. युष्मदस्मदोरनादेशे (7-2-86) - अनयोराकारः स्यादनादेशे हलादौ परे।
78. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ (8-1-20) - पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तस्तौ चानुदात्तौ।
79. युष्मदस्मदोरनादेशे (7-2-86) - अनयोराकारः स्यादनादेशे हलादौ परे।
80. ङेप्रथमयोरम् (7-1-28) - युष्मदस्मद्भ्यां परस्य ङे इत्येतस्य प्रथमाद्वितीययोश्चामादेशः स्यात्।
81. तुभ्यमह्यौ ङयि (7-2-95) - अनयोर्मपर्यन्तस्य तुभ्यमह्यौ स्तो ङयि।
82. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
83. तेमयावेकवचनस्य (8-1-22) - उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।
84. भ्यसोभ्यम् - भ्यसः भ्यम्, अभ्यम्, वा आदेशः स्यात्।
85. शेषे लोपः (7-2-90)-आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
86. बहुवचनस्य वस्नसौ (8-1-21) - उक्तविधयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।
87. एकवचनस्य च (7-1-32) - आभ्यां पञ्चम्येकवचनस्य अत्स्यात्।
88. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
89. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
90. पञ्चम्या अत् (7-1-31) - आभ्यां पञ्चम्या भ्यसोऽत्स्यात्।
91. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

92. युष्मदस्मद्भ्यां ङसोऽश् (7-1-27) - युष्मदः अस्मदः च परस्य ङसः अश्-आदेशः स्यात्।
93. तवममौ ङसि (7-2-96) - अनयोर्मपर्यन्तस्य तवममौ स्तो ङसि।
94. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
95. तेमयावेकवचनस्य (8-1-22) - उक्तविधयोरनयोः षष्ठीचतुर्थ्येकवचनान्तयोस्ते मे एतौ स्तः।
96. युवावौ द्विवचने (7-2-92) - द्वयोरुक्तौ युष्मदस्मदोर्मपर्यन्तस्य युवावौ स्तो विभक्तौ।
97. योऽचि (7-2-89) - अनयोर्यकारादेशः स्यादनादेशेऽजादौ परे।
98. युष्मदस्मदोः षष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ (8-1-20) - पदात्परयोरपादादौ स्थितयोरनयोः षष्ठ्यादिविशिष्टयोर्वांनावित्यादेशौ स्तस्तौ चानुदात्तौ।
99. साम आकम् (7-1-33) - आभ्यां परस्य साम आकम् स्यात्।
100. शेषे लोपः (7-2-90) - आत्वयत्वनिमित्तेतरविभक्तौ परतो युष्मदस्मदोरन्त्यस्य लोपः स्यात्।
101. बहुवचनस्य वस्नसौ (8-1-21) - उक्तविधयोः षष्ठ्यादिबहुवचनान्तयोर्वस्नसौ स्तः।
102. त्वमावेकवचने (7-2-97) - एकस्योक्तौ युष्मदस्मदोर्मपर्यन्तस्य त्वमौ स्तो विभक्तौ।
103. योऽचि (7-2-89) - अनयोर्यकारादेशः स्यादनादेशेऽजादो परे।
104. युष्मदस्मदोरनादेशे (7-2-86) - अनयोराकारः स्यादनादेशे हलादौ परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थः पाठः - तद्-शब्दः, यद्-शब्दः

तृतीयस्य पाठस्य पुनरावृत्तिः -

प्रत्ययादेशाः - युष्मद्-शब्दे, अस्मद्-शब्दे च।

- प्रथमाविभक्तिप्रत्ययानां, द्वितीयाविभक्तिप्रत्ययानाञ्च अम्-आदेशः।
- शस्-अत्र अकारस्य नकारादेशः।
- भ्यसः अभ्यम्-आदेशः।
- पञ्चमीविभक्तेः एकवचनस्य ,बहुवचनस्य च स्थाने अत्-आदेशः।
- ङसः अश्-आदेशः। बहुवचनस्य आकम्-आदेशः।

प्रकृत्यादेशाः, अन्ये च आदेशाः - युष्मद्-शब्दस्य, अस्मद्-शब्दस्य च।

- सुप्रत्यये परे युष्मद्-अस्मदोः मपर्यन्तं त्व-अहौ आदेशौ भवतः।
- प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी - द्विवचने युव-आवौ आदेशौ भवतः।
- जसि यूय-वयौ आदेशौ। आकारादेशः प्रथमाद्विवचने दकारस्य।
- एकत्वविवक्षायां द्वितीयाविभक्तौ, तृतीयाविभक्तौ, पञ्चमीविभक्तौ च युष्मद्-अस्मदोः मपर्यन्तस्य त्व-मौ भवतः।
- द्वितीयाविभक्तौ दकारस्य आकारादेशः।
- पदात् परस्य द्वितीयैकवचनान्तस्य त्वा-मा इत्येतौ आदेशौ, द्विवचनान्तस्य वाम्-नौ आदेशौ, बहुवचनान्तस्य वस्-नस् आदेशौ च भवतः।
- अनादेशे अजादौ विभक्तौ दकारस्य यकारादेशः भवति।
- अनादेशे हलादौ विभक्तौ दकारस्य आकारादेशः।
- शेषे अदः लोपः भवति।
- ङस्-प्रत्यये परे युष्मद्-अस्मदोः मपर्यन्तस्य तव-मम-आदेशौ।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे तद्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
2. तद्-शब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
3. नपुंसकलिङ्गे तद्-शब्दस्य रूपाणि पठामः।
4. पुंलिङ्गे यद्-शब्दस्य रूपाणि पठामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दकारान्तः पुंलिङ्गः तद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	तद्+सु(स्)→सः	तद्+औ→तौ	तद्+जस्(अस्)→ते
द्वितीया	तद्+अम्→तम्	तद्+औट्→तौ	तद्+शस्(अस्)→तान्
तृतीया	तद्+टा(आ)→ तेन	तद्+भ्याम्→ ताभ्याम्	तद्+भिस्→ तैः
चतुर्थी	तद्+ङे(ए)→ तस्मै	तद्+भ्याम्→ ताभ्याम्	तद्+भ्यस्→ तेभ्यः
पञ्चमी	तद्+ङसि(अस्)→ तस्मात्	तद्+भ्याम्→ ताभ्याम्	तद्+भ्यस्→ तेभ्यः
षष्ठी	तद्+ङस्(अस्)→ तस्य	तद्+ओस्→ तयोः	तद्+आम्→ तेषाम्
सप्तमी	तद्+ङि(इ)→ तस्मिन्	तद्+ओस्→ तयोः	तद्+सुप्(सु)→ तेषु

तद् इति सर्वादिगणे अस्ति। अतः **सर्वनामसंज्ञा** भवति।[1]

1. तद् इति त्यदादिषु अस्ति। अतः विभक्तिषु परतः अकारादेशः भवति।[2]

> त्यद्, तद्, यद्,एतद्, इदम्, अदस्, एक, द्वि - इत्यादयः।

तद् + विभक्तिः

अ→त अ + विभक्तिः→पररूपम्।[3] →त + विभक्तिः।

2. तद्-शब्दस्य सुप्रत्यये परे अनन्त्यस्य तकारस्य सकारादेशः भवति।[4]

तद् + सु→तद् + स्→त अ + स्→त + स्→स + स्→सः।

> विभक्तौ अकारादेशे अदन्तः सम्पन्नः। अतः सर्वशब्दवत् रूपाणि भवन्ति।

3. तद् + औ, दकारस्य अकारादेशे त अ + औ, पररूपे एकादेशे[5] त + औ, वृद्धौ[6] तौ इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. अदन्तात् सर्वनामसंज्ञकात् परस्य जस्-प्रत्ययस्य शी-आदेशः भवति।[7] गुणः। तद् + जस्→त अ + जस्→त + जस्→त + शी→त + ई→ते।
5. तद् + अम्, दकारस्य अकारादेशे त अ + अम्, पररूपे एकादेशे त + अम्, पूर्वरूपे[8] तम्।
तद् शस् - तद् अस् दकारस्य अकारः - त अ अस् पररूपम् - त अस् पूर्वसवर्णदीर्घः - तास्। पूर्वसवर्णदीर्घात् परस्य सस्य नकारः - तान्।
6. तद् + टा, दकारस्य अकारादेशे, पररूपे एकादेशे त + टा इति जाते, टास्थाने इनादेशे[9] त + इन, गुणे कृते - तेन।
7. अदन्तस्य अङ्गस्य यञ्-आदौ सुपि अकारस्य दीर्घः भवति।[10] भ्याम्-प्रत्ययः यञादिः, सुप्-प्रत्ययः च। अतः दीर्घः। त + भ्याम्→ताभ्याम्। भ्याम् इति तृ.द्वि., च.द्वि., पं.द्वि. प्रत्ययः। अतः तेषु परेषु अकारस्य दीर्घः भवतीति।
8. अदन्तात् अङ्गात् परस्य भिसः स्थाने ऐस्-आदेशः भवति।[11] वृद्धिः। त + भिस्→त + ऐस्→तैः।
9. अदन्तात् सर्वनाम्नः परस्य ङे-प्रत्ययस्य स्मै-आदेशः भवति।[12]
तद् + ङे→त अ + ङे→त + ङे→त + स्मै→तस्मै।
10. अदन्तस्य अङ्गस्य झल्-आदौ सुपि अकारस्य एकारादेशः भवति।[13] भ्यस् इति झलादिः सुप्। अतः तस्मिन् परे अकारस्य एकारादेशः। त + भ्यस्→तेभ्यः। भ्यस् इति च.ब., पं.ब. प्रत्ययः। अतः स्थलद्वयेऽपि अकारस्य एकारादेशः।
11. अदन्तात् सर्वनाम्नः परस्य ङसि-प्रत्ययस्य स्मात् आदेशः भवति।[14]
तद् + ङसि→त अ + ङसि→त + ङसि→त + स्मात्→तस्मात्।
12. अदन्तात् अङ्गात् परस्य ङस्-प्रत्ययस्य स्य-आदेशः भवति।[15]
त + ङस्→त + स्य→तस्य।
13. अदन्तस्य अङ्गस्य ओस्-प्रत्यये परे अकारस्य एकारः आदेशः भवति।[16] त + ओस्→ते + ओस्→तय् + ओस्→तयोः। एकारस्य अचि परे अय्-आदेशः। ओस् इति ष.द्वि., स.द्वि. प्रत्ययः।
14. अदन्तात् सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[17] सुटि स् एव अवशिष्टः। आगमप्रत्यययोः संयोजनेन साम् इति भवति। सः झलादिः,

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

बहुवचनप्रत्ययः च। अतः अकारस्य एकारादेशः भवति।[18] सस्य षत्वम्। तद् + आम्→त अ + आम्→त + आम्→त + सुट् + आम्→त + स् + आम्→ते + साम्→तेषाम्।

15. अदन्तात् सर्वनाम्नः परस्य ङि-प्रत्ययस्य स्मिन्-आदेशः भवति।[19] तद् + ङि→त अ + ङि→त + ङि→त + स्मिन्→तस्मिन्।

16. त + सुप्→त + सु→ते + सु झलादौ बहुवचने अकारस्य एकारः। अकारं त्यक्त्वा अन्येभ्यः अच्-वर्णेभ्यः परस्य, आदेशसकारस्य, प्रत्ययावयव-सकारस्य च षकारादेशः भवति।[20] तेषु।

दकारान्तः स्त्रीलिङ्गः तद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	तद्+सु(स्)→सा	तद्+औ→ते	तद्+जस्(अस्)→ताः
द्वितीया	तद्+अम्→ताम्	तद्+औट्→ते	तद्+शस्(अस्)→ताः
तृतीया	तद्+टा(आ)→ तया	तद्+भ्याम्→ ताभ्याम्	तद्+भिस्→ ताभिः
चतुर्थी	तद्+ङे(ए)→ तस्यै	तद्+भ्याम्→ ताभ्याम्	तद्+भ्यस्→ ताभ्यः
पञ्चमी	तद्+ङसि(अस्)→ तस्याः	तद्+भ्याम्→ ताभ्याम्	तद्+भ्यस्→ ताभ्यः
षष्ठी	तद्+ङस्(अस्)→ तस्याः	तद्+ओस्→ तयोः	तद्+आम्→ तासाम्
सप्तमी	तद् + ङि(इ)→ तस्याम्	तद्+ओस्→ तयोः	तद्+सुप्→ तासु

1. तद् + सु दकारस्य अकारादेशे त अ + स्→त + स्। स्त्रियाम् अदन्तत्वात् टाप् प्रत्यये[21] त + टाप् + स्→त + आ + स्→ता + स् तकारस्य सकारादेशे सा + स्, आपः परत्वात् सस्य लोपः।[22] सा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिषु दकारस्य अकारादेशे त इति अदन्तः सम्पन्नः। तस्य स्त्रीत्वविवक्षायां टाप्-प्रत्यये ता इति आबन्तः सिद्धः। तस्य रूपाणि सर्वाशब्दवत् भवन्ति।

2. आबन्तात् परस्य औ-प्रत्ययस्य, औट्-प्रत्ययस्य च शी-आदेशः भवति।[23] शी-आदेशे शकारस्य इत्संज्ञा भवति।[24] तस्य लोपश्च भवति। अतः ईकारः अवशिष्टः। आकार-ईकारयोः गुणे, ते।
3. जसि, शसि च पूर्वसवर्णदीर्घः भवति।[25] ताः इति। अमि पूर्वरूपं भवति।[26] ताम्।
4. तद् + टा, अत्र दकारस्य अकारादेशे त अ + टा, पररूपे एकादेशे त + टा, स्त्रियां टाप् त + टाप् + टा→त + आ + टा→ता + टा→ता + आ, आपः एकारादेशः भवति टाप्रत्यये परे[27], ते + आ, अयादेशे तय् +आ→तया।
5. तद् + भ्याम्, विभक्तौ दकारस्य अकारादेशे त अ भ्याम्। पररूपे एकारादेशे त भ्याम्, स्त्रियां टाप् भ्याम्। त + आ + भ्याम्→सवर्णदीर्घे ताभ्याम्।
6. तद् + भिस्, विभक्तौ दकारस्य अकारादेशे त अ भिस्, पररूपे एकादेशे त + भिस्, स्त्रियां टाप्। त आ + भिस्→सवर्णदीर्घे ताभिः।
7. आप्-अन्तात् सर्वनाम्नः परेषां ङे, ङसि, ङस्, ङि प्रत्ययानां स्याट्-आगमः भवति। आपः ह्रस्वः अपि भवति।[28]
ता+ङे→ता+ए→ता+स्या+ए→त+स्या+ए→त+स्यै→तस्यै। वृद्धिः। ता+ङसि/ङस्→ता+अस्→ता+स्या+अस्→त+स्या+अस्→त+स्यास्→तस्याः।
8. ओसि परे आपः आकारस्य एकारः आदेशः भवति।[30]
ता + ओस्→ते + ओस्→तय् + ओस्→तयोः।
9. सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[31] सुट्-आगमे स् इति अवशिष्टः। तद् + आम्→त अ + आम्→त + आम्→त + टाप् + आम्→त + आ + आम्→ता + आम्→ता + स् + आम्→तासाम्।
ता + ङि→ता + आम्[29] →ता + स्या + आम्→त + स्या + आम्→तस्याम्।

दकारान्तः नपुंसकलिङ्गः तद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	तद्+सु(स्)→तत्	तद्+औ→ते	तद्+जस्(अस्)→तानि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
द्वितीया	तद् + अम्→तत्	तद्+औट्→ते	तद्+शस्(अस्)→तानि
तृतीया	तद्+टा(आ)→ तेन	तद्+भ्याम्→ ताभ्याम्	तद्+भिस्→ तैः
चतुर्थी	तद्+ङे(ए)→ तस्मै	तद्+भ्याम्→ ताभ्याम्	तद्+भ्यस्→ तेभ्यः
पञ्चमी	तद्+ङसि(अस्)→ तस्मात्	तद्+भ्याम्→ ताभ्याम्	तद्+भ्यस्→ तेभ्यः
षष्ठी	तद्+ङस्(अस्)→ तस्य	तद्+ओस्→ तयोः	तद्+आम्→ तेषाम्
सप्तमी	तद्+ङि(इ)→ तस्मिन्	तद्+ओस्→ तयोः	तद्+सुप्→ तेषु

1. तद् + सु/अम्, सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति।[32] अतः तद् इति अवशिष्टम्। प्रत्ययः लुप्तः। अतः दकारस्य अकारः न भवति। तकारस्य सकारः अपि न भवति। अन्त्यस्य दकारस्य विकल्पेन चर्त्वं(त्) भवति।[33] तत् इति। चर्त्वाभावे जश्त्वे तद् इति च।
2. तद् + औ/औट्, दकारस्य अकारादेशः। त अ + औ, पररूपम्। त + औ, औ-औटोः स्थाने शी-आदेशः।[34] गुणः। त + शी→त + ई→ते।
3. तद् + जस्/शस्, दकारस्य अकारः। त अ + जस्/शस्, पररूपम्। त + जस्/शस्, जस्-शसोः शि-आदेशः भवति।[35] त + शि→त + इ, सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधायाः दीर्घः भवति।[36] अजन्तस्य सर्वनामस्थाने परे नुम्-आगमः भवति।[37] तान् + इ→तानि।

जस्-शसोः स्थाने आदिष्टस्य शि-आदेशस्य **सर्वनामस्थानम्** इति संज्ञा।[38]

4. अन्यानि रूपाणि पुंलिङ्गवत् ज्ञेयानि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दकारान्तः पुंलिङ्गः यद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यद्+सु(स्)→यः	यद्+औ→यौ	यद्+जस्(अस्)→ये
द्वितीया	यद्+अम्→यम्	यद्+औट्→यौ	यद्+शस्(अस्)→यान्
तृतीया	यद्+टा(आ)→ येन	यद्+भ्याम्→ याभ्याम्	यद्+भिस्→ यैः
चतुर्थी	यद्+ङे(ए)→ यस्मै	यद्+भ्याम्→ याभ्याम्	यद्+भ्यस्→ येभ्यः
पञ्चमी	यद्+ङसि(अस्)→ यस्मात्	यद्+भ्याम्→ याभ्याम्	यद्+भ्यस्→ येभ्यः
षष्ठी	यद्+ङस्(अस्)→ यस्य	यद्+ओस्→ ययोः	यद्+आम्→ येषाम्
सप्तमी	यद्+ङि(इ)→ यस्मिन्	यद्+ओस्→ ययोः	यद्+सुप्→ येषु

1. यद् इति त्यदादिषु अस्ति। अतः विभक्तिषु परतः अकारादेशः भवति।[39]

त्यद्, तद्, यद्,एतद्, इदम्, अदस्, एक, द्वि - इति 8 त्यदादयः।

यद् + विभक्तिः

अ→य अ + विभक्तिः→पररूपम्।[40]→य + विभक्तिः

2. यद् + सु, दकारस्य अकारः, य अ + सु पररूपम्। य + सु→य + स्[41]→य + रु→य + र्[42] →यः।

अवशिष्टानि रूपाणि पुंलिङ्गे तद्-शब्दवत् भवन्ति।

3. यद् + औ, दकारस्य अकारादेशे य अ + औ, पररूपे एकादेशे[43] य + औ, वृद्धौ[44] यौ इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. अदन्तात् सर्वनामसंज्ञकात् परस्य जस्-प्रत्ययस्य शी-आदेशः भवति।[45] गुणः।
यद् + जस्→य अ + जस्→य + जस्→य + शी→य + ई→ये।
5. यद् + अम्, दकारस्य अकारादेशे य अ + अम्, पररूपे य + अम्, पूर्वरूपे[46] यम्।
यद् + शस् दकारस्य अकारः - य + अ + अस् पररूपम् - य अस्
पूर्वसवर्णदीर्घः - यास्। पूर्वसवर्णदीर्घात् परस्य सस्य नकारः - यान्।
6. यद् + टा, दकारस्य अकारादेशे, पररूपे य + टा इति जाते, टास्थाने इनादेशे[47]
य + इन, गुणे कृते - येन।
7. अदन्तस्य अङ्गस्य यञ्-आदौ सुपि अकारस्य दीर्घः भवति।[48] भ्याम्-प्रत्ययः
यञादिः, सुप्-प्रत्ययः च। अतः दीर्घः। य + भ्याम्→याभ्याम्। भ्याम् इति
तृ.द्वि., च.द्वि., पं.द्वि. प्रत्ययः। अतः तेषु परेषु अकारस्य दीर्घः भवतीति।
8. अदन्तात् अङ्गात् परस्य भिसः स्थाने ऐस्-आदेशः भवति।[49] वृद्धिः। य +
भिस्→य + ऐस्→यैः।
9. अदन्तात् सर्वनाम्नः परस्य ङे-प्रत्ययस्य स्मै-आदेशः भवति।[50]
यद् + ङे→य अ + ङे→य + ङे→य + स्मै→यस्मै।
10. अदन्तस्य अङ्गस्य झल्-आदौ सुपि अकारस्य एकारादेशः भवति।[51] भ्यस्
इति झलादिः सुप्। अतः तस्मिन् परे अकारस्य एकारादेशः।[52] य +
भ्यस्→येभ्यः। भ्यस् इति च.ब., पं.ब. प्रत्ययः। अतः स्थलद्वयेऽपि अकारस्य
एकारादेशः।
11. अदन्तात् सर्वनाम्नः परस्य ङसि-प्रत्ययस्य स्मात् आदेशः भवति।[53]
यद् + ङसि→य अ + ङसि→य + ङसि→य + स्मात्→यस्मात्।
12. अदन्तात् अङ्गात् परस्य ङस्-प्रत्ययस्य स्य-आदेशः भवति।[54]
यद् + ङस्→य अ + ङस्→य + ङस्→य + स्य→यस्य।
13. अदन्तस्य अङ्गस्य ओस्-प्रत्यये परे अकारस्य एकार-आदेशः भवति।[55]
यद् + ओस्→य अ + ओस्→य + ओस्→ये + ओस्→यय् + ओस्→ययोः।
एकारस्य अचि परे अय्-आदेशः। ओस् इति ष.द्वि., स.द्वि. प्रत्ययः।
14. अदन्तात् सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[56] सुटि स् एव अवशिष्टः,
आगमप्रत्यययोः संयोजनेन साम् इति भवति। सः झलादिः, बहुवचनप्रत्ययः च।
अतः अकारस्य एकारादेशः भवति।[57]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

यद् + आम्→य अ + आम्→य + आम्→य + सुट् + आम्→य + स् + आम्→ये + साम्→येषाम्।

15. अदन्तात् सर्वनाम्नः परस्य ङि-प्रत्ययस्य स्मिन्-आदेशः भवति।[58] यद् + ङि→य अ + ङि→य + ङि→य + स्मिन्→यस्मिन्।

16. यद् + सुप्→य अ + सुप्→य + सुप्→य + सु→ये + सु झलादौ बहुवचने अकारस्य एकारः। अकारं त्यक्त्वा अन्येभ्यः अच्-वर्णेभ्यः परस्य आदेशसकारस्य, प्रत्ययावयव-सकारस्य, च षकारादेशः भवति।[59] येषु।

पाठसारः -

1. तद्-शब्दः पुंलिङ्गः - तद्-शब्दस्य विभक्तौ परतः अकारादेशः। सर्वनामसंज्ञा च वर्तते। अतः तन्निमित्तकानि कार्याणि भवन्ति। सर्वशब्दवत् रूपाणि भवन्ति। तद्-शब्दस्य सुप्रत्यये परे अनन्त्यस्य तकारस्य सकारादेशः भवति।
2. तद्-शब्दः स्त्रीलिङ्गः - तद्-शब्दस्य विभक्तौ अकारादेशः भवति। विभक्तिषु दकारस्य अकारादेशे त इति अदन्तः सम्पन्नः। तस्य स्त्रीत्वविवक्षायां टाप्-प्रत्यये ता इति आबन्तः सिद्धः। तस्य रूपाणि सर्वाशब्दवत् भवन्ति।
3. तद्-शब्दः नपुंसकलिङ्गः - सुप्रत्ययस्य, अम्-प्रत्ययस्य च लुक् (लोपः) भवति। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः शि-आदेशः भवति। अजन्तस्य सर्वनामस्थाने नुम्-आगमः भवति।[60] सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधायाः दीर्घः भवति।[61] अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।
4. यद्-शब्दः पुंलिङ्गः - यद्-शब्दस्य विभक्तौ परतः अकारादेशः। सर्वनामसंज्ञा च वर्तते। अतः तन्निमित्तकानि कार्याणि भवन्ति। सर्वशब्दवत् रूपाणि भवन्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. सः इत्यस्य प्रक्रियां लिखत।
2. सा इत्यस्य प्रक्रियां लिखत।
3. तद् इत्यस्य नपुंसकलिङ्गे प्रथमैकवचने प्रक्रियां लिखत।
4. यौ इत्यस्य प्रक्रियां लिखत।
5. तस्याम् इत्यस्य प्रक्रियां लिखत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योग्यमुत्तरं चिनुत -

1. तद्(पुंलिङ्गे) + टा- टास्थाने आदेशः कः ?
   अ) ना आ) इन इ) या
2. तदः अनन्त्यस्य तकारस्य किं कार्यम् ?
   अ) लोपः आ) अ-आदेशः इ) सकारादेशः
3. तद् + ङसि - पुंलिङ्गे आदेशः कः ?
   अ) स्मिन् आ) स्मात् इ) स्मै
4. तद्-शब्दात् स्त्रियां कः प्रत्ययः ?
   अ) टाप् आ) ङीप् इ) ऊङ्
5. तद् + जस्, स्त्रीलिङ्गे जसः किं कार्यम् ?
   अ) लोपः आ) शी-आदेशः इ) न किमपि
6. ता + टा - अत्र किं कार्यम् ?
   अ) याट्-आगमः आ) आपः आकारस्य एकारः इ) न किमपि
7. तद् + औ - नपुंसकलिङ्गे औ-स्थाने कः आदेशः ?
   अ) शी आ) शि इ) उभयम्
8. यद् + सु - पुंलिङ्गे किं कार्यम् ?
   अ) दकारस्य अकारः आ) दकारस्य लोपः इ) सुप्रत्ययस्य लुक्
9. य + ओस् - अत्र किं कार्यम् ?
   अ) वृद्धिः आ) गुणः इ) अकारस्य एकारः
10. य + ङस् - अत्र किं कार्यम् ?
   अ) लुक् आ) सवर्णदीर्घः इ) स्य-आदेशः

योजयत -

1. त + आम्	तस्मिन्
2. ता + आम्	तस्याम्
3. त + ङि	तासाम्
4. ता + ङि	तेषाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. यद् + शस्
2. यद् + भ्याम्
3. तद् + ओस् (स्त्रियाम्)
4. तद् + ङसि(स्त्रियाम्)

प्रक्रियाभेदान् लिखत -

1. तद् + सु (पुं), तद् + सु (नपुं)
2. तद् + शस् (पुं), तद् + शस् (नपुं)
3. तद् + औट् (पुं), तद् + औट् (स्त्री)
4. तद् + औट् (नपुं), तद् + औट् (स्त्री)
5. तद् + जस् (पुं), तद् + जस् (नपुं)

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. तासु
2. तानि
3. तेभ्यः
4. यस्मिन्

---

1. सर्वादीनि सर्वनामानि (1-1-27) - सर्वादीनि शब्दस्वरूपाणि सर्वनामसंज्ञानि स्युः। सर्वादयः- सर्व, विश्व, उभ, उभय, डतर, डतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोः। त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु, किम्।
2. त्यदादीनामः (7-2-102) - एषामकारोऽन्तादेशः स्याद्विभक्तौ।
3. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात्।
4. तदोः सः सावनन्त्ययोः (7-2-106) - त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ परे।
5. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात्।
6. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
7. जसः शी (7-1-17) - अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्।
8. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

9. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
10. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घः स्यात्।
11. अतो भिस ऐस् (7-1-9) - अकारान्तादङ्गाद्भिस ऐस् स्यात्।
12. सर्वनाम्नः स्मै (7-1-14) - अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात्।
13. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
14. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
15. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
16. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकारः स्यात्।
17. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।
18. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
19. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
20. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
21. अजाद्यतष्टाप् (4-1-4) - अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
22. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
23. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।
24. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
25. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
26. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
27. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
28. सर्वनाम्नः स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्चह्रस्वः।
29. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
30. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
31. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।
32. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
33. वाऽवसाने (8-4-56) - अवसाने झलां चरो वा स्युः।
34. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
35. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
36. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
37. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
38. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

39. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
40. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परत: पररूपमेकादेश: स्यात्।
41. ससजुषो रु: (4-2-66) - पदान्तस्य सस्य "सजुष्" शब्दस्य च रु: स्यात्।
42. खरवसानयोर्विसर्जनीय: (8-3-15) - खरि अवसाने च परे रेफस्य विसर्जनीय: स्यात्पदान्ते।
43. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परत: पररूपमेकादेश: स्यात्।
44. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेश: स्यात्।
45. जस: शी (7-1-17) - अदन्तात्सर्वनाम्न: परस्य जस: शी स्यात्।
46. अमि पूर्व: (6-1-107) - अकोऽम्यचि परत: पूर्वरूपमेकादेश: स्यात्।
47. टाङसिङसामिनात्स्या: (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशा: स्यु:।
48. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घ: स्यात्।
49. अतो भिस ऐस् (7-1-9) - अकारान्तादङ्गाद्भिस ऐस् स्यात्।
50. सर्वनाम्न: स्मै (7-1-14) - अत: सर्वनाम्नो ङे इत्यस्य स्मै स्यात्।
51. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकार: स्यात्।
52. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकार: स्यात्।
53. ङसिङ्यो: स्मात्स्मिनौ (7-1-15) - अत: सर्वनाम्नो ङसिङ्योरेतौ स्त:।
54. टाङसिङसामिनात्स्या: (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशा: स्यु:।
55. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकार: स्यात्।
56. आमि सर्वनाम्न: सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्याम: सुडागम: स्यात्।
57. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकार: स्यात्।
58. ङसिङ्यो: स्मात्स्मिनौ (7-1-15) - अत: सर्वनाम्नो ङसिङ्योरेतौ स्त:।
59. आदेशप्रत्यययो: (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेश: प्रत्ययावयवश्च य: सकारस्तस्य मूर्धन्यादेश: स्यात्।
60. नपुंसकस्य झलच: (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागम: स्यात्सर्वनामस्थाने परे।
61. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घ: स्यादसंबुद्धौ सर्वनामस्थाने परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पञ्चमः पाठः - यद्-शब्दः(स्त्री), एतद्-शब्दः

चतुर्थस्य पाठस्य पुनरावृत्तिः -

➢ तद्-शब्दः पुंलिङ्गः - तद्-शब्दस्य विभक्तौ परतः अकारादेशः। सर्वनामसंज्ञा वर्तते। अतः तन्निमित्तकानि कार्याणि भवन्ति। सर्वशब्दवत् रूपाणि भवन्ति। तद्-शब्दस्य सुप्रत्यये परे अनन्त्यस्य तकारस्य सकारादेशः भवति।

➢ तद्-शब्दः स्त्रीलिङ्गः - तद्-शब्दस्य विभक्तौ अकारादेशः भवति। विभक्तिषु दकारस्य अकारादेशे त इति अदन्तः सम्पन्नः। तस्य स्त्रीत्वविवक्षायां टाप्-प्रत्यये ता इति आबन्तः सिद्धः। तस्य रूपाणि सर्वाशब्दवत् भवन्ति।

➢ तद्-शब्दः नपुंसकलिङ्गः - सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् भवति। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः शि-आदेशः भवति। अजन्तस्य सर्वनामस्थाने नुम्-आगमः भवति। सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधायाः दीर्घः भवति। अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।

➢ यद्-शब्दः पुंलिङ्गः - यद्-शब्दस्य विभक्तौ परतः अकारादेशः। सर्वनामसंज्ञा वर्तते। अतः तन्निमित्तकानि कार्याणि भवन्ति। सर्वशब्दवत् रूपाणि भवन्ति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे यद्-शब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
2. यद्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।
3. एतद्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
4. एतद्-शब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
5. एतद्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।

दकारान्तः स्त्रीलिङ्गः यद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यद्+सु(स्)→या	यद्+औ→ये	यद्+जस्(अस्)→याः
द्वितीया	यद्+अम्→याम्	यद्+औट्→ये	यद्+शस्(अस्)→याः
तृतीया	यद्+टा(आ)→ यया	यद्+भ्याम्→ याभ्याम्	यद्+भिस्→ याभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	यद्+ङे(ए)→ यस्यै	यद्+भ्याम्→ याभ्याम्	यद्+भ्यस्→ याभ्यः
पञ्चमी	यद्+ङसि(अस्)→ यस्याः	यद्+भ्याम्→ याभ्याम्	यद्+भ्यस्→ याभ्यः
षष्ठी	यद्+ङस्(अस्)→ यस्याः	यद्+ओस्→ ययोः	यद्+आम्→ यासाम्
सप्तमी	यद्+ङि(इ)→ यस्याम्	यद्+ओस्→ ययोः	यद्+सुप्(सु)→ यासु

1. यद् + सु दकारस्य अकारादेशे य अ + स्→पररूपे[1] य + स् स्त्रियाम् अदन्तत्वात् टाप् प्रत्यये य + टाप् + स्→य + आ + स्→या + स्। आपः परत्वात् सस्य लोपः।[2] या।

अवशिष्टानि रूपाणि स्त्रीलिङ्गे तद्-शब्दवत् भवन्ति।

2. आबन्तात् परस्य औ-प्रत्ययस्य, औट्-प्रत्ययस्य च शी-आदेशः भवति।[3] शी-आदेशे शकारस्य इत्संज्ञा भवति।[4] तस्य लोपश्च भवति। अतः ईकारः अवशिष्टः। आकार-ईकारयोः गुणे - ये।
3. जसि, शसि च पूर्वसवर्णदीर्घः भवति।[5] याः। अमि पूर्वरूपं भवति।[6] याम्।
4. यद् + टा, अत्र दकारस्य अकारादेशे य अ + टा, पररूपे य + टा, स्त्रियां टाप् य + टाप् + टा→य + आ + टा→या + टा→या + आ, आपः एकारादेशः भवति टाप्रत्यये परे।[7] ये + आ, अयादेशे यय् + आ→यया।
5. आप्-अन्तात् सर्वनाम्नः परेषां ङे, ङसि, ङस्, ङि प्रत्ययानां स्याट्-आगमः भवति। आपः ह्रस्वः अपि भवति।[8] वृद्धिः।
या + ङे→या + ए→या + स्या + ए→य + स्या + ए→य + स्यै→यस्यै।
या+ङसि/ङस्→या + अस्→या + स्या + अस्→य + स्या + अस्→य + स्यास्→यस्याः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

या + ङि→या + आम्[9] →या + स्या + आम्→य + स्या + आम्→यस्याम्।

6. ओसि परे आपः आकारस्य एकारः आदेशः भवति।[10]

यद् + ओस्→य अ + ओस्→य + ओस्→यद् टाप्+ ओस् →या + ओस्→ ये + ओस्→यय् + ओस्→ययोः।

7. सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[11] सुट्-आगमे स् इति अवशिष्टः।

यद् + आम्→य अ + आम्→य + आम्→य + टाप् + आम्→य + आ + आम्→या + आम्→या + स् + आम्→यासाम्।

दकारान्तः नपुंसकलिङ्गः यद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यद्+सु(स्)→यत्	यद्+औ→ये	यद्+जस्(अस्)→यानि
द्वितीया	यद्+अम्→यत्	यद्+औट्→ये	यद्+शस्(अस्)→यानि
तृतीया	यद्+टा(आ)→ येन	यद्+भ्याम्→ याभ्याम्	यद्+भिस्→ यैः
चतुर्थी	यद्+ङे(ए)→ यस्मै	यद्+भ्याम्→ याभ्याम्	यद्+भ्यस्→ येभ्यः
पञ्चमी	यद्+ङसि(अस्)→ यस्मात्	यद्+भ्याम्→ याभ्याम्	यद्+भ्यस्→ येभ्यः
षष्ठी	यद्+ङस्(अस्)→ यस्य	यद्+ओस्→ ययोः	यद्+आम्→ येषाम्
सप्तमी	यद्+ङि(इ)→ यस्मिन्	यद्+ओस्→ ययोः	यद्+सुप्→ येषु

अत्र सर्वाणि रूपाणि नपुंसकलिङ्गे तद्-शब्दवत् भवन्ति।

1. यद् + सु/अम्, सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति। अतः यद् इति अवशिष्टम्। प्रत्ययः लुप्तः। अतः दकारस्य अकारः न भवति। अन्त्यस्य दकारस्य विकल्पेन चर्त्वं(त्) भवति।[12] यत्। पक्षे जश्त्वे यद्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. यद् + औ/औट्, दकारस्य अकारादेश:। य अ + औ, पररूपम्। य + औ, औ-औटो: स्थाने शी-आदेश: ।[13] य + शी→य + ई→गुण:→ये।

3. यद् + जस्/शस्, दकारस्य अकार: य अ + जस्/शस्, पररूपम्। य + जस्/शस्, जस्-शसो: शि-आदेश: भवति।[14] य + शि→य + इ, अजन्तस्य सर्वनामस्थाने नुम्-आगम: भवति।[15] सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधाया: दीर्घ: भवति।[16] यान् + इ→यानि।

जस्-शसो: स्थाने आदिष्टस्य शि-आदेशस्य **सर्वनामस्थानम्** इति संज्ञा।

4. अन्यानि रूपाणि पुंलिङ्गवत् ज्ञेयानि।

दकारान्त: पुंलिङ्ग: एतद्-शब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतद्+सु(स्)→एष:	एतद्+औ→एतौ	एतद्+जस्(अस्)→एते
द्वितीया	एतद्+अम्→ एतम्/ एनम्	एतद्+औट्→ एतौ/एनौ	एतद्+शस्(अस्)→ एतान्/एनान्
तृतीया	एतद्+टा(आ)→ एतेन/एनेन	एतद्+भ्याम्→ एताभ्याम्	एतद्+भिस्→ एतै:
चतुर्थी	एतद्+ङे(ए)→ एतस्मै	एतद्+भ्याम्→ एताभ्याम्	एतद्+भ्यस्→ एतेभ्य:
पञ्चमी	एतद्+ङसि(अस्)→ एतस्मात्	एतद्+भ्याम्→ एताभ्याम्	एतद्+भ्यस्→ एतेभ्य:
षष्ठी	एतद्+ङस्(अस्)→ एतस्य	एतद्+ओस्→ एतयो:/एनयो:	एतद्+आम्→ एतेषाम्
सप्तमी	एतद्+ङि(इ)→ एतस्मिन्	एतद्+ओस्→ एतयो:/एनयो:	एतद्+सु→ एतेषु

1. एतद् इति त्यदादिषु अस्ति। अत: विभक्तिषु परत: अकारादेश: भवति।[17]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्यद्, तद्, यद्,एतद्, इदम्, अदस्, एक, द्वि - इति 8 त्यदादयः।

एतद् + विभक्तिः

अ→एत अ + विभक्तिः→पररूपम्।[18]→एत + विभक्तिः।

2. एतद्-शब्दस्य सुप्रत्यये परे तकारस्य सकारादेशः भवति।[19] तस्य सकारस्य आदेशत्वात् मूर्धन्यः षकारः आदेशः भवति।[20]

एतद् + सु→एतद् + स्→एत अ + स्→एत + स्→एस + स्→एष +स्→एषः। अवशिष्टानि पुंलिङ्गे तद्-शब्दवत् भवन्ति।

3. एतद् + औ, दकारस्य अकारादेशे एत अ + औ, पररूपे[21] एत + औ, वृद्धौ[22] एतौ।

4. अदन्तात् सर्वनामसंज्ञकात् परस्य जस्-प्रत्ययस्य शी-आदेशः भवति।[23]

एतद् + जस्→एत अ + जस्→एत + जस्→एत + शी→एत + ई→एते।

5. एतद् + अम्, दकारस्य अकारादेशे एत अ + अम्, पररूपे[24] एत + अम्, पूर्वरूपे एतम् इति।

अम्-औट्-शस्-टा-ओस्-प्रत्ययेषु परेषु एतद्-शब्दस्य अन्वादेशे एन-आदेशः भवति।[25]

अन्वादेशः - किञ्चत्कार्यं विधातुम् उपात्तस्य कार्यान्तरं विधातुं पुनरुपादानाम्। यथा - अनेन व्याकरणमधीतम्। एनं छन्दः अध्यापय।

6. द्वितीयाविभक्तौ एनादेशे एनम्, एनौ, एनान् इति च रूपाणि भवन्ति।

एतद् + शस् - एतद् अस्, दस्य अकारादेशः। एत अ अस् पररूपम् - एत अस्। पूर्वसवर्णदीर्घः - एतास्। पूर्वसवर्णदीर्घात् परस्य सस्य नकारः - एतान्।

7. एतद् + टा, दकारस्य अकारादेशे पररूपम्। एत + टा इति जाते, टास्थाने इनादेशे[26] एत + इन, गुणे कृते एतेन। एनादेशे कृते एनेन।

8. अदन्तस्य अङ्गस्य यञ्-आदौ सुपि अकारस्य दीर्घः भवति।[27] भ्याम्-प्रत्ययः यञादिः, सुप्-प्रत्ययः च। अतः दीर्घः। एतद् + भ्याम्→एत + अ + भ्याम्। एत + भ्याम्→एताभ्याम्। भ्याम् इति तृ.द्वि., च.द्वि., पं.द्वि. प्रत्ययः। अतः तेषु परेषु अकारस्य दीर्घः भवतीति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

9. अदन्तात् अङ्गात् परस्य भिसः स्थाने ऐस्-आदेशः भवति।[28]

एतद् + भिस्→एत + अ + भिस्→एत + भिस्→एत + ऐस्→वृद्धिः→एतैः।

10. अदन्तात् सर्वनाम्नः परस्य ङे-प्रत्ययस्य स्मै-आदेशः भवति।[29]

एतद् + ङे→एत अ + ङे→एत + ङे→एत + स्मै→एतस्मै।

11. अदन्तस्य अङ्गस्य झल्-आदौ सुपि अकारस्य एकारादेशः भवति।[30] भ्यस् इति झलादिः सुप्। अतः तस्मिन् परे अकारस्य एकारादेशः। एतद् + भ्यस्→एत + अ + भ्यस्→ एत + भ्यस्→एतेभ्यः। भ्यस् इति च.ब., पं.ब. प्रत्ययः। अतः स्थलद्वयेऽपि अकारस्य एकारादेशः।

12. अदन्तात् सर्वनाम्नः परस्य ङसि-प्रत्ययस्य स्मात् आदेशः भवति।[31]

एतद् + ङसि→एत अ + ङसि→एत + ङसि→एत + स्मात्→एतस्मात्।

13. अदन्तात् अङ्गात् परस्य ङस्-प्रत्ययस्य स्य-आदेशः भवति।[32]

एतद् + ङस्→एत + अ + ङस्→एत + ङस्→एत + स्य→एतस्य।

14. अदन्तस्य अङ्गस्य ओस्-प्रत्यये परे अकारस्य एकारः आदेशः भवति।[33] एतद् + ओस्→एत अ + ओस्→एत + ओस्→एते + ओस्→एकारस्य अचि परे अय्-आदेशः। एतय् + ओस्→एतयोः। अन्वादेशे-एनयोः। ओस् इति ष.द्वि., स.द्वि. प्रत्ययः।

15. अदन्तात् सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[34] सुटि स् एव अवशिष्टः। आगमप्रत्यययोः संयोजनेन साम् इति भवति। सः झलादिः, बहुवचनप्रत्ययः च। अतः अकारस्य एकारादेशः भवति।[35]

एतद् + आम्→एत + अ + आम्→एत + आम्→एत + सुट् + आम्→एत + स् + आम्→एते + साम्→षत्वम्। एतेषाम्।

16. अदन्तात् सर्वनाम्नः परस्य ङि-प्रत्ययस्य स्मिन्-आदेशः भवति।[36]

एतद् + ङि→एत अ + ङि→एत + ङि→एत + स्मिन्→एतस्मिन्।

17. एतद् + सुप्→एत अ + सुप्→एत + सुप्→एत + सु→एते + सु झलादौ बहुवचने अकारस्य एकारः। अकारं त्यक्त्वा अन्येभ्यः अच्-वर्णेभ्यः परस्य आदेशसकारस्य, प्रत्ययावयव-सकारस्य, च षकारादेशः भवति।[37] एतेषु।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दकारान्तः स्त्रीलिङ्गः एतद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतद्+सु(स्)→ एषा	एतद्+औ→ एते	एतद्+जस्(अस्)→ एताः
द्वितीया	एतद्+अम्→ एताम्/एनाम्	एतद्+औट्→ एते/ एने	एतद्+शस्(अस्)→ एताः/एनाः
तृतीया	एतद्+टा(आ)→ एतया/एनया	एतद्+भ्याम्→ एताभ्याम्	एतद्+भिस्→ एताभिः
चतुर्थी	एतद्+ङे(ए)→ एतस्यै	एतद्+भ्याम्→ एताभ्याम्	एतद्+भ्यस्→ एताभ्यः
पञ्चमी	एतद्+ङसि(अस्)→ एतस्याः	एतद्+भ्याम्→ एताभ्याम्	एतद्+भ्यस्→ एताभ्यः
षष्ठी	एतद्+ङस्(अस्)→ एतस्याः	एतद्+ओस्→ एतयोः/एनयोः	एतद्+आम्→ एतासाम्
सप्तमी	एतद्+ङि(इ)→ एतस्याम्	एतद्+ओस्→ एतयोः/एनयोः	एतद्+सुप्→ एतासु

1. एतद् + सु दकारस्य अकारादेशे एत अ + स्→एत + स्। स्त्रियाम् अदन्तत्वात् टाप् प्रत्यये एत + टाप् + स्→एत + आ + स्→एता + स् तकारस्य सकारादेशे, तस्य च मूर्धन्यः षकारः आदेशः भवति। एषा + स्, आपः परत्वात् सस्य लोपः। एषा।

अवशिष्टानि स्त्रीलिङ्गतद्-शब्दवत् भवन्ति।

2. आबन्तात् परस्य औ-प्रत्ययस्य, औट्-प्रत्ययस्य च शी-आदेशः भवति।[38] शी-आदेशे शकारस्य इत्संज्ञा भवति।[39] तस्य लोपश्च भवति। अतः ईकारः अवशिष्टः। आकार-ईकारयोः गुणे एते।
3. जसि, शसि च पूर्वसवर्णदीर्घः भवति।[40] अमि पूर्वरूपं भवति।[41]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयाविभक्तौ पूर्ववत् प्रक्रियायाम् - एताम्, एते, एताः। अन्वादेशे एनादेशे- एनाम्, एने, एनाः - इति च रूपाणि।

4. एतद् + टा, अत्र दकारस्य अकारादेशे एत अ + टा, पररूपे एकादेशे एत + टा, स्त्रियां टाप् एत + टाप् + टा→एत + आ + टा→एता + टा→एता + आ, आपः एकारादेशः भवति टाप्रत्यये परे[42], एते + आ, अयादेशे एतय् + आ→एतया। अन्वादेशे एनादेशे एनया।

5. आप्-अन्तात् सर्वनाम्नः परेषां ङे, ङसि, ङस्, ङि प्रत्ययानां स्याट्-आगमः भवति। आपः ह्रस्वः अपि भवति।[43]

एतद् + ङे, अत्र दकारस्य अकारादेशे एत अ + ङे, पररूपे एकादेशे एत + ङे, स्त्रियां टाप् एत + टाप् + ङे, एत + आ + ङे → एता + ए, आपः ह्रस्वः ङेप्रत्ययस्य स्याट्→आगमश्च→एत + स्या + ए→वृद्धि→एतस्यै।

एतद् + ङसि/ङस्, अत्र दकारस्य अकारादेशे एत अ + ङसि / ङस्, पररूपे एकादेशे एत + ङसि / ङस्, स्त्रियां टाप् एत + टाप् + ङसि/ ङस्, एत + आ + ङसि/ङस् एता + ङसि/ङस्→एता + अस्, आपः ह्रस्वः प्रत्यययोः स्याट् आगमश्च→एत + स्या + अस्, सवर्णदीर्घः→एतस्याः।

एतद् + ङि, अत्र दकारस्य अकारादेशे एत अ + ङि, ङिस्थाने आम्[44]→ आदेशः→एता + आम्, आपः ह्रस्वः प्रत्ययस्य स्याट् आगमश्च→एत + स्या + आम्, सवर्णदीर्घः→एतस्याः।

6. ओसि परे आपः आकारस्य एकारः आदेशः भवति।[45] एतद् + ओस्→एत अ + ओस् एत + टाप्→एत + ओस्→एते + ओस्→एतय् + ओस्→एतयोः। अन्वादेशे एनयोः।

7. सर्वनाम्नः परस्य आमः सुट्-आगमः भवति।[46] सुट्-आगमे स् इति अवशिष्टः। एतद् + आम्→एत + अ + आम्→एत + आम्→एत + टाप् + आम्→एत + आ + आम्→एता + आम्→एता + स् + आम्→एतासाम्।

8. एतद् + सुप्, अत्र दकारस्य अकारादेशे एत अ + सुप्, पररूपे एकादेशे एत + सु, स्त्रियां टाप् एत + टाप् + सु, एत आ सु → एतासु।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दकारान्तः नपुंसकलिङ्गः एतद्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	एतद्+सु(स्)→ एतत्/एतद्	एतद्+औ→ एते	एतद्+जस्(अस्)→ एतानि
द्वितीया	एतद्+अम्→एतत् एतद्/एनत्/एनद्	एतद्+औट्→ एते, एने	एतद्+शस्(अस्)→ एनानि
तृतीया	एतद्+टा(आ)→ एतेन, एनेन	एतद्+भ्याम्→ एताभ्याम्	एतद्+भ्यस्→ एतैः
चतुर्थी	एतद्+ङे(ए)→ एतस्मै	एतद्+भ्याम्→ एताभ्याम्	एतद्+भ्यस्→ एतेभ्यः
पञ्चमी	एतद्+ङसि(अस्)→ एतस्मात्	एतद्+भ्याम्→ एताभ्याम्	एतद्+भ्यस्→ एतेभ्यः
षष्ठी	एतद्+ङस्(अस्)→ एतस्य	एतद्+ओस्→ एतयोः/एनयोः	एतद्+आम्→ एतेषाम्
सप्तमी	एतद्+ङि(इ)→ एतस्मिन्	एतद्+ओस्→ एतयोः/एनयोः	एतद्+सु→ एतेषु

अस्य सर्वाणि रूपाणि नपुंसकलिङ्गे तद्-शब्दवत् भवन्ति।

1. एतद् + सु/अम्, सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् (लोपः) भवति। अतः एतद् इति अवशिष्टम्। अतः दकारस्य अकारः न भवति। तकारस्य सकारः अपि न भवति। अन्त्यस्य दकारस्य विकल्पेन चर्त्वं(त्) भवति।[47] एतद्, एतत्।
2. एतद् + औ/औट्, दकारस्य अकारादेशः एत अ + औ, पररूपम्। एत + औ, औ-औटोः स्थाने शी-आदेशः।[48] एत + शी→एत + ई→गुणः। एते।
3. एतद् + जस्/शस्, दकारस्य अकारः एत अ + जस्/शस्, पररूपम्, एत + जस्/शस्, जस्-शसोः शि-आदेशः भवति।[49] एत + शि→एत + इ, अजन्तस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सर्वनामस्थाने नुम्-आगमः भवति।[50] सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधायाः दीर्घः भवति।[51] एतान् + इ→एतानि।

द्वितीयाविभक्तौ, टा प्रत्यये, ओस् प्रत्यये च अन्वादेशे एतद् शब्दस्य स्थाने एनद् आदेशः।[52] अतः एनद्, एने, एनानि इति च रूपाणि द्वितीयाविभक्तौ भवन्ति। एवं टा प्रत्यये एतेन, एनेन इति रूपद्वयम्। ओस् प्रत्ययेऽपि एतयोः, एनयोः इति रूपद्वयम्।

जस्-शसोः स्थाने आदिष्टस्य शि-आदेशस्य **सर्वनामस्थानम्** इति संज्ञा।

4. अन्यानि रूपाणि पुंलिङ्गवत् ज्ञेयानि।

पाठसारः -

1. यद्-शब्दः स्त्रीलिङ्गः - यद्-शब्दस्य विभक्तौ परतः अकारादेशः। अदन्तत्वात् स्त्रियां टाप्। अयं सर्वनामसंज्ञकश्च। अतः आबन्तस्य सर्वनाम्नः यानि कार्याणि तानि अत्र भवन्ति। प्रथमैकवचनं विहाय अन्यानि रूपाणि स्त्रीलिङ्गे तद्-शब्दवत् भवन्ति।
2. यद्-शब्दः नपुंसकलिङ्गः - सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् भवति। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः शि-आदेशः भवति। अजन्तस्य सर्वनामस्थाने परे नुम्-आगमः भवति। सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधायाः दीर्घः भवति। अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।
3. एतद्-शब्दः पुंलिङ्गः - एतद्-शब्दस्य विभक्तौ परतः अकारादेशः, सुप्रत्यये अनन्त्यस्य तकारस्य सकारादेशः। प्रथमैकवचनं विहाय अन्यानि रूपाणि पुंलिङ्गे तद्-शब्दवत् भवन्ति।
4. एतद्-शब्दः स्त्रीलिङ्गः - एतद्-शब्दस्य विभक्तौ परतः अकारादेशः, विभक्तिषु दकारस्य अकारादेशे एत इति अदन्तः सम्पन्नः। तस्य स्त्रीत्वविवक्षायां टाप्-प्रत्यये एता इति आबन्तः सिद्धः। प्रथमैकवचने अनन्त्यस्य तकारस्य सकारः। तस्य च षकारः एषा। अन्यानि रूपाणि स्त्रीलिङ्गे तद्-शब्दवत् भवन्ति।
5. एतद्-शब्दः नपुंसकलिङ्गः - सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् भवति। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः शि-आदेशः भवति। अजन्तस्य सर्वनामस्थाने नुम्-आगमः भवति। सर्वनामस्थाने परतः नान्तस्य उपधायाः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दीर्घः भवति। अन्वादेशे द्वितीयाविभक्तौ, टाप्रत्यये, ओस् प्रत्यये च एनद् आदेशो भवति। अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. यद्-शब्दस्य स्त्रीलिङ्गे प्रथमाद्विवचने किं रूपम्? तस्य प्रक्रिया का?
2. एतद्-शब्दस्य पुंलिङ्गे तृतीयैकवचने किं रूपम्? कथं च प्रक्रिया?
3. यद्-शब्दस्य नपुंसकलिङ्गे षष्ठीबहुवचने किं रूपम्? प्रक्रिया च कथम्?
4. एतद्-शब्दस्य स्त्रीलिङ्गे षष्ठ्येकवचने किं रूपम्? प्रक्रिया का?
5. एतद्-शब्दस्य नपुंसकलिङ्गे द्वितीयाबहुवचने किं रूपम्? प्रक्रिया का?

योग्यमुत्तरं चिनुत -

1. या + ङे, प्रत्ययस्य किं कार्यम्?
   अ) याट्-आगमः आ) स्याट्-आगमः इ) सुट्-आगमः
2. या + अम् - अत्र किं कार्यम्?
   अ) पूर्वरूपम् आ) पूर्वसवर्णदीर्घः इ) पररूपम्
3. य + स्या + आम् - अत्र किं कार्यम्?
   अ) सवर्णदीर्घः आ) वृद्धिः इ) पररूपम्
4. एतद् + आम् - पुंलिङ्गे आमः कः आगमः?
   अ) सुट्-आगमः आ) नुट्-आगमः इ) नुम्-आगमः
5. एता + आम् - कः आगमः भवति?
   अ) स्याट्-आगमः आ) याट्-आगमः इ) सुट्-आगमः
6. एता + अस्(शस्) अत्र किं कार्यम्?
   अ) पूर्वरूपम् आ) पररूपम् इ) पूर्वसवर्णदीर्घः
7. एता + टा - अत्र किं कार्यम्?
   अ) आकारस्य एकारः आ) याट्-आगमः इ)यट्-आगमः
8. एतद् + आम् - नपुंसकलिङ्गे आमः कः आगमः?
   अ) नुट्-आगमः आ) नुम्-आगमः इ) सुट्-आगमः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

9. जस: स्थाने आदिष्टस्य शि-आदेशस्य का संज्ञा?

अ) सर्वनाम आ) सर्वनामस्थानम् इ) पदसंज्ञा

10. एतद् + टा (नपुं) अत्र अन्वादेशे किं कार्यम्?

अ) एनेन आ) एतेन आ) अनेन

योजयत -

1. या + आम्	एतस्याम्
2. एता + आम्	एतेषाम्
3. यद् + आम्	यासाम्
4. एतद् + आम्	एतासाम्
5. एता + ङि	येषाम्

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. यद् + ङि
2. एतद् + टा
3. यद् + ओस्
4. या + ओस्

प्रक्रियाया: भेदान् लिखत -

1. यद् + औ (पुं), यद् + औ (स्त्री)
2. यद् + सु (पुं), एतद् + सु (पुं)
3. यद् + अम् (नपुं), यद् + अम् (पुं)
4. एतद् + सु (पुं), एतद् + सु (नपुं)
5. यद् सु + (स्त्री), एतद् सु + (स्त्री)

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. एताभ्याम्
2. यै:
3. एताभ्य:
4. येभ्य:
5. यस्याम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. अतो गुणे (7-1-18) - अपदान्तादकराद् गुणे परतः पररूपमेकादेशः स्यात्।
2. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
3. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।
4. लशक्वतद्धिते (1-3-8) - तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
5. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
6. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
7. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
8. सर्वनाम्नः स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः।
9. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
10. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
11. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।
12. वाऽवसाने (8-4-56) - अवसाने झलां चरो वा स्युः।
13. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
14. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
15. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
16. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
17. त्यदादीनामः (7-2-102) - एषामकारोऽन्तादेशः स्याद्विभक्तौ।
18. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात्।
19. तदोः सः सावनन्त्ययोः (7-2-106) - त्यदादीनां तकारदकारयोरनन्त्ययोः सः स्यात्सौ परे।
20. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
21. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परतः पररूपमेकादेशः स्यात्।
22. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
23. जसः शी (7-1-17) - अदन्तात्सर्वनाम्नः परस्य जसः शी स्यात्।
24. अतो गुणे (7-1-18) - अपदान्तादकराद् गुणे परतः पररूपमेकादेशः स्यात्।
25. द्वितीयाटौस्स्वेनः (2-4-34) - द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

26. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
27. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घः स्यात्।
28. अतो भिस ऐस् (7-1-9) - अकारान्तादङ्गाद्भिस ऐस् स्यात्।
29. सर्वनाम्नः स्मै (7-1-14) - अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात्।
30. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
31. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
32. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
33. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकारः स्यात्।
34. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।
35. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
36. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
37. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
38. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।
39. लशक्वतद्धिते (1-3-8) - तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः।
40. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
41. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
42. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
43. सर्वनाम्नः स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः।
44. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
45. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
46. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।
47. वाऽवसाने (8-4-56) - अवसाने झलां चरो वा स्युः।
48. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
49. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
50. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
51. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
52. अन्वादेशे नपुंसके एनद् वक्तव्यः (वा)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

षष्ठः पाठः - राजन्, यज्वन्, ब्रह्मन्, युवन्, मघवन् शब्दाः

पञ्चमस्य पाठस्य पुनरावृत्तिः -

1. यद्-शब्दः स्त्रीलिङ्गः - यद्-शब्दस्य विभक्तौ परतः अकारादेशः। अदन्तत्वात् स्त्रियां टाप्। अयं सर्वनामसंज्ञकः। अतः आबन्तस्य सर्वनाम्नः यानि कार्याणि तानि अत्र भवन्ति। प्रथमैकवचनं विहाय अन्यानि रूपाणि स्त्रीलिङ्गे तद्-शब्दवत् भवन्ति।
2. यद्-शब्दः नपुंसकलिङ्गः - सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक्(लोपः) भवति। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः शि-आदेशः भवति। अजन्तस्य सर्वनामस्थाने नुम्-आगमः भवति। सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधायाः दीर्घः भवति। अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।
3. एतद्-शब्दः पुंलिङ्गः - एतद्-शब्दस्य विभक्तौ अकारादेशः, सुप्रत्यये अनन्त्यस्य तकारस्य सकारादेशः। प्रथमैकवचनं विहाय अन्यानि रूपाणि पुंलिङ्गे तद्-शब्दवत् भवन्ति। अन्वादेशे द्वितीया विभक्तौ, टा प्रत्यये, ओस् प्रत्यये च 'एत' शब्दस्य एनादेशः भवति।
4. एतद्-शब्दः स्त्रीलिङ्गः - एतद्-शब्दस्य विभक्तौ अकारादेशः। विभक्तिषु दकारस्य अकारादेशे एत इति अदन्तः सम्पन्नः। तस्य स्त्रीत्वविवक्षायां टाप्-प्रत्यये एता इति आबन्तः सिद्धः। प्रथमैकवचने अनन्त्यस्य तकारस्य सकारः, तस्य च षकारे एषा। स्त्रीलिङ्गेऽपि अन्वादेशे पुंलिङ्गे इव 'एन' आदेशो भवति। भवति। अन्यानि रूपाणि स्त्रीलिङ्गे तद्-शब्दवत् भवन्ति।
5. एतद्-शब्दः नपुंसकलिङ्गः - सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक् भवति। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः शि-आदेशः भवति। अजन्तस्य सर्वनामस्थाने परे नुम्-आगमः भवति। सर्वनामस्थाने प्रत्यये परे नान्तस्य उपधायाः दीर्घः भवति। द्वितीयाविभक्तौ, टा प्रत्यये, ओस् प्रत्यये च अन्वादेशे एनद् आदेशः भवति। अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे राजन्-शब्दस्य रूपाणि पठामः।
2. यज्वन्-शब्दस्य रूपाणि पठामः।
3. ब्रह्मन्-शब्दस्य रूपाणि पठामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. सम्प्रसारणं नाम किमिति जानीमः।

5. युवन्-शब्दस्य रूपाणि पठामः।

6. मघवन्-शब्दस्य रूपाणि पठामः।

नान्तेषु संज्ञात्रयं निमित्तीकृत्य कार्याणि भवन्ति।

संज्ञा	तन्निमित्तकानि कार्याणि
1. सर्वनामस्थानसंज्ञा	उपधायाः दीर्घः
2. भसंज्ञा	अन्-अन्तेषु उपधायाः अकारस्य लोपः, सम्प्रसारणम्...
3. पदसंज्ञा	नलोपः

नकारान्तः पुंलिङ्गः राजन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	राजन्+सु(स्)→ राजा	राजन्+औ→ राजानौ	राजन्+जस्(अस्)→ राजानः
द्वितीया	राजन्+अम्→ राजानम्	राजन्+औट्(औ)→ राजानौ	राजन्+शस्(अस्)→ राज्ञः
तृतीया	राजन्+टा(आ)→ राज्ञा	राजन्+भ्याम्→ राजभ्याम्	राजन्+भिस्→ राजभिः
चतुर्थी	राजन्+ङे(ए)→ राज्ञे	राजन्+भ्याम्→ राजभ्याम्	राजन्+भ्यस्→ राजभ्यः
पञ्चमी	राजन्+ङसि (अस्)→राज्ञः	राजन्+भ्याम्→ राजभ्याम्	राजन्+भ्यस्→ राजभ्यः
षष्ठी	राजन्+ङस् (अस्)→राज्ञः	राजन्+ओस्→ राज्ञोः	राजन्+आम्→ राज्ञाम्
सप्तमी	राजन्+ङि(इ)→ राज्ञि/राजनि	राजन्+ओस्→ राज्ञोः	राजन्+सुप्(सु)→ राजसु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
सम्बोधनम्	हे राजन्+सु→ हे राजन्!	हे राजन्+औ→ हे राजानौ!	हे राजन्+जस्→ हे राजानः!

1. प्रथमा-एकवचनादारभ्य द्वितीया-द्विवचनं यावत्(सु,औ,जस्,अम्,औट्-प्रत्ययेषु) उपधायाः अकारस्य दीर्घः भवति।[1]

2. राजन् + सु, उकारस्य इत्संज्ञायां लोपे च राजन् + स् उपधायाः दीर्घः भवति। राजान् + स्, सकारस्य लोपः भवति।[2] प्रथमैकवचने सुलोपानन्तरं पदसंज्ञा।[3] अतः अन्ते विद्यमानस्य नकारस्य लोपः भवति।[4] राजा।

3. द्वितीयाबहुवचनादारभ्य अजादिषु विभक्तिप्रत्ययेषु परेषु राजस्-शब्दस्य भसंज्ञा।[5] अतः उपधायाम् अकारस्य लोपः भवति।[6] ततः जकारेण नकारस्य योगे श्चुत्वं नाम ञकारः भवति।

> उपधा - अन्तिमवर्णात् पूर्वं विद्यमानः वर्णः।[7]

राजन् + शस्→राजन् + अस्→राज् न् + अस्→राज् ञ् + अस्→राज्ञः।

एवं राजन् + टा→राज्ञा। राजन् + ङे→राज्ञे। राजन् + ङसि/ङस्→राजन् + अस्→राज्ञः। राजन् + ओस्→राज्ञोः। राजन् + आम्→राज्ञाम्।

4. सप्तमी-एकवचने उपधा-अकारस्य लोपः विकल्पेन भवति।[8]

राजन् + ङि→राजन् + इ→राज् न् + इ→राज् ञ् + इ→राज्ञि।

पक्षे राजन् + ङि→राजन् + इ→राजनि।

5. हलादिषु विभक्तिप्रत्ययेषु परेषु राजन्-शब्दस्य पदसंज्ञा।[9] अतः नकारस्य लोपः भवति।[10] राजन् + भिस् + राजभिः। राजन् + भ्यस्→राजभ्यः। राजन् + सुप्→राजसु।

6. सम्बुद्धौ नकरस्य लोपः न भवति।[11] हे राजन् + सु→हे राजन् + स्→हे राजन्!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नकारान्तः पुंलिङ्गः यज्वन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	यज्वन्+सु(स्)→ यज्वा	यज्वन्+औ→ यज्वानौ	यज्वन्+जस्(अस्)→ यज्वानः
द्वितीया	यज्वन्+अम्→ यज्वानम्	यज्वन्+औट् (औ)→यज्वानौ	यज्वन्+शस्(अस्)→ यज्वनः
तृतीया	यज्वन्+टा(आ)→ यज्वना	यज्वन्+भ्याम्→ यज्वभ्याम्	यज्वन् + भिस्→ यज्वभिः
चतुर्थी	यज्वन्+ङे(ए)→ यज्वने	यज्वन्+भ्याम्→ यज्वभ्याम्	यज्वन्+भ्यस्→ यज्वभ्यः
पञ्चमी	यज्वन्+ङसि (अस्)→यज्वनः	यज्वन्+भ्याम्→ यज्वभ्याम्	यज्वन्+भ्यस्→ यज्वभ्यः
षष्ठी	यज्वन्+ङस् यज्वनः	यज्वन्+ओस्→ यज्वनोः	यज्वन् + आम्→ यज्वनाम्
सप्तमी	यज्वन्+ङि(इ)→ यज्वनि	यज्वन्+ओस्→ यज्वनोः	यज्वन्+सुप्(सु)→ यज्वसु
सम्बोधनम्	हे यज्वन्+सु→ हे यज्वन्!	हे यज्वन्+औ→ हे यज्वानौ!	हे यज्वन्+जस्→ हे यज्वानः!

1. यज्वन् + सु - अत्र उपधायाः दीर्घः।[12] यज्वान् + स्, सकारस्य लोपः[13], यज्वान् अत्र नकारस्य लोपः।[14]
2. यज्वन्-शब्दस्य उपधायाः दीर्घः भवति सु, औ, जस्, अम्, औट् प्रत्ययेषु परेषु।[15]
3. हलादिषु प्रत्ययेषु परेषु यज्वन्-शब्दस्य पदसंज्ञा।[16] अतः यज्वन्-शब्दस्य नकारस्य लोपः भवति।[17]
4. अत्र शसादौ अजादिषु प्रत्ययेषु परेषु उपधायाः अकारस्य लोपः प्राप्तः, परन्तु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

न भवति। वकार-मकारान्तसंयोगात् परस्य अन: अकारस्य लोप: न भवति[18] इति निषेधात्। यज्वन् इत्यत्र वकारान्त: संयोग: दृश्यते। अत: अन: अकारस्य लोप: न भवति।

नकारान्त: पुंलिङ्ग: ब्रह्मन्-शब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	ब्रह्मन्+सु(स्)→ ब्रह्मा	ब्रह्मन्+औ→ ब्रह्माणौ	ब्रह्मन्+जस्(अस्)→ ब्रह्माण:
द्वितीया	ब्रह्मन्+अम्→ ब्रह्माणम्	ब्रह्मन्+औट्(औ)→ ब्रह्माणौ	ब्रह्मन्+शस्(अस्)→ ब्रह्मण:
तृतीया	ब्रह्मन्+टा(आ)→ ब्रह्मणा	ब्रह्मन्+भ्याम्→ ब्रह्मभ्याम्	ब्रह्मन्+भिस्→ ब्रह्मभि:
चतुर्थी	ब्रह्मन्+ङे(ए)→ ब्रह्मणे	ब्रह्मन् + भ्याम्→ ब्रह्मभ्याम्	ब्रह्मन् + भ्यस्→ ब्रह्मभ्य:
पञ्चमी	ब्रह्मन्+ङसि (अस्)→ब्रह्मण:	ब्रह्मन्+भ्याम्→ ब्रह्मभ्याम्	ब्रह्मन् + भ्यस्→ ब्रह्मभ्य:
षष्ठी	ब्रह्मन्+ङस् (अस्)→ब्रह्मण:	ब्रह्मन्+ओस्→ ब्रह्मणो:	ब्रह्मन्+आम्→ ब्रह्मणाम्
सप्तमी	ब्रह्मन्+ङि(इ)→ ब्रह्मणि	ब्रह्मन्+ओस्→ ब्रह्मणो:	ब्रह्मन्+सुप्→ ब्रह्मसु
सम्बोधनम्	हे ब्रह्मन्+सु(स्)→ हे ब्रह्मन्!	हे ब्रह्मन्+औ→ हे ब्रह्माणौ!	हे ब्रह्मन्+जस्(अस्)→ हे ब्रह्माण:!

1. ब्रह्मन् + सु अत्र उपधाया: दीर्घ:[19], ब्रह्मान् + स्, सकारस्य लोप:[20], ब्रह्मान् अत्र नकारस्य लोप:।[21]
2. ब्रह्मन्-शब्दस्य उपधाया: दीर्घ: भवति सु, औ, जस्, अम्, औट् प्रत्ययेषु परेषु।[22]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. हलादिषु प्रत्ययेषु ब्रह्मन्-शब्दस्य पदसंज्ञा।[23] अतः तेषु परेषु ब्रह्मन्-शब्दस्य नकारस्य लोपः भवति।[24]

4. अत्र अजादिषु प्रत्ययेषु परेषु उपधायाः अकारस्य लोपः प्राप्तः, परन्तु न भवति। वकार-मकारान्तसंयोगात् परस्य अनः अकारस्य लोपः न भवति[25] इति निषेधात्। ब्रह्मन् इति मकारान्तः संयोगः। अतः अनः अकारस्य लोपः न भवति।

नकारान्तः पुंलिङ्गः युवन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	युवन्+सु(स्)→ युवा	युवन्+औ→ युवानौ	युवन्+जस्(अस्)→ युवानः
द्वितीया	युवन्+अम्→ युवानम्	युवन्+औट् (औ)→युवानौ	युवन्+शस्(अस्)→ यूनः
तृतीया	युवन्+टा(आ)→ यूना	युवन्+भ्याम्→ युवभ्याम्	युवन्+भिस्→ युवभिः
चतुर्थी	युवन्+ङे(ए)→ यूने	युवन्+भ्याम्→ युवभ्याम्	युवन्+भ्यस्→ युवभ्यः
पञ्चमी	युवन्+ङसि (अस्)→यूनः	युवन्+भ्याम्→ युवभ्याम्	युवन्+भ्यस्→ युवभ्यः
षष्ठी	युवन्+ङस् (अस्)→यूनः	युवन्+ओस्→ यूनोः	युवन्+आम्→ यूनाम्
सप्तमी	युवन्+ङि(इ)→ यूनि	युवन्+ओस्→ यूनोः	युवन्+सुप्(सु)→ युवसु
सम्बोधनम्	हे युवन्+सु(स्)→ हे युवन्!	हे युवन्+औ→ हे युवानौ!	हे युवन्+जस्(अस्)→ हे युवानः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. प्रथमैकवचने सुलोपानन्तरं पदसंज्ञा।[26] असर्वनामस्थानेषु हलादिषु प्रत्ययेषु परेषु युवन्-शब्दस्य पदसंज्ञा।[27] अतः नकारस्य लोपः।[28]
2. सर्वनामस्थानप्रत्ययेषु परेषु उपधायाः दीर्घः भवति।[29] युवा, युवानौ, युवानः, युवानम्।
3. शसादौ अजादिषु प्रत्ययेषु युवन्-शब्दस्य भसंज्ञा।[30] अतः वकारस्य सम्प्रसारणं भवति।[31] अर्थात् वकारस्य उकारः। (व→उ अ)

सम्प्रसारणम् - यणः स्थाने प्रयुज्यमानः यः इक् सः सम्प्रसारणसंज्ञः भवति।[32]

युवन् + शस्→युवन् + अस्→यु उ अ न् + अस्।

4. सम्प्रसारणादनन्तरं पूर्वरूपं भवति।[33] यु उन् + अस्→ अत्र उकारयोः सवर्णदीर्घः भवति।[34] यून् + अस्→यूनस्→यूनरु→यूनर्→यूनः।
   एवं टा, ङे, ङसि, ङस्, ओस्, आम्, ङि - प्रत्ययेष्वपि एवं प्रक्रिया भवति।
5. हलादिषु प्रत्ययेषु परेषु युवन्-शब्दस्य पदसंज्ञा भवति। पदसंज्ञा भवति। पदसंज्ञाया नस्य लोपं भवति। युवन् + भिस्→युवभिः। युवन् + भ्याम्→युवभ्याम्। युवन् + भ्यस्→युवभ्यः। युवन् + सुप्→युवन् + सु→युवसु।

नकारान्तः पुंलिङ्गः मघवन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	मघवन्+सु(स्)→ मघवा	मघवन्+औ→ मघवानौ	मघवन्+जस्(अस्)→ मघवानः
द्वितीया	मघवन्+अम्→ मघवानम्	मघवन्+औट् (औ)→मघवानौ	मघवन्+शस्(अस्)→ मघोनः
तृतीया	मघवन्+टा(आ)→ मघोना	मघवन्+भ्याम्→ मघवभ्याम्	मघवन्+भिस्→ मघवभिः
चतुर्थी	मघवन्+ङे(ए)→ मघोने	मघवन्+भ्याम्→ मघवभ्याम्	मघवन्+भ्यस्→ मघवभ्यः
पञ्चमी	मघवन्+ङसि (अस्)→मघोनः	मघवन्+भ्याम्→ मघवभ्याम्	मघवन् + भ्यस्→ मघवभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
षष्ठी	मघवन्+ङस् (अस्)→मघोनः	मघवन्+ओस्→ मघोनोः	मघवन्+आम्→ मघोनाम्
सप्तमी	मघवन्+ङि(इ)→ मघोनि	मघवन्+ओस्→ मघोनोः	मघवन्+सुप्(सु)→ मघवसु
सम्बोधनम्	हे मघवन्+सु(स्)→ हे मघवन्!	हे मघवन्+औ→ हे मघवानौ!	हे मघवन्+जस् (अस्)→हे मघवानः!

1. प्रथमैकवचने सुलोपानन्तरं पदसंज्ञा।[35] हलादिषु प्रत्ययेषु परेषु मघवन्-शब्दस्य पदसंज्ञा।[36] अतः नकारस्य लोपः।[37]
2. सर्वनामस्थानप्रत्ययेषु परेषु उपधायाः दीर्घः भवति।[38] मघवा, मघवानौ, मघवानः, मघवानम्, मघवानौ।
3. शसादौ अजादिषु प्रत्ययेषु मघवन्-शब्दस्य भसंज्ञा।[39] अतः वकारस्य सम्प्रसारणं भवति।[40] सम्प्रसारणादनन्तरं पूर्वरूपम् एकादेशः भवति।[41]
   मघवन् + शस्→मघवन् + अस्→मघ उ अ न् + अस्→मघ उ न् + अस्→(गुणः)मघोन् + अस्→मघोनः।
4. हलादिषु प्रत्ययेषु परेषु पूर्वं विद्यमानस्य मघवन्-शब्दस्य पदसंज्ञा। नकारस्य लोपः।
   मघवन् + भिस्→मघवभिः। मघवन् + भ्याम्→मघवभ्याम्। मघवन् + भ्यस्→मघवभ्यः। मघवन् + सुप्→मघवन् + सु→मघवसु।

एवं टा, ङे, ङसि, ङस्, ओस्, आम्, ङि - प्रत्ययेष्वपि प्रक्रिया ज्ञेया।

पाठसारः -

1. राजन्-शब्दः - सर्वनामस्थानसंज्ञकेषु परेषु उपधायाः दीर्घः। भसंज्ञायाम् उपधायाः अकारस्य लोपः। सप्तम्येकवचने अकारलोपः विकल्पेन भवति। पदसंज्ञायां नकारस्य लोपः।
2. यज्वन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः, नकारस्य लोपः। भसंज्ञायाम् उपधायाः अकारस्य लोपः प्राप्तः। तस्य निषेधः भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. ब्रह्मन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः, नकारस्य लोपः। भसंज्ञायाम् उपधायाः अकारस्य लोपः प्राप्तः, तस्य निषेधः भवति।
4. युवन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः। पदसंज्ञायां नकारस्य लोपः। भसंज्ञायां वकारस्य सम्प्रसारणम्। सम्प्रसारणादनन्तरं पूर्वरूपम्।
5. मघवन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः। पदसंज्ञायां नकारस्य लोपः। भसंज्ञायां वकारस्य सम्प्रसारणम्, सम्प्रसारणादनन्तरं पूर्वरूपम्।
6. सम्प्रसारणम् - यणः स्थाने प्रयुज्यमानस्य इकः सम्प्रसारणम् इति संज्ञा।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. यूनोः - इत्यस्य प्रक्रियां लिखत?
2. राजन्-शब्दस्य सप्तम्येकवचने किं रूपम्? कथं च सिद्धिः?
3. ब्रह्मन्, राजन् - शब्दयोः प्रक्रियायां भेदः कः? कुतः?
4. सम्प्रसारणं नाम किम्?
5. नान्तेषु पदसंज्ञायां किं कार्यम्?

योग्यमुत्तरं चिनुत -

1. राजन् + ङि - अत्र अनः किं कार्यम्?
   अ) अकारस्य लोपः
   आ) अकारस्य लोपनिषेधः
   इ) विकल्पेन अकारस्य लोपः
2. राजन् + ङस् - अत्र अनः किं कार्यम्?
   अ) अकारस्य लोपः
   आ) अकारस्य लोपनिषेधः
   इ) विकल्पेन अकारस्य लोपः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. नान्तस्य सर्वनामस्थानेषु परेषु किं कार्यम्?
अ) नकारलोप: आ) उपधाया: लोप: इ) उपधाया: दीर्घ:

4. अन्नन्तस्य भसंज्ञायां किं कार्यम्?
अ) अन: अकारस्य लोप:
आ) अन: अकारस्य लोपनिषेध:
इ) नकारस्य लोप:

5. यज्वन् + भ्याम्, अत्र यज्वन्-शब्दस्य का संज्ञा?
अ) भसंज्ञा आ) पदसंज्ञा इ) सर्वनामस्थानसंज्ञा

6. वकारान्तमकारान्तसंयोगात् परस्य अन: भसंज्ञायां किं कार्यम्?
अ) अकारस्य लोपनिषेध:
आ) अकारस्य लोप:
इ) विकल्पेन अकारलोप:

7. ब्रह्मन् + सु - किं कार्यम्?
अ) नकारलोप: आ) उपधाया: लोप: इ) न किमपि

8. ब्रह्मन् + ङे - किं कार्यम्?
अ) अकारलोप: आ) अकारलोपनिषेध: इ) नलोप:

9. युवन् + टा, अत्र युवन्-शब्दस्य का संज्ञा?
अ) पदसंज्ञा आ) भसंज्ञा इ) सर्वनामस्थानसंज्ञा

10. मघवन् + ङे - किं कार्यम्?
अ) सम्प्रसारणम् आ) नकारलोप: इ) अकारलोप:

योजयत -

1. युवन् + ङे	उपधाया: दीर्घ:
2. राजन् + ङे	सम्प्रसारणम्
3. मघवन् + भ्याम्	अकारस्य लोप:
4. यज्वन् + ङे	नकारस्य लोप:
5. ब्रह्मन् + औ	अकारलोपनिषेध:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. हे राजन् + सु
2. राजन् + शस्
3. ब्रह्मन् + आम्
4. मघवन् + शस्
5. यज्वन् + शस्

प्रक्रियां लिखित्वा भेदान् निरूपयत -

1. ब्रह्मन् + टा, राजन् + टा
2. राजन् + ङस्, युवन् + ङस्
3. राजन् + ओस्, यज्वन् + ओस्
4. मघवन् + ङि, राजन् + ङि
5. ब्रह्मन् + ङि, युवन् + ङि

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. यज्वन्
2. राज्ञोः
3. ब्रह्मणः
4. यूनि
5. मघोनाम्

---

1. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
2. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
3. सुप्तिङन्तं पदम् (1-4-14) - सुबन्तं तिङन्तं च पदसञ्ज्ञं स्यात्।
4. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
5. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।
6. अल्लोपोऽनः (6-4-134) - अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. अलोऽन्त्यात्पूर्व उपधा (1-1-65) - अन्त्यादल: पूर्वो वर्ण उपधासञ्ज्ञ: स्यात्।
8. विभाषा ङिश्योः (6-4-136) - अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः।
9. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
10. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
11. न ङिसम्बुद्ध्योः (8-2-8) - नस्य लोपो न स्याद् ङौ संबुद्धौ च।
12. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
13. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
14. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
15. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
16. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
17. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
18. न संयोगाद्वमन्तात् (6-4-137) - वकारमकारान्तसंयोगात् परस्यानोऽकारस्य लोपो न स्यात्।
19. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
20. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
21. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
22. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
23. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
24. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
25. न संयोगाद्वमन्तात् (6-4-137) - वकारमकारान्तसंयोगात् परस्यानोऽकारस्य लोपो न स्यात्।
26. सुप्तिङन्तं पदम् (1-4-14) - सुबन्तं तिङन्तं च पदसञ्ज्ञं स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

27. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
28. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
29. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
30. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।
31. श्वयुवमघोनामतद्धिते (6-4-133) - अन्नन्तानां भसंज्ञकानामेषामतद्धिते परे संप्रसारणं स्यात्।
32. इग्यणः संप्रसारणम् (1-1-45) - यणः स्थाने प्रयुज्यमानो य इक् स संप्रसारणसंज्ञः स्यात्।
33. संप्रसारणाच्च (6-1-108) - संप्रसारणादचि परे पूर्वरूपमेकादेशः स्यात्।
34. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्।
35. सुप्तिङन्तं पदम् (1-4-14) - सुबन्तं तिङन्तं च पदसञ्ज्ञं स्यात्।
36. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
37. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
38. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
39. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्प्रत्ययवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।
40. श्वयुवमघोनामतद्धिते (6-4-133) - अन्नन्तानां भसंज्ञकानामेषामतद्धिते परे संप्रसारणं स्यात्।
41. संप्रसारणाच्च (6-1-108) - संप्रसारणादचि परे पूर्वरूपमेकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सप्तमः पाठः - पथिन्, पञ्चन्, अष्टन्, गुणिन्, अहन्

षष्ठस्य पाठस्य पुनरावृत्तिः -

- राजन्-शब्दः - सर्वनामस्थानसंज्ञकेषु परेषु उपधायाः दीर्घः। भसंज्ञायाम् उपधायाः अकारस्य लोपः। सप्तम्येकवचने अकारलोपः विकल्पेन भवति। पदसंज्ञायां नकारस्य लोपः।
- यज्वन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः। नकारस्य लोपः। भसंज्ञायाम् उपधायाः अकारस्य लोपः प्राप्तः। तस्य निषेधः भवति।
- ब्रह्मन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः। नकारस्य लोपः। भसंज्ञायाम् उपधायाः अकारस्य लोपः प्राप्तः, तस्य निषेधः भवति।
- युवन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः। पदसंज्ञायां नकारस्य लोपः। भसंज्ञायां वकारस्य सम्प्रसारणम्। सम्प्रसारणादनन्तरं पूर्वरूपम्।
- मघवन्-शब्दः - सर्वनामस्थानसंज्ञकेषु प्रत्ययेषु परेषु उपधायाः दीर्घः। पदसंज्ञायां नकारस्य लोपः। भसंज्ञायां वकारस्य सम्प्रसारणम्। सम्प्रसारणादनन्तरं पूर्वरूपम्।
- सम्प्रसारणम् - यणः स्थाने प्रयुज्यमानस्य इकः सम्प्रसारणम् इति संज्ञा।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे पथिन्-शब्दस्य रूपाणि पठामः।
2. पञ्चन्-शब्दस्य रूपाणि जानीमः।
3. अष्टन्-शब्दस्य रूपाणि पठामः।
4. गुणिन्-शब्दस्य रूपाणि पठामः।
5. अहन्-शब्दस्य रूपाणि पठामः।

नकारान्तः पुंलिङ्गः पथिन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पथिन्+सु(स्)→ पन्थाः	पथिन्+औ→ पन्थानौ	पथिन्+जस्(अस्)→ पन्थानः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
द्वितीया	पथिन्+अम्→ पन्थानम्	पथिन्+औट्(औ)→ पन्थानौ	पथिन्+शस्(अस्)→ पथः
तृतीया	पथिन्+टा(आ)→ पथा	पथिन्+भ्याम्→ पथिभ्याम्	पथिन्+भिस्→ पथिभिः
चतुर्थी	पथिन्+ङे(ए)→ पथे	पथिन्+भ्याम्→ पथिभ्याम्	पथिन्+भ्यस्→ पथिभ्यः
पञ्चमी	पथिन् + ङसि (अस्)→पथः	पथिन्+भ्याम्→ पथिभ्याम्	पथिन्+भ्यस्→ पथिभ्यः
षष्ठी	पथिन्+ङस् (अस्)→पथः	पथिन्+ओस्→ पथोः	पथिन्+आम्→ पथाम्
सप्तमी	पथिन्+ङि(इ)→ पथि	पथिन्+ओस्→ पथोः	पथिन्+सुप्(सु)→ पथिषु
सम्बोधनम्	हे पथिन्+सु(स्)→ हे पन्थः!	हे पथिन्+औ→ हे पन्थानौ!	हे पथिन्+जस्(अस्)→ हे पन्थानः!

1. पथिन् + सु→पथिन् + स् इति स्थिते पथिन्-शब्दस्य नकारस्य आकारादेशः भवति सुप्रत्यये परे।[1] पथि आ + स्, पथिशब्दस्य इकारस्य अकारादेशः भवति सर्वनामस्थाने परे।[2] पथ आ स्, पथ इत्यत्र थकारस्य न्थ-आदेशः भवति सर्वनामस्थाने परे।[3] पन्थ आ स्, सवर्णदीर्घे, पन्था + स्→पन्था + स्→पन्था + रु→पन्थार्→पन्थाः।
2. पथिन् + औ/औट्→पथिन् + औ अत्र पथिन्-शब्दे थकारोत्तरवर्त्तिनः इकारस्य अकारादेशे[4] पथन् + औ, अत्र थस्थाने न्थ-आदेशे[5] पन्थन् + औ, उपधायाः दीर्घे पन्थान् + औ→पन्थानौ।
3. पथिन् + जस्→पथिन् + अस् अत्र पथिन्-शब्दे थकारोत्तरवर्त्तिनः इकारस्य अकारादेशे[6] पथन् + अस्, अत्र थस्थाने न्थ-आदेशे[7] पन्थन् + अस्, उपधायाः दीर्घे पन्थान् + अस्→पन्थानः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. पथिन्+अम् अत्र पथिन्-शब्दे थकारोत्तरवर्त्तिन:इकारस्य अकारादेशे[8] पथन्+अम्, अत्र थस्थाने न्थ-आदेशे[9] पन्थन्+अम्, उपधायाः दीर्घे पन्थान् + अम्→पन्थानम्।

5. शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि - एतेषु परेषु पथिन्-शब्दस्य भसंज्ञा।[10] अतः टेः लोपः भवति।[11]

> **टि** - वर्णसमुदाये अन्तिमाद् अज्वर्णात् परं विद्यमानस्य भागस्य **टि** इति संज्ञा भवति।[12]

> यथा - मनस् इति वर्णसमुदाये अन्तिमः अच् नकारानन्तरं विद्यमानः अकारः ततः आरभ्य स्-पर्यन्तं विद्यमानस्य भागस्य(अस्) टि इति संज्ञा।

पथिन् + शस्→पथिन् + अस्→पथ् + अस्→पथः।
पथिन् + टा→पथिन् + आ→पथ् + आ→पथा।
पथिन् + ङे→पथिन् + ए→पथ् + ए→पथे।

6. हलादिषु प्रत्ययेषु परेषु नकारस्य लोपः।[13] (भ्याम्, भिस्, भ्यस्, सुप्)
पथिन् + भ्याम्→पथि + भ्याम्→पथिभ्याम्। एवं पथिभिः, पथिभ्यः, पथिषु।

नकारान्तः पुंलिङ्गः पञ्चन्-शब्दः

> पञ्चन्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति।

विभक्तिः	बहुवचनम्
प्रथमा	पञ्चन् + जस्(अस्)→पञ्च
द्वितीया	पञ्चन् + शस्(अस्)→पञ्च
तृतीया	पञ्चन् + भिस्→पञ्चभिः
चतुर्थी	पञ्चन् + भ्यस्→पञ्चभ्यः
पञ्चमी	पञ्चन् + भ्यस्→पञ्चभ्यः
षष्ठी	पञ्चन् + आम्→पञ्चानाम्
सप्तमी	पञ्चन् + सुप्(सु)→पञ्चसु
सम्बोधने	हे पञ्चन् + जस्→हे पञ्च!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. पञ्चन् इति नान्तः, संख्यावाचकश्च। अतः अस्य षट् इति संज्ञा भवति।[14]
2. पञ्चन् + जस्/शस् - अत्र षट्-संज्ञकात् परयोः जस्-शसोः लुक् (लोपः) भवति।[15] पञ्चन् इत्यत्र नकारस्य लोपः भवति।[16] पञ्च।
3. भिस्, भ्यस्, सुप्-प्रत्ययेषु परेषु नकारस्य लोपः भवति।[17] पञ्चभिः, पञ्चभ्यः, पञ्चसु।
4. पञ्चन् + आम्, आम्-प्रत्ययस्य नुट्-आगमः भवति।[18] पञ्चन् + न् + आम्→पञ्चन्+ नाम्। अत्र नान्तस्य उपधायाः नामि परे दीर्घः भवति।[19] पञ्चान्+ नाम्। पदसंज्ञा।[20] पदसंज्ञायां नकारस्य लोपः[21] पञ्चा + नाम्→पञ्चानाम्।

नकारान्तः पुंलिङ्गः अष्टन्-शब्दः

अष्टन्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति।

विभक्तिः	बहुवचनम्
प्रथमा	अष्टन् + जस्(अस्)→अष्टौ/अष्ट
द्वितीया	अष्टन् + शस्(अस्)→अष्टौ/अष्ट
तृतीया	अष्टन् + भिस्→अष्टाभिः/अष्टभिः
चतुर्थी	अष्टन् + भ्यस्→अष्टाभ्यः/अष्टभ्यः
पञ्चमी	अष्टन् + भ्यस्→अष्टाभ्यः/अष्टभ्यः
षष्ठी	अष्टन् + आम्→अष्टानाम्
सप्तमी	अष्टन् + सुप(सु)→अष्टासु/अष्टसु
सम्बोधने	हे अष्टन् + जस्→हे अष्ट!

1. अष्टन्-शब्दस्य हलादौ विभक्तौ परतः विकल्पेन नकारस्य आकारादेशः भवति।[22]
2. अष्टन् + जस्/शस्-अत्र अष्टन्-शब्दस्य नकारस्य आकारादेशकरणाद् अनन्तरं जस्-शसोः स्थाने औश् आदेशः भवति।[23] आकार-औकारयोः वृद्धिः।[24] अष्ट + आ + अस्→अष्टा+अस्→अष्ट + औ→अष्टौ। आत्वाभावपक्षे अष्टन्+ जस्/शस्→अष्टन् + अस्→अष्ट।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टन्+भिस्→अष्ट आ+भिस्→अष्टा+भिस्→अष्टाभिः। पक्षे अष्टभिः। एवम् अष्टाभिः, अष्टभिः।

3. अष्टन् + आम्, अष्टन्-शब्दस्य षट्-संज्ञकत्वात् आमः नुट्-आगमः भवति।[25] अष्टन् + नाम्, अत्र अष्टनः नकारस्य आकारः आदेशः भवति।[26] अष्ट आ + नाम्, सवर्णदीर्घः, अष्टानाम्।

4. आत्वस्य अभावे पञ्चन्-शब्दवत् रूपाणि भवन्ति।

नकारान्तः पुंलिङ्गः गुणिन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गुणिन्+सु(स्)→ गुणी	गुणिन्+औ→ गुणिनौ	गुणिन्+जस्(अस्)→ गुणिनः
द्वितीया	गुणिन्+अम्→ गुणिनम्	गुणिन्+औट् (औ)→गुणिनौ	गुणिन्+शस्(अस्)→ गुणिनः
तृतीया	गुणिन्+टा (आ)→गुणिना	गुणिन्+भ्याम्→ गुणिभ्याम्	गुणिन्+भिस्→ गुणिभिः
चतुर्थी	गुणिन्+ङे(ए)→ गुणिने	गुणिन्+भ्याम्→ गुणिभ्याम्	गुणिन्+भ्यस्→ गुणिभ्यः
पञ्चमी	गुणिन्+ङसि (अस्)→गुणिनः	गुणिन्+भ्याम्→ गुणिभ्याम्	गुणिन्+भ्यस्→ गुणिभ्यः
षष्ठी	गुणिन्+ङस् (अस्)→गुणिनः	गुणिन्+ओस्→ गुणिनोः	गुणिन्+आम्→ गुणिनाम्
सप्तमी	गुणिन्+ङि(इ)→ गुणिनि	गुणिन्+ओस्→ गुणिनोः	गुणिन्+सुप्(सु)→ गुणिषु
सम्बोधनम्	हे गुणिन्+सु (स्)→हे गुणिन्!	हे गुणिन्+औ→ हे गुणिनौ!	हे गुणिन्+जस्(अस्)→ हे गुणिनः!

1. सुप्रत्यये परे उपधायाः दीर्घः भवति।[27] गुणिन् + सु→गुणिन् + स्→गुणीन् + स्, सकारस्य लोपः।[28] गुणीन्, नकारस्य लोपः[29], गुणी।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. हलादिषु प्रत्ययेषु परेषु गुणिन्-शब्दस्य पदसंज्ञा।[30] अतः नकारस्य लोपः भवति।[31] अजादिषु प्रत्ययेषु किमपि कार्यं न भवति। गुणिना, गुणिने इत्यादि।

नकारान्तः नपुंसकलिङ्गः अहन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अहन्+सु(स्)→ अहः	अहन्+औ→ अह्नी/अहनी	अहन्+जस्(अस्)→ अहानि
द्वितीया	अहन्+अम्→ अहः	अहन्+औट्(औ)→ अह्नी/अहनी	अहन्+शस्(अस्)→ अहानि
तृतीया	अहन्+टा (आ)→अह्ना	अहन्+भ्याम्→ अहोभ्याम्	अहन्+भिस्→ अहोभिः
चतुर्थी	अहन्+ङे(ए)→ अह्ने	अहन्+भ्याम्→ अहोभ्याम्	अहन्+भ्यस्→ अहोभ्यः
पञ्चमी	अहन्+ङसि (अस्)→अह्नः	अहन्+भ्याम्→ अहोभ्याम्	अहन्+भ्यस्→ अहोभ्यः
षष्ठी	अहन्+ङस् (अस्)→अह्नः	अहन्+ओस्→ अह्नोः	अहन्+आम्→ अह्नाम्
सप्तमी	अहन्+ङि(इ)→ अह्नि/अहनि	अहन्+ओस्→ अह्नोः	अहन्+सुप्(सु)→ अहःसु/अहस्सु
सम्बोधने	अहन्+सु→ हे अहः!	अहन्+औ→ हे अह्नी!/हे अहनी!	अहन्+जस्→ हे अहानि!

1. अहन्+सु/अम्, सुप्रत्ययस्य अम्-प्रत्ययस्य च लुक्(लोपः) भवति।[32] अहन्-शब्दस्य नकारस्य र्-आदेशः भवति।[33] अहर्, अस्य रेफस्य विसर्गः भवति।[34] अहः।
2. अहन् + औ/औट् औप्रत्ययस्य, औट्-प्रत्ययस्य च स्थाने शी-आदेशः भवति।[35] अहन् + शी→अहन् + ई, शी-परे अकारलोपः विकल्पेन भवति।[36] अह्न् + ई→अह्नी। अकारस्य लोपाभावे अहन् + ई→अहनी।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. अहन् + जस्/शस्, जस्-शसोः शि-आदेशः भवति।[37] तस्य च सर्वनामस्थानम् इति संज्ञा।[38] अहन्+इ, सर्वनामस्थाने परे उपधायाः दीर्घः।[39] अहान्+इ→अहानि।
4. टा, ङे, ङसि, ङस्, ओस्, आम् - एतेषु परेषु अहन्-शब्दस्य भसंज्ञा।[40] अतः अनः अकारस्य लोपः भवति।[41] अह्ना, अह्ने - इत्यादि।
5. भ्याम्, भिस्, भ्यस् - प्रत्ययेषु परेषु अहन्-शब्दस्य नकारस्य रु-आदेशः भवति।[42] तस्य स्थाने उ-आदेशः भवति।[43] हकारोत्तरवर्तिनः अकारस्य उकारस्य च स्थाने गुणः भवति।[44]

अहन् + भ्याम्→अहरु + भ्याम्→अह उ + भ्याम्→अहो + भ्याम्→अहोभ्याम्।
6. सुप्-प्रत्यये परे अहन्-शब्दस्य नकारस्य रु-आदेशः भवति।[45] अहरु + सु, उकारस्य इत्संज्ञायां लोपे च अहर् + सु। रेफस्य विसर्गः आदेशः भवति।[46] विसर्गस्य विकल्पेन विसर्गः एव आदेशः भवति।[47] अहःसु। पक्षे विसर्गस्य सकारे अहस्सु।

पाठसारः -

1. पथिन्-शब्दः - पथिन्-शब्दे नकारस्य आकारः सुप्रत्यये परे। सर्वनामस्थाने परे पथिन्-शब्दस्य इकारस्य अकारादेशः। पथिन्-शब्दस्य थकारस्य न्थ-आदेशः। भसंज्ञायां पथिन्-शब्दस्य टेः लोपः। पदसंज्ञायां पथिन्-शब्दे नकारस्य लोपः।
2. पञ्चन्-शब्दः - पञ्चन्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। पञ्चन् इति नान्तः संख्यावाचकः। अतः षट्-संज्ञा। षट्संज्ञकात् परयोः जस्-शसोः लुक् भवति। पदसंज्ञायां पञ्चन्-शब्दे नकारस्य लोपः। आमि नुट्-आगमः भवति, उपधायाश्च दीर्घः भवति।
3. अष्टन्-शब्दः - अष्टन्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। अष्टन्-शब्दस्य हलादौ विभक्तौ परतः विकल्पेन आत्वं भवति। अष्टन्-शब्दात् परयोः जस्-शसोः औश्-आदेशः भवति। आमि नुट्-आगमः भवति। आत्वाभावपक्षे रूपाणि पञ्चन्-शब्दवत् भवन्ति।
4. गुणिन्-शब्दः - गुणिन्-शब्दस्य उपधायाः दीर्घः सुप्रत्यये परे। पदसंज्ञायां नकारस्य लोपः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. अहन्-शब्दः - अहन्-शब्दात् परयोः सु-अमोः लुक्। नकारस्य रेफादेशश्च। औ-औटोः शी-आदेशः। तस्मिन् परे अहन्-शब्दस्य अनः अकारस्य विकल्पेन लोपः। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानम् इति संज्ञा। तस्मिन् परे उपधायाः दीर्घः। भसंज्ञायाम् अनः अकारस्य लोपः। हलादिषु प्रत्ययेषु परेषु नकारस्य रु-आदेशः। तस्य च उत्वम्। सुपि रेफस्य विसर्गः, तस्य च विकल्पेन पुनः विसर्गः। पक्षे सकारादेशः।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. अहन्-शब्दस्य प्रथमाद्विवचने किं रूपम्? प्रक्रिया का?
2. गुणिन्-शब्दस्य प्रथमैकवचने किं रूपम्? का च प्रक्रिया?
3. पञ्चन्-शब्दस्य षष्ठीविभक्तौ किं रूपम्? का च प्रक्रिया?
4. अष्टन्-शब्दस्य षष्ठीविभक्तौ किं रूपम्? का च प्रक्रिया?
5. पथिन्-शब्दस्य प्रथमैकवचने किं रूपम्? प्रक्रिया का?

योग्यमुत्तरं चिनुत -

1. पथिन्-शब्दस्य सर्वनामस्थाने किं कार्यम्?
   अ) इकारस्य अकारः आ) थकारस्य न्थ-आदेशः इ) उभयम्
2. पथिन् + अम् - किं रूपम्?
   अ) पन्थिम् आ) पथिनम् इ) पन्थानम्
3. पञ्चन् + शस् - शसः किं कार्यम्?
   अ) लुक् आ) शि-आदेशः इ) शी-आदेशः
4. पञ्चन् + आम् - अत्र आमः कः आगमः?
   अ) सुट् आ) नुट् इ) नुम्
5. अष्टन् + शस् - शसः किं कार्यम्?
   अ) लोपः आ) औश्-आदेशः इ) शि-आदेशः
6. अष्टन् + आम् - किं कार्यम्?
   अ) नकारस्य विकल्पेन आकारः आ) आत्वाभावे आमः नुट् इ) उभयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. गुणिन् + ङि - किं रूपम्?
 अ) गुणी आ) गुणिनौ इ) गुणिनि
8. गुणिन् + भ्यस् - गुणिन्-शब्दस्य का संज्ञा?
 अ) भम् आ) पदम् इ) सर्वनामस्थानम्
9. अहन् + औट् - किं रूपम्?
 अ) अह्नी आ) अहनी इ) उभयम्
10. अहन् + भ्याम् - नकारस्य कः आदेशः?
 अ) रु आ) र् इ) लोपः

योजयत -

1. पथिन् + शस्	उपधायाः दीर्घः
2. पथिन् + जस्	नकारस्य र्-आदेशः
3. अष्टन् + जस्	इकारस्य अकारः
4. अहन् + सु	नकारस्य आकारादेशः
5. गुणिन् + सु	टेः लोपः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. अहन् + सु
2. पथिन् + औ
3. पञ्चन् + शस्
4. अष्टन् + भ्यस्
5. गुणिन् + भ्याम्

प्रक्रियां लिखित्वा भेदं निरूपयत -

1. पञ्चन् + जस्, अष्टन् + जस्
2. अष्टन् + आम्, पञ्चन् + आम्
3. पथिन् + सु, गुणिन् + सु
4. पथिन् + ङे, गुणिन् + ङे
5. पञ्चन् + आम्, अहन् + आम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत

1. पञ्चानाम्
2. अष्टौ
3. गुणिनः
4. अह्नि
5. पथि

---

1. पथिमथ्यृभुक्षामात् (7-1-85) - एषामाकारोऽन्तादेशः स्यात्सौ परे।
2. इतोऽत्सर्वनामस्थाने (7-1-86) - पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे।
3. थो न्थः (7-1-87) - पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे।
4. इतोऽत्सर्वनामस्थाने (7-1-86) - पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे।
5. थो न्थः (7-1-87) - पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे।
6. इतोऽत्सर्वनामस्थाने (7-1-86) - पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे।
7. थो न्थः (7-1-87) - पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे।
8. इतोऽत्सर्वनामस्थाने (7-1-86) - पथ्यादेरिकारस्याकारः स्यात्सर्वनामस्थाने परे।
9. थो न्थः (7-1-87) - पथिमथोस्थस्य न्थादेशः स्यात्सर्वनामस्थाने परे।
10. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।
11. भस्य टेर्लोपः (7-1-88) - भसंज्ञकस्य पथ्यादेष्टेर्लोपः स्यात्।
12. अचोऽन्त्यादि टि (1-1-64) - अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसञ्ज्ञं स्यात्।
13. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
14. ष्णान्ता षट् (1-1-24) - षान्ता नान्ता च सङ्ख्या षट्सञ्ज्ञा स्यात्।
15. षड्भ्यो लुक् (7-1-22) - षड्भ्यः परयोर्जश्शसोर्लुक्स्यात्।
16. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
17. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
18. षट्चतुर्भ्यश्च (7-1-55) - षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

19. नोपधायाः (6-4-7) - नान्तस्योपधाया दीर्घः स्यान्नामि परे।
20. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
21. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
22. अष्टन आ विभक्तौ - अष्टन आत्वं स्याद्धलादौ विभक्तौ।
23. अष्टाभ्य औश् (7-1-21) - कृताकारादष्टनः परयोर्जश्शसोरौश् स्यात्।
24. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
25. षट्चतुर्भ्यश्च (7-1-55) - षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमः स्यात्।
26. अष्टन आ विभक्तौ - अष्टन आत्वं स्याद्धलादौ विभक्तौ।
27. सौ च (6-4-13) - इन्नादीनामुपधाया दीर्घः स्यादसंबुद्धौ सौ परे।
28. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
29. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
30. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
31. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
32. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
33. रोऽसुपि - अह्नो रेफादेशः स्यान्न तु सुपि।
34. खरवसानयोर्विसर्जनीयः (8-3-15) - खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते।
35. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
36. विभाषा ङिश्योः (6-4-136) - अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः।
37. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
38. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
39. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
40. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

41. अल्लोपोऽनः (6-4-134) - अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः स्यात्।
42. अहन् (8-2-68) - अहन्नित्यस्य रुः स्यात्पदान्ते।
43. हशि च - अप्लुतादतः रोः उः स्यात् हशि।
44. आद्गुणः - अवर्णादचि परे पूर्वपरयोरेको गुणः आदेशः स्यात् संहितायाम्।
45. अहन् (8-2-68) - अहन्नित्यस्य रुः स्यात्पदान्ते।
46. खरवसानयोर्विसर्जनीयः (8-3-15) - खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते।
47. वा शरि (8-3-36) - शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अष्टमः पाठः - दण्डिन्शब्दः तथा त्रिषु लिङ्गेषु किम्-शब्दः

सप्तमस्य पाठस्य पुनरावृत्तिः -

- **पथिन्-शब्दः** - पथिन्-शब्दे नकारस्य आकारः सुप्रत्यये परे। सर्वनामस्थाने परे पथिन्-शब्दस्य इकारस्य अकारादेशः। पथिन्-शब्दस्य थकारस्य न्थ-आदेशः। भसंज्ञायां पथिन्-शब्दस्य टेः लोपः। पदसंज्ञायां पथिन्-शब्दस्य नकारस्य लोपः।
- **पञ्चन्-शब्दः** - पञ्चन्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। पञ्चन् इति नान्तः संख्यावाचकः। अतः षट्-संज्ञा। षट्संज्ञकात् परयोः जस्-शसोः लुक् भवति। पदसंज्ञायां पञ्चन्-शब्दे नकारस्य लोपः। आमि नुट्-आगमः भवति, उपधायाश्च दीर्घः।
- **अष्टन्-शब्दः** - अष्टन्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। अष्टन्-शब्दस्य हलादौ विभक्तौ परतः विकल्पेन आत्वं भवति। अष्टन्-शब्दात् परयोः जस्-शसोः औश्-आदेशः भवति। आमि नुट्-आगमः भवति। आत्वाभावपक्षे रूपाणि पञ्चन्-शब्दवत् भवन्ति।
- **गुणिन्-शब्दः** - गुणिन्-शब्दस्य उपधायाः दीर्घः सुप्रत्यये परे। पदसंज्ञायां नकारस्य लोपः।
- **अहन्-शब्दः** - अहन्-शब्दात् परयोः सु-अमोः लुक्(लोपः)। नकारस्य रेफादेशश्च। औ-औटोः शी-आदेशः। तस्मिन् परे अहन्-शब्दस्य अनः अकारस्य विकल्पेन लोपः। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानम् इति संज्ञा। तस्मिन् परे उपधायाः दीर्घः। भसंज्ञायाम् अनः अकारस्य लोपः। हलादिषु प्रत्ययेषु परेषु नकारस्य रु-आदेशः, तस्य च उत्वम्। सुपि रेफस्य विसर्गः, तस्य च पुनः विसर्गः। पक्षे विकल्पेन सकारादेशः।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे दण्डिन्-शब्दस्य (नपुंसकलिङ्गे) रूपाणि जानीमः। पुंलिङ्गे गुणिन् शब्दवत्। स्त्रीलिङ्गे गौरीशब्दवत्।
2. किम्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
3. किम्-शब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
4. किम्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नकारान्तः नपुंसकलिङ्गः दण्डिन्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	दण्डिन्+सु(स्)→ दण्डि	दण्डिन्+औ→ दण्डिनी	दण्डिन्+जस्(अस्)→ दण्डीनि
द्वितीया	दण्डिन्+अम्→ दण्डि	दण्डिन्+औट् (औ)→दण्डिनी	दण्डिन्+शस्(अस्)→ दण्डीनी
तृतीया	दण्डिन्+टा (आ)→दण्डिना	दण्डिन्+भ्याम्→ दण्डिभ्याम्	दण्डिन्+भिस्→ दण्डिभिः
चतुर्थी	दण्डिन्+ङे(ए)→ दण्डिने	दण्डिन्+भ्याम्→ दण्डिभ्याम्	दण्डिन्+भ्यस्→ दण्डिभ्यः
पञ्चमी	दण्डिन्+ङसि (अस्)→दण्डिनः	दण्डिन्+भ्याम्→ दण्डिभ्याम्	दण्डिन्+भ्यस्→ दण्डिभ्यः
षष्ठी	दण्डिन्+ङस् (अस्)→दण्डिनः	दण्डिन्+ओस्→ दण्डिनोः	दण्डिन्+आम्→ दण्डिनाम्
सप्तमी	दण्डिन्+ङि(इ)→ दण्डिनि	दण्डिन्+ओस्→ दण्डिनोः	दण्डिन्+सुप्(सु)→ दण्डिषु
सम्बोधने	हे दण्डिन्+सु→ हे दण्डिन्!/हे दण्डि!	हे दण्डिन्+औ→ हे दण्डिनी!	हे दण्डिन्+जस्→ हे दण्डीनि!

1. दण्डिन् + सु/अम्, सुप्रत्ययस्य, अम्-प्रत्ययस्य च लुक् (लोपः) भवति।[1] नकारस्य लोपः भवति।[2] दण्डि।
2. दण्डिन् + औ/औट्, औप्रत्ययस्य, औट्-प्रत्ययस्य च शी-आदेशः भवति।[3] दण्डिन् + शी→दण्डिन् + ई→दण्डिनी।
3. दण्डिन् + जस्/शस्, जस्-प्रत्ययस्य शस्-प्रत्ययस्य च शि-आदेशः भवति।[4] दण्डिन् + शि→दण्डिन् + इ, तस्य च सर्वनामस्थानम् इति संज्ञा।[5] सर्वनामस्थाने उपधायाः दीर्घः[6] दण्डीन् + इ→दण्डीनि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. हलादिषु प्रत्ययेषु दण्डिन्-शब्दस्य पदसंज्ञा। अतः नकारस्य लोपः।[7] दण्डिन् + भ्याम्→दण्डिभ्याम्। एवं दण्डिभिः, दण्डिभ्यः।
5. संबुद्धौ विकल्पेन नकारलोपः।[8] अतः हे दण्डिन्!, हे दण्डि! इति रूपद्वयम्।
6. अजादिषु विशिष्टं कार्यं न वर्तते।

मकारान्तः पुंलिङ्गः किम्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	किम्+सु(स्)→कः	किम्+औ→कौ	किम्+जस्(अस्)→के
द्वितीया	किम्+अम्→ कम्	किम्+औट्(औ)→ कौ	किम्+शस्(अस्)→ कान्
तृतीया	किम्+टा(आ)→ केन	किम्+भ्याम्→ काभ्याम्	किम्+भिस्→ कैः
चतुर्थी	किम्+ङे(ए)→ कस्मै	किम्+भ्याम्→ काभ्याम्	किम्+भ्यस्→ केभ्यः
पञ्चमी	किम्+ङसि (अस्)→कस्मात्	किम्+भ्याम्→ काभ्याम्	किम्+भ्यस्→ केभ्यः
षष्ठी	किम्+ङस्(अस्)→ कस्य	किम्+ओस्→ कयोः	किम्+आम्→ केषाम्
सप्तमी	किम्+ङि(इ)→ कस्मिन्	किम्+ओस्→ कयोः	किम्+सुप्(सु)→ केषु

1. किम्-शब्दस्य पुंलिङ्गे विभक्तौ परतः क-आदेशः भवति।[9] क-आदेशे कृते अयम् अकारान्तः सञ्जातः सर्वनामसंज्ञकश्च। अतः अस्य रूपाणि सर्वशब्दवत् भवन्ति। सर्वनामसंज्ञानिमित्तकानि कार्याणि भवन्ति यथा -

प्रत्ययः	आदेशः	आगमः
जस्	शी(ई)	-
ङे	स्मै	-

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	आदेशः	आगमः
ङसि	स्मात्	-
आम्	-	सुट्(स)
ङि	स्मिन्	-

1. किम् + सु→क + सु→क + स्→कः।
2. औ/औट् प्रत्यययोः परयोः वृद्धिः भवति।[10] (पूर्वसवर्णदीर्घः प्राप्तः। तस्य निषेधः क्रियते। अतः वृद्धिरेव भवति।) किम् + औ→क + औ→कौ।
3. जस्-स्थाने शी-आदेशः भवति।[11] ई अवशिष्टः, गुणः भवति। किम् + जस्→क + जस्→क + शि→के।
4. अमि पूर्वरूपं भवति।[12] कम्। शसि पूर्वसवर्णदीर्घः भवति।[13] शसः सकारस्य नकारादेशः भवति।[14] कान्। किम् + अम्→क + अम्→कम्। किम् + शस्→क+ अस्→कास्→कान्।
5. टा-स्थाने इनादेशः भवति[15] अनन्तरं गुणः भवति। किम् + ए→क + टा→क + इन→केन।
6. भ्याम्-प्रत्यये अकारस्य दीर्घः भवति।[16] किम् + भ्याम्→क + भ्याम्→काभ्याम्। किम् + टा→क + टा→क + इन→केन।
7. भिसः ऐस्-आदेशः भवति।[17] अनन्तरं वृद्धिः। किम् + भिस्→क + भिस्→क + ऐस्→कैः।
8. ङे-स्थाने स्मै-आदेशः।[18] ङसि-स्थाने स्मात्-आदेशः।[19] ङस्-स्थाने स्य-आदेशः।[20] ङि-स्थाने स्मिन्-आदेशः।[21]
   किम् + ङे→क + ङे→कस्मै।
   किम् + ङसि→क + ङसि→कस्मात्।
   किम् + ङस्→क + ङस्→कस्य।
   किम् + ङि→क + ङि→कस्मिन्।
9. भ्यस्-प्रत्यये परे अकारस्य एकारः आदेशः भवति।[22]
   किम् + भ्यस्→क + भ्यस्→के + भ्यस्→केभ्यः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

10. ओस्-प्रत्यये अकारस्य एकारः आदेशः भवति।[23] अनन्तरम् एकारस्य अय्-आदेशः। किम् + ओस्→क + ओस्→के + ओस्→ कयोस्→ कयोः।
11. सुपि अकारस्य एकारः।[24] एकारात् परस्य सुपः सकारस्य मूर्धन्यादेशः।[25] किम् + सुप्→क + सु→के + सु→केषु।

मकारान्तः स्त्रीलिङ्गः किम्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	किम्+सु(स्)→ का	किम्+औ→ के	किम्+जस्(अस्)→ काः
द्वितीया	किम्+अम्→ काम्	किम्+औट्(औ)→ के	किम्+शस्(अस्)→ काः
तृतीया	किम्+टा(आ)→ कया	किम्+भ्याम्→ काभ्याम्	किम्+भिस्→ काभिः
चतुर्थी	किम्+ङे(ए)→ कस्यै	किम्+भ्याम्→ काभ्याम्	किम्+भ्यस्→ काभ्यः
पञ्चमी	किम्+ङसि (अस्)→कस्याः	किम्+भ्याम्→ काभ्याम्	किम्+भ्यस्→ काभ्यः
षष्ठी	किम्+ङस् (अस्)→कस्याः	किम्+ओस्→ कयोः	किम्+आम्→ कासाम्
सप्तमी	किम्+ङि(इ)→ कस्याम्	किम्+ओस्→ कयोः	किम्+सुप(सु)→ कासु

1. किम्-शब्दस्य विभक्तौ क-आदेशः भवति।[26] स्त्रियां अदन्तत्वात् टाप्-प्रत्ययः भवति।[27] अस्य सर्वनामसंज्ञा वर्तते। अतः अस्य रूपाणि सर्वा-शब्दवत् भवन्ति। सर्वनामसंज्ञानिमित्तकानि कार्याणि भवन्ति यथा -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रत्ययः	आगमः	आदेशः
ङे, ङसि, ङस्, ङि	स्याट्	आपः आकारस्य ह्रस्वः
आम्	सुट्	
ङि		आम्

2. किम् + सु→क + सु→क + टाप् + सु का + सु→का + स्, आबन्तात् परस्य सुप्रत्ययस्य सस्य लोपः भवति।[28] का।
3. औ/औट् प्रत्यययोः स्थाने शी-आदेशः भवति।[29] ईकारः अवशिष्टः। गुणः भवति।

   किम् + औ/औट्→क + औ→क + टाप् + औ→का + औ→का + शी→का + ई→के।
4. जसि सवर्णदीर्घः प्राप्तः, तं बाधित्वा पूर्वसवर्णदीर्घः प्राप्तः[30], तस्य निषेधः विधीयते।[31] अतः पुनः सवर्णदीर्घः एव भवति।[32] शसि च पूर्वसवर्णदीर्घः भवति।[33] अमि पूर्वरूपं भवति।[34]

   किम् + जस्→क + जस्→क + टाप् + अस्→का + अस्→काः।

   किम् + शस्→क + शस्→क + टाप् + अस्→का + अस्→काः।

   किम् + अम्→क + अम्→क + टाप् + अम्→का + अम्→काम्।
5. आबन्तात् टा-प्रत्यये आकारस्य एकारः आदेशः भवति।[35] तस्य अयादेशः भवति।

   किम् + टा→क + टा→क + टाप् + ए→का + आ→के + आ→कया।
6. ङे, ङसि, ङस्, ङि - प्रत्ययानां स्याट्-आगमः भवति। आपः आकारस्य ह्रस्वः अपि भवति।[36] ङिस्थाने आम्-आदेशः अपि भवति।[37]

   किम् + ङे/ङसि/ङस्/ङि→क + ए/अस्→क + टाप् + ए/अस्→का + ए/अस्→क + स्या + ए/अस्→कस्यै, कस्याः, कस्याम्।
7. ओसि आपः आकारस्य एकारः आदेशः भवति।[38] तस्य एकारस्य अय्-आदेशः भवति।

   किम्+ओस्→क+ओस्→क+टाप् + ओस्→का + ओस्→के + ओस्→कयोः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8. आमः सुट्-आगमः भवति।[39] किम् + आम्→क + आम्→क + टाप् + आम्→का + आम्→का + स् + आम्→कासाम्।

9. सुपि का + सु→कासु

मकारान्तः नपुंसकलिङ्गः किम्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	किम्+सु(स्)→ किम्	किम्+औ→ के	किम्+जस्(अस्)→ कानि
द्वितीया	किम्+अम्→ किम्	किम्+औट्(औ)→ के	किम्+शस्(अस्)→ कानि
तृतीया	किम्+टा(आ)→ केन	किम्+भ्याम्→ काभ्याम्	किम्+भिस्→ कैः
चतुर्थी	किम्+ङे(ए)→ कस्मै	किम्+भ्याम्→ काभ्याम्	किम्+भ्यस्→ केभ्यः
पञ्चमी	किम्+ङसि (अस्)→कस्मात्	किम्+भ्याम्→ काभ्याम्	किम्+भ्यस्→ केभ्यः
षष्ठी	किम्+ङस् (अस्)→कस्य	किम्+ओस्→ कयोः	किम्+आम्→ केषाम्
सप्तमी	किम्+ङि(इ)→ कस्मिन्	किम्+ओस्→ कयोः	किम्+सुप्(सु)→ केषु

1. किम्-शब्दात् परयोः सु-अमोः लुक् (लोपः) भवति।[40] अतः अत्र क-आदेशः न भवति। अन्येषु प्रत्ययेषु क-आदेशः भवति।[41] किम् + सु/अम्→किम्।

2. औ-औटोः स्थाने शी-आदेशः भवति।[42] ईकारः अवशिष्टः। अत्र किमः क-आदेशः भवति। अतः अकार-ईकारयोः गुणः। किम् + औ/औट्→किम् + औ→क + औ→क + शी→के।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. जस्-शसोः स्थाने शि-आदेशः भवति।[43] तत्र इकारः अवशिष्टः। तस्य च सर्वनामस्थानम् इति संज्ञा।[44] अतः नुम्-आगमः भवति।[45] नान्तस्य उपधायाः दीर्घः अपि भवति।[46] किम् + जस्/शस्→क + जस्→क + शि→क + इ→कन् + इ→कान् + इ→कानि।
4. अवशिष्टानि रूपाणि पुंलिङ्गवत्।

पाठसारः -

1. दण्डिन्-शब्दः - दण्डिन्-शब्दात् परयोः सु-अमोः लुक् (लोपः)। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः स्थाने शि-आदेशः। पदसंज्ञायां नकारस्य लोपः।
2. किम्-शब्दः पुंलिङ्गः - किम्-शब्दस्य विभक्तौ क-आदेशः भवति। अतः सर्वनामसंज्ञानिमित्तकानि कार्याणि भवन्ति। सर्वशब्दवत् रूपाणि भवन्ति।
3. किम्-शब्दः स्त्रीलिङ्गः - किम्-शब्दस्य विभक्तौ क-आदेशः। स्त्रियां टाप्। तेन अयम् सर्वनामसंज्ञकः आकारान्तः सञ्जातः। अतः सर्वाशब्दवत् रूपाणि भवन्ति।
4. किम्-शब्दः नपुंसकलिङ्गः - किम्-शब्दात् परयोः सु-अमोः लुक्। औ-औटोः शी-आदेशः। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानसंज्ञा। तेन नुम्-आगमः, उपधायाः दीर्घश्च। इतराणि रूपाणि पुंलिङ्गवद् भवन्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. किम्-शब्दस्य नपुंसकलिङ्गे प्रथमाविभक्तौ बहुवचने कानि कार्याणि भवन्ति ?
2. किम्-शब्दस्य स्त्रीलिङ्गे षष्ठ्येकवचने किं रूपम् ? प्रक्रिया का ?
3. किम्-शब्दस्य पुंलिङ्गे प्रथमाविभक्तौ बहुवचने कानि कार्याणि भवन्ति ?
4. दण्डिन्-शब्दस्य नपुंसकलिङ्गे प्रथमाविभक्तौ बहुवचने का प्रक्रिया ?

योग्यमुत्तरं चिनुत -

1. दण्डिन् + शि - किं कार्यम् ?
   अ) उपधायाः दीर्घः आ) नकारस्य लोपः इ) शेः लुक्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. दण्डिन् + आम् - किं कार्यम् ?
अ) नुट्-आगमः आ) नुम्-आगमः इ) प्रकृतिप्रत्यययोः संयोगः

3. दण्डिन् + ङि - किं रूपम् ?
अ) दण्डीनि आ) दण्डिनि इ) उभयम्

4. पदसंज्ञायां दण्डिन्-शब्दस्य किं कार्यम् ?
अ) नलोपः आ) नकारस्य अकारः इ) उभयम्

5. किम् + सु - अत्र किं कार्यम् ?
अ) मकारस्य अकारः आ) मकारस्य लोपः इ) किमः कः

6. किम् + ङि - अत्र ङिप्रत्ययस्य कः आदेशः ?
अ) स्मिन् आ) स्मात् इ) आम्

7. स्त्रियां किम्-शब्दात् कः प्रत्ययः ?
अ) ङीप् आ) चाप् इ) टाप्

8. का + ङि - अत्र ङेः कः आदेशः ?
अ) स्याम् आ) आम् इ) स्मिन्

9. औटः शी आदेशः कदा भवति ?
अ) आपः परश्चेत् आ) नपुंसकात् परश्चेत् इ) उभयत्र

10. जसः शी-आदेशः कदा भवति ?
अ) अदन्तात् सर्वनाम्नः परश्चेत् आ) नपुंसकात् परश्चेत् इ) उभयत्र

योजयत -

1. का + टा	शी-आदेशः
2. किम् + टा	शि-आदेशः
3. किम् + जस्(नपुं)	इन-आदेशः
4. किम् + जस्(पुम्)	आपः आकारस्य एकारः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. का + भिस्
2. दण्डिन् + भिस्
3. किम् + भिस्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. का + आम्
5. किम् + ङि (स्त्री)

प्रक्रियां लिखित्वा भेदं प्रतिपादयत -

1. किम् + ङि (स्त्री), किम् + ङि (पुंसि)
2. किम् + सु (पुं), किम् + सु (नपुं)
3. किम् + अम् (पुं), किम् + अम् (नपुं)
4. किम् + सु (स्त्री), किम् + सु (पुं)
5. किम् + औ (स्त्री), किम् + औ (नपुं)

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. के
2. कस्यै
3. कस्मिन्
4. दण्डिनः
5. कानि

---

1. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
2. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
3. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
4. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
5. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
6. इन्हन्पूषार्यम्णां शौ (6-4-12) - एषां शावेवोपधाया दीर्घो नान्यत्र।
7. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।
8. संबुद्धौ नपुंसकानां नलोपो वा वाच्यः (वा)
9. किमः कः (7-2-103) - किमः कः स्याद्विभक्तौ।
10. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेशः स्यात्।
11. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
12. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

13. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
14. तस्माच्छसो नः पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो यः शसः सकारस्तस्य नः स्यात्पुंसि।
15. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
16. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घः स्यात्।
17. अतो भिस ऐस् (7-1-9) - अकारान्तादङ्गाद्भिस ऐस् स्यात्।
18. सर्वनाम्नः स्मै (7-1-14) - अतः सर्वनाम्नो ङे इत्यस्य स्मै स्यात्।
19. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
20. टाङसिङसामिनात्स्याः (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशाः स्युः।
21. ङसिङ्योः स्मात्स्मिनौ (7-1-15) - अतः सर्वनाम्नो ङसिङ्योरेतौ स्तः।
22. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
23. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकारः स्यात्।
24. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकारः स्यात्।
25. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्याऽपदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
26. किमः कः (7-2-103) - किमः कः स्याद्विभक्तौ।
27. अजाद्यतष्टाप् (4-1-4) - अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
28. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
29. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।
30. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
31. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
32. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्।
33. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
34. अमि पूर्वः (6-1-107) - अकोऽम्यचि परतः पूर्वरूपमेकादेशः स्यात्।
35. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
36. सर्वनाम्नः स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः।
37. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
38. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
39. आमि सर्वनाम्नः सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः स्यात्।
40. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

41. किमः कः (7-2-103) - किमः कः स्याद्विभक्तौ।
42. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
43. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
44. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
45. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
46. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

नवमः पाठः - इदम्-शब्दः त्रिषु लिङ्गेषु, तथा गिर्-शब्दः

अष्टमस्य पाठस्य पुनरावृत्तिः-

- दण्डिन्-शब्दः-दण्डिन्-शब्दात् परयोः सु-अमोः लुक्(लोपः)। औ-औटोः स्थाने शी-आदेशः। जस्-शसोः स्थाने शि-आदेशः। पदसंज्ञायां नकारस्य लोपः।
- संबुद्धौ विकल्पेन नकारलोपः।
- किम्-शब्दः पुंलिङ्गः - किम्-शब्दस्य विभक्तौ क-आदेशः भवति। अतः सर्वनामसंज्ञानिमित्तकानि कार्याणि भवन्ति। पुंलिङ्गे सर्वशब्दवत् रूपाणि।
- किम्-शब्दः स्त्रीलिङ्गः - किम्-शब्दस्य विभक्तौ क-आदेशः, स्त्रियां टाप्। तेन अयम् सर्वनामसंज्ञकः आकारान्तः सञ्जातः। अतः सर्वाशब्दवत् रूपाणि भवन्ति।
- किम्-शब्दः नपुंसकलिङ्गः - किम्-शब्दात् परयोः सु-अमोः लुक्। औ-औटोः शी-आदेशः। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानसंज्ञा। तेन नुम्-आगमः, उपधायाः दीर्घश्च। इतराणि रूपाणि पुंलिङ्गवद् भवन्ति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे इदम्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
2. इदम्-शब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
3. इदम्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।
4. रेफान्तस्य गिर्-शब्दस्य रूपाणि पठामः।

मकारान्तः पुंलिङ्गः इदम्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इदम्+सु(स्)→ अयम्	इदम्+औ→ इमौ	इदम्+जस्(अस्)→ इमे
द्वितीया	इदम्+अम्→ इमम्/एनम्	इदम्+औट्(औ)→ इमौ/एनौ	इदम्+शस्(अस्)→ इमान्/एनान्
तृतीया	इदम्+टा(आ)→ अनेन/एनेन	इदम्+भ्याम्→ आभ्याम्	इदम्+भिस्→ एभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	इदम्+ङे(ए)→ अस्मै	इदम्+भ्याम्→ आभ्याम्	इदम्+भ्यस्→ एभ्यः
पञ्चमी	इदम्+ङसि(अस्)→ अस्मात्	इदम्+भ्याम्→ आभ्याम्	इदम्+भ्यस्→ एभ्यः
षष्ठी	इदम्+ङस्(अस्)→ अस्य	इदम्+ओस्→ अनयोः/एनयोः	इदम्+आम्→ एषाम्
सप्तमी	इदम्+ङि(इ)→ अस्मिन्	इदम्+ओस्→ अनयोः/एनयोः	इदम् + सुप्(सु)→ एषु

इदमः अन्वादेशे द्वितीयाविभक्तौ, टाप्रत्यये, ओस्प्रत्यये च एनादेशः भवति।[1]

अन्वादेशः - किञ्चित् कार्यं कर्तुं प्रवर्तितस्य पुनः अन्यत् कार्यं कर्तुमुपादानम्।

1. इदम्-शब्दस्य विभक्तौ परतः मकारस्य अकारादेशः भवति।[2]
2. इदम् + सु→इदम् + स्, अत्र मकारस्य अकारः प्राप्तः, परन्तु मकारस्य मकारः एव भवति।[3] सु-प्रत्यये परे इदमः इद्-स्थाने अय्-आदेशः भवति पुंलिङ्गे।[4] इद् अम् + स्→अय् अम् + स्, सकारस्य लोपः भवति।[5] अयम्।
3. इदम् + औ/औट्→इदम् + औ, अत्र मकारस्य अकारादेशः। इद अ + औ, पररूपम् एकादेशः भवति।[6] इद + औ, इदमः दस्य मकारादेशः भवति विभक्तौ।[7] इम + औ, पूर्वसवर्णदीर्घः प्राप्तः[8] तस्य निषेधः भवति।[9] अतः अकार-औकारयोः वृद्धिः एकादेशः भवति।[10] इमौ।
4. इदम् + जस्→इदम् + अस्, मकारस्य अकारादेशः। इद अ + अस्, पररूपम् एकादेशः भवति। इद + अस्, जसः शी-आदेशः भवति।[11] इद + शी→इद + ई, दकारस्य मकारादेशः इम + ई, गुणः, इमे।

अम्, औट्, शस्, टा, ओस् - प्रत्ययेषु परेषु अन्वादेशे इदमः एन-आदेशः भवति।[12]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

5. इदम् + अम्, मकारस्य अकारः। पररूपम् एकादेशः। दकारस्य मकारादेशः। पूर्वरूपे एकादेशे - इमम्। अन्वादेशे इदम् + अम्→इद + अ + अम्→इद + अम् एन + अम्→एनम्। अन्वादेशे द्वितीयाविभक्तौ परतः एनादेशः भवति।[13] इदम् + औट्, इदम् + औ, मकारस्य अकारः, इद + अ + औ, अन्वादेशे एनादेशः। अन्वादेशे द्वितीयाविभक्तौ परतः एनादेशः भवति।[14] एनौ।

6. इदम् + शस्, इदम् + अस्, मकारस्य अकारः, इद + अ + अस्, अन्वादेशे एनादेशः[15] - शसः सकारस्य नकारः। एनान्।

7. अन्वादेशे इदम् + टा, इदम् + आ, इद + अ + आ→इद + आ, एनादेशः[16] - एन + आ, टास्थाने इन। एनेन।

अन्वादेशे उदाहरणानि
- अम्-इमं छात्रं छन्दः अध्यापय, अथो एनं व्याकरणमध्यापय।
- टा-अनेन छत्रेण रात्रिरधीता, अथो एनेन अहरप्यधीतम्।
- ओस्-अनयोः छात्रयोः शोभनं शीलम्, अथो एनयोः प्रभूतं स्वम्।

6. इदम् + शस्, मकारस्य अकारः, पररूपम् एकादेशः। दकारस्य मकारः, पूर्वसवर्णदीर्घः।[17] सकारस्य नकारः।[18] इमान्।

7. टाप्रत्यये इदम्-शब्दस्य इद्-भागस्य अन्-आदेशः भवति।[19] इदम्+टा, मकारस्य अकारादेशः। पररूपम् एकादेशः। इद + टा, इद्-स्थाने अन्-आदेशः। अन् अ + टा, टा-स्थाने इन-आदेशः।[20] गुणः। अनेन। अन्वादेशे - एनेन।

8. इदम् + भ्याम्, मकारस्य अकारादेशः। पररूपम् एकादेशः। इद + भ्याम्, इद्-इत्यस्य लोपः।[21] अकारः अवशिष्टः। अ + भ्याम्, यञादौ सुपि अकारस्य दीर्घः।[22] आभ्याम्।

9. भिस्, भ्यस्, सुप् - एतेषु परेषु मकारस्य अकारः आदेशः। इद + भिस्/ भ्यस्/ सुप् - अत्र इद्-इति अंशस्य लोपः।[23] अ + भिस्/ भ्यस्/ सुप्। अकारस्य एकारः आदेशः भवति झलादौ बहुवचने।[24] एभिः, एभ्यः, एषु। भिस्-स्थाने ऐस्-आदेशः प्राप्तः[25], परन्तु तस्य निषेधः भवति।[26] अतः - एभिः। ए + सु, सुपः सकारस्य षकारादेशः।[27] एषु।

10. इदम् + ङे/ङसि/ङस्/ङि एतेषु परेषु मकारस्य अकारादेशः। इद अ + ङे/ङसि/ङस्/ङि, पररूपम् एकादेशः। इद + ङे/ङसि/ङस्/ङि। अयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अकारान्तः सर्वनामसंज्ञकः। अतः ङेस्थाने स्मै-आदेशः, ङसिस्थाने स्मात्-आदेशः, ङस्-स्थाने स्य-आदेशः, ङिस्थाने स्मिन्-आदेशः च भवति। इद + स्मै/स्मात्/स्य/स्मिन्। एते सर्वे हलादयः। अतः इद्-इत्यस्य लोपः।[28] अ इति अवशिष्टः। अ + स्मै/स्मात्/स्य/स्मिन्→अस्मै, अस्मात्, अस्य, अस्मिन्।

11. ओस्-प्रत्यये इदम्-शब्दस्य अकारादेशः। पररूपम् एकादेशः। इद + ओस्, इद्-स्थाने अन्-आदेशः[29] अन + ओस्, ओसि अकारस्य एकादेशः भवति।[30] तस्य एकारस्य अय्-आदेशः। अनयोः।

इदम् + ओस्→इद + अ + ओस्→इद + ओस्, अन्वादेशे एनादेशः।[31] एन + ओस्, ओसि अकारस्य एकारादेशः - एने + ओस्→एनयोः।

मकारान्तः स्त्रीलिङ्गः इदम्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इदम्+सु(स्)→ इयम्	इदम्+औ→ इमे	इदम्+जस्(अस्)→ इमाः
द्वितीया	इदम्+अम्→ इमाम्/एनाम्	इदम्+औट्(औ)→ इमे/एने	इदम्+शस्(अस्)→ इमाः/एनाः
तृतीया	इदम्+टा(आ)→ अनया/एनया	इदम्+भ्याम्→ आभ्याम्	इदम्+भिस्→ आभिः
चतुर्थी	इदम्+ङे(ए)→ अस्यै	इदम्+भ्याम्→ आभ्याम्	इदम् + भ्यस्→ आभ्यः
पञ्चमी	इदम्+ङसि(अस्)→ अस्याः	इदम्+भ्याम्→ आभ्याम्	इदम्+भ्यस्→ आभ्यः
षष्ठी	इदम्+ङस्(अस्)→ अस्याः	इदम्+ओस्→ अनयोः/एनयोः	इदम्+आम्→ आसाम्
सप्तमी	इदम्+ङि(इ)→ अस्याम्	इदम्+ओस्→ अनयोः/एनयोः	इदम्+सुप्→ आसु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. इदम् + सु→इदम् + स् अत्र मकारस्य अकारादेशः प्राप्तः।[32] तं बाधित्वा मकारस्य मकारः एव भवति।[33] दकारस्य यकारादेशः भवति सौ परे।[34] सकारस्य लोपः भवति।[35] इयम्।

2. इदम् + औ/औट्, मकारस्य अकारः। पररूपम् एकादेशः। इद + औ/औट्, इद अकारान्तः। अतः स्त्रियां टाप्-प्रत्ययः भवति।[36] इद + आ + औ/औट्, औस्थाने औट्-स्थाने च शी आदेशः भवति।[37] इद + आ + शी, दकारस्य मकारादेशः भवति।[38] इम + आ + शी→इम + आ + ई, सवर्णदीर्घः, इमा + ई, गुणः। इमे।

3. इदम् + जस्/शस्→इदम् + अस् मकारस्य अकारः। पररूपम् एकादेशः। स्त्रियां टाप्। इद + आ + अस्, सवर्णदीर्घः। इदा + अस्, दकारस्य मकारः। इमा + अस् जसि सवर्णदीर्घः प्राप्तः, तं बाधित्वा पूर्वसवर्णदीर्घः प्राप्तः[39], तस्य निषेधः विधीयते।[40] अतः पुनः सवर्णदीर्घः एव भवति।[41] शसि पूर्वसवर्णदीर्घः। इमास्, सकारस्य रुत्वे विसर्गे च - इमाः।

4. इदम् + अम्, मकारस्य अकारः। इद अ + अम्, पररूपम्। इद + अम्, स्त्रियां टाप्। इद आ + अम्, सवर्णदीर्घः इदा + अम्, दकारस्य मकारः। इमा + अम्, पूर्वरूपम्। इमाम्।

   अ. इदम् + अम् → इद अ अम् मकारस्य अकारः, पररूपम् - इद अम्, अन्वादेशे एनादेशः।[42] एन + अम्, स्त्रियां टाप् → एना अम्, पूर्वरूपैकादेशः- एनाम्।

   आ. इदम् + औट्, मस्य अकारः, पररूपैकादेशः → इद औ, अन्वादेशे एनादेशः[43] → एन + औ, स्त्रियां टाप्। एना + औ, आबान्तात् परस्य औप्रत्ययस्य शी-आदेशः[44] - एन + शी → एन + ई → एने।

   इ. इदम् + शस्, मस्य अकारः, पररूपमेकादेशः → इद + अस्, अन्वादेशे एनादेशः[45]→ एन + अस्, स्त्रियां टाप् एना + अम्, पूर्वरूपमेकादेशः→ एनाः।

5. इदम् + टा, मकारस्य अकारः। इद अ + टा, पररूपम्। इद + टा, स्त्रियां टाप्। इद आ + टा, सवर्णदीर्घः। इदा + टा, इदः अनादेशः भवति[46] अन् आ + टा→अना + टा→अना + आ, आकारस्य एकारः आदेशः भवति।[47] अने +

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

आ, अयादेशः भवति। अनया।

इदम् + टा, मस्य अकारः, पररूपैकादेशः → इद + आ, अन्वादेशे एनादेशः। एन + आ, स्त्रियां टाप् एना + आ, आपः एकारादेशः → एने आ → एनया।

6. भ्याम्, भिस्, भ्यस् - एतेषु परेषु मकारस्य अकारः। इद अ + भ्याम्/भिस्/भ्यस् - पररूपम्। इद + भ्याम्/भिस्/भ्यस्। स्त्रियां टाप् इद + टाप् + भ्याम्/भिस्/भ्यस्→ इद + आ + भ्याम्/भिस्/भ्यस्, सवर्णदीर्घः। इदा + भ्याम्/भिस्/भ्यस्। हलि परे इदः लोपः[48] आ + भ्याम्/भिस्/भ्यस्→आभ्याम्, आभिः, आभ्यः।

7. इदम् + ङे, मकारस्य अकारादेशः। इद अ + ए, पररूपम्। इद + ए, टाप्, सवर्णदीर्घश्च इदा + ए, आबन्तत्वात् सर्वनामत्वात् च ङेप्रत्ययस्य स्याट्-आगमः[49], आपः ह्रस्वश्च भवति। इद + स्या + ए, इदः लोपः। अ + स्या + ए, आकार-एकारयोः वृद्धिः। अ + स्यै→अस्यै।

8. इदम् + ङसि/ङस्→इदम् + अस्, मकारस्य अकारादेशः। पररूपम्। स्त्रियां टाप्, सवर्णदीर्घश्च। इदा + अस्, आपः ह्रस्वः प्रत्ययस्य स्याट्-आगमश्च। इद + स्या + अस्, इदः लोपः हलादौ प्रत्यये परे। अ + स्या + अस्→ अस्यास्→अस्याः।

9. इदम् + ओस्, मकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। इदा + ओस्, इदः अन्-आदेशः। अन् आ + ओस्, आकारस्य एकारादेशः[50] अन् ए + ओस्, अयादेशः। अनयोः।

इदम् + ओस्, मस्य अकारः, पररूपैकादेशः → इद + ओस्, अन्वादेशे एन + ओस्, स्त्रियां टाप् एना + ओस्, ओसि आपः एकारादेशः → एने ओस् → एनयोः।

10. इदम् + आम्, मकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सर्वनाम्नः परस्य आमः सुट् आगमः। इदा + स् + आम्, इदः हलि लोपः। आ + स् + आम्→ आसाम्।

11. इदम् + ङि, मकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। इदा + ङि, ङिस्थाने आम्-आदेशः।[51] इदा + आम्, आपः ह्रस्वः, प्रत्ययस्य स्याट्-आगमश्च। इद+स्या+आम्, हलि परे इदः लोपः। अ+स्या+ आम्→अस्याम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

12. इदम् + सुप्→इदम् + सु, मकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। इदा + सु, हलि इदः लोपः। आसु।

मकारान्तः नपुंसकलिङ्गः इदम्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	इदम्+सु(स्)→ इदम्	इदम्+औ→ इमे	इदम्+जस्(अस्)→ इमानि
द्वितीया	इदम्+अम्→ इदम्/एनत्	इदम्+औट्(औ)→ इमे/एने	इदम्+शस्(अस्)→ इमानि/एनानि
तृतीया	इदम्+टा(आ)→ अनेन/एनेन	इदम्+भ्याम्→ आभ्याम्	इदम्+भिस्→ एभिः
चतुर्थी	इदम्+ङे(ए)→ अस्मै	इदम्+भ्याम्→ आभ्याम्	इदम्+भ्यस्→ एभ्यः
पञ्चमी	इदम्+ङसि (अस्)→अस्मात्	इदम्+भ्याम्→ आभ्याम्	इदम्+भ्यस्→ एभ्यः
षष्ठी	इदम्+ङस् (अस्)→अस्य	इदम्+ओस्→ अनयोः/एनयोः	इदम्+आम्→ एषाम्
सप्तमी	इदम्+ङि(इ)→ अस्मिन्	इदम् + ओस्→ अनयोः/एनयोः	इदम्+सुप(सु)→ एषु

1. इदम् + सु/अम्, सु-अमोः लुक् भवति।[52] अतः इदम् इत्येव रूपम्। इदम् + अम् अन्वादेशे एनद्-आदेशः[53], एनद् + अम् - अमः लुक् (लोपः)→ अवसाने वा चर्त्वम् → एनत्। पक्षे जश्त्वे एनद्।
2. इदम् + औ/औट्, मकारस्य अकारः, पररूपम्, दकारस्य मकारः। औ-औटोः स्थाने शी-आदेशः[54] इम + शी→इम + ई→इमे।
   इदम् + औट्, अन्वादेशे एनद्-आदेशः[55], एनद् + औ→दस्य अकारः→एन औ, पररूपमेकादेशः→एन औ, औस्थाने शी, एन + शी→एन + ई→एने।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. इदम् + जस्/शस्, मकारस्य अकारः। पररूपम्। दकारस्य मकारः। जस्-शसोः स्थाने शि-आदेशः। इम + शि→इम + इ, सर्वनामस्थानम् इति संज्ञा।[56] अतः अजन्तस्य नुम् इति आगमः सर्वनामस्थाने[57], इमन् + इ, सर्वनामस्थाने परे नान्तस्य उपधायाः दीर्घः।[58] इमान् + इ→इमानि।

इदम् + शस्, अन्वादेशे एनद् - आदेशः।[59] एनद् अस्, शसः शि, दस्य अकारः, पररूपम् → एन + इ, नुमागमः, उपधादीर्घः - एनानि।

4. अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।

रेफान्तः स्त्रीलिङ्गः गिर्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	गिर्+सु(स्)→ गीः	गिर्+औ→ गिरौ	गिर्+जस्(अस्)→ गिरः
द्वितीया	गिर्+अम्→ गिरम्	गिर्+औट्(औ)→ गिरौ	गिर्+शस्(अस्)→ गिरः
तृतीया	गिर्+टा(आ)→ गिरा	गिर्+भ्याम्→ गीर्भ्याम्	गिर्+भिस्→ गीर्भिः
चतुर्थी	गिर्+ङे(ए)→ गिरे	गिर्+भ्याम्→ गीर्भ्याम्	गिर्+भ्यस्→ गीर्भ्यः
पञ्चमी	गिर्+ङसि(अस्)→ गिरः	गिर्+भ्याम्→ गीर्भ्याम्	गिर्+भ्यस्→ गीर्भ्यः
षष्ठी	गिर्+ङस्(अस्)→ गिरः	गिर्+ओस्→ गिरोः	गिर्+आम्→ गिराम्
सप्तमी	गिर्+ङि(इ)→ गिरि	गिर्+ओस्→ गिरोः	गिर्+सुप्→ गीर्षु
सम्बोधनम्	हे गिर्+सु(स्)→ हे गीः!	हे गिर्+औ→ हे गिरौ!	हे गिर्+जस्(अस्)→ हे गिरः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

गॄ धातोः क्विपि गिर् इति निष्पन्नम्। क्विबन्तः धातुः अपि भवति प्रतिपदिकमपि।

1. गिर् + सु→गिर् + स्, हलः परस्य सकारस्य लोपः[60] गिर्, रेफान्तस्य धातोः उपधायाः इकः दीर्घः भवति पदान्ते।[61] गिर्, रेफस्य विसर्गः। गीः।
2. भ्याम्, भिस्, भ्यस्, सुप्-प्रत्ययेषु परेषु पूर्वस्य पदसंज्ञा वर्तते।[62] अतः उपधायाः इकः दीर्घः भवति।[63] गीर्भ्याम्, गीर्भिः, गीर्भ्यः, गीर्षु।
3. अजादिषु विशिष्टं कार्यं न वर्तते।

पाठसारः -

1. इदम्-शब्दः पुंलिङ्गः - इदम्-शब्दस्य विभक्तौ परतः मकारस्य अकारादेशः भवति। सु-प्रत्यये परे इदमः इद्-स्थाने अय्-आदेशः भवति पुंलिङ्गे। मकारस्य मकारः एव भवति, अकारः न भवति। इदमः दस्य मकारादेशः भवति विभक्तौ परतः। टाप्रत्यये ओसि च इदम्-शब्दस्य इद्-भागस्य अन्-आदेशः भवति। हलादौ प्रत्यये परे इदः लोपः। अन्वादेशे एनादेशः प्रवर्तते।
2. इदम्-शब्दः स्त्रीलिङ्गः - इदम्-शब्दस्य विभक्तौ परतः मकारस्य अकारादेशः भवति। स्त्रियां टाप्। सुप्रत्यये तु मकारस्य मकारः एव। दकारस्य च यकारः। अन्यत्र दकारस्य मकारः। टाप्रत्यये ओसि च इदम्-शब्दस्य इद्-भागस्य अन्-आदेशः भवति। हलादौ प्रत्यये परे इदः लोपः। अन्वादेशे एनादेशः प्रवर्तते।
3. इदम्-शब्दः नपुंसकलिङ्गः - इदम्-शब्दात् परयोः सु-अमोः लुक्। अन्यासु विभक्तिषु मकारस्य अकारः। दकारस्य मकारः। औ-औटोः शी-आदेशः, जस्-शसोः शि-आदेशः। अन्यानि रूपाणि पुंलिङ्गवदेव। अन्वादेशे एनद् आदेशः।
4. गिर्-शब्दः -गिर्-शब्दस्य उपधायाः इकः दीर्घः भवति पदसंज्ञायाम्। अजादिषु प्रत्ययेषु विशिष्टं कार्यं नास्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. गिर्-शब्दस्य प्रथमैकवचने रूपम्, प्रक्रियां च लिखत?
2. इदम्-शब्दस्य नपुंसकलिङ्गे प्रथमाविभक्तौ बहुवचने किं रूपम्? का च प्रक्रिया?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. इदम्-शब्दस्य स्त्रीलिङ्गे प्रथमैकवचने किं रूपम्? का च प्रक्रिया?
4. इदम्-शब्दस्य पुंलिङ्गे प्रथमैकवचने किं रूपम्? का च प्रक्रिया?

योग्यमुत्तरं चिनुत -

1. विभक्तौ परतः इदमः मकारस्य कः आदेशः?
   अ) अ आ) इ इ) म
2. इदमः मकारस्य मकारः कदा भवति?
   अ) औ आ) सु इ) सुप्
3. इदमः हलि किं कार्यम्?
   अ) दकारस्य यकारः आ) इदः लोपः इ) अय्-आदेशः
4. इदम् + टा - अत्र किं कार्यम्?
   अ) इदः लोपः आ) दकारस्य मकारः इ) इदः अन्-आदेशः
5. इदा + जस् - किं रूपम्?
   अ) इमाः आ) इमे इ) इमौ
6. इमा + अस्(जस्) कः सन्धिः?
   अ) सवर्णदीर्घः आ) पूर्वसवर्णदीर्घः इ) पूर्वरूपम्
7. इमा + अस्(शस्) कः सन्धिः?
   अ) पूर्वरूपम् आ) सवर्णदीर्घः इ) पूर्वसवर्णदीर्घः
8. इमा + अम् - कः सन्धिः?
   अ) पूर्वसवर्णदीर्घः आ) पूर्वरूपम् इ) सवर्णदीर्घः
9. इदम् + औ - नपुंसकलिङ्गे किं रूपम्?
   अ) इमानि आ) इमे इ) इमौ
10. गिर् + सुप् - किं रूपम्?
    अ) गीः आ) गिर्षु इ) गीर्षु

योजयत -

1. इदम् + सु(पुं)	उपधायाः इकः दीर्घः
2. इदम् + सु(स्त्री)	इदः अय्
3. इदम् + सु(नपुं)	दकारस्य यकारः
4. गिर् + भ्याम्	सोः लुक्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. इदम् + सुप्
2. इदा + भ्याम्
3. इदम् + भ्याम्
4. गिर् + भिस्
5. इदम् (स्त्री) + सु

प्रक्रियां लिखित्वा, भेदं प्रतिपादयत -

1. अनेन, एनेन
2. एनम्, एनम्
3. एने (नपुं), एने (स्त्री)
4. एनयो: (स्त्री), एनयो: (पुं)
5. एनत्, एनम्

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. आसु
2. इमान्
3. अनया
4. इमानि
5. एनयो:

---

1. द्वितीयाटौस्स्वेन: (2-4-34) - द्वितीयायां टौसोश्च परत इदमेतदोरेनादेश: स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेश:। यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयो: पवित्रं कुलमेनयो: प्रभूतं स्वमिति।
2. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
3. इदमो म: (7-2-108) - इदमो मस्य म: स्यात्सौ परे।
4. इदोऽय् पुंसि (7-2-111) - इदम इदोऽय् स्यात्सौ पुंसि।
5. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
6. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परत: पररूपमेकादेश: स्यात्।
7. दश्च (7-2-109) - इदमो दस्य म: स्याद्विभक्तौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

8. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
9. नादिचि (6-1-104) - अवर्णादचिपरे न पूर्वसवर्णदीर्घ:।
10. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेश: स्यात्।
11. जस: शी (7-1-17) - अदन्तत्सर्वनाम्न: परस्य जस: शी स्यात्।
12. द्वितीयाटौस्स्वेन: (2-4-34) - द्वितीयायां टौसोश्च परत इदमेतदोरेनादेश: स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेश:। यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयो: पवित्रं कुलमेनयो: प्रभूतं स्वमिति।
13. द्वितीयाटौस्स्वेन: (2-4-34) - सूत्रार्थ: पूर्वं दत्त:।
14. द्वितीयाटौस्स्वेन: (2-4-34) - सूत्रार्थ: पूर्वं दत्त:।
15. द्वितीयाटौस्स्वेन: (2-4-34) - सूत्रार्थ: पूर्वं दत्त:।
16. द्वितीयाटौस्स्वेन: (2-4-34) - सूत्रार्थ: पूर्वं दत्त:।
17. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
18. तस्माच्छसो न: पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो य: शस: सकारस्तस्य न: स्यात्पुंसि।
19. अनाप्यक: (7-2-112) - अककारस्येदम इदोऽन् स्यादापि विभक्तौ। आबिति टा इत्यारभ्य सुप: पकारेण प्रत्याहार:।
20. टाङसिङसामिनात्स्या: (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशा: स्यु:।
21. हलि लोप: (7-2-113) - अककारस्येदम इदो लोप: स्यादापि हलादौ।
22. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घ: स्यात्।
23. हलि लोप: (7-2-113) - अककारस्येदम इदो लोप: स्यादापि हलादौ।
24. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकार: स्यात्।
25. अतो भिस ऐस् (7-1-9) - अकारान्तादङ्गाद्भिस ऐस् स्यात्।
26. नेदमदसोरको: (7-1-11) - अककारयोरिमदसोर्भिस ऐस् न स्यात्।
27. आदेशप्रत्यययो: (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेश: प्रत्ययावयवश्च य: सकारस्तस्य मूर्धन्यादेश: स्यात्।
28. हलि लोप: (7-2-113) - अककारस्येदम इदो लोप: स्यादापि हलादौ।
29. अनाप्यक: (7-2-112) - अककारस्येदम इदोऽन् स्यादापि विभक्तौ। आबिति टा इत्यारभ्य सुप: पकारेण प्रत्याहार:।
30. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकार: स्यात्।
31. द्वितीयाटौस्स्वेन: (2-4-34) - द्वितीयायां टौसोश्च परत इदमेतदोरेनादेश: स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेश:। यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयो: पवित्रं कुलमेनयो: प्रभूतं स्वमिति।
32. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

33. इदमो मः (7-2-108) - इदमो मस्य मः स्यात्सौ परे। त्यदाद्यत्वापवादः।
34. यः सौ (7-2-110) - इदमो दस्य यः स्यात्सौ।
35. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
36. अजाद्यतष्टाप् (4-1-4) - अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
37. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।
38. दश्च (7-2-109) - इदमो दस्य मः स्याद्विभक्तौ।
39. प्रथमयोः पूर्वसवर्णः (6-1-102) - अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात्।
40. दीर्घाज्जसि च (6-1-105) - दीर्घाज्जसि इचि च परे प्रथमयोः पूर्वसवर्णदीर्घो न स्यात्।
41. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्।
42. द्वितीयाटौस्स्वेनः (2-4-34) - द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति।
43. द्वितीयाटौस्स्वेनः (2-4-34) - सूत्रार्थः पूर्वं दत्तः।
44. औङ आपः (7-1-18) - आबन्तादङ्गात्परस्यौङः शी स्यात्। औङित्यौकारविभक्तेः संज्ञा।
45. द्वितीयाटौस्स्वेनः (2-4-34) - द्वितीयायां टौसोश्च परत इदमेतदोरेनादेशः स्यादन्वादेशे। किञ्चित्कार्यं विधातुमुपात्तस्य कार्यान्तरं विधातुं पुनरुपादानमन्वादेशः। यथाऽनेन व्याकरणमधीतमेनं छन्दोऽध्यापयेति। अनयोः पवित्रं कुलमेनयोः प्रभूतं स्वमिति।
46. अनाप्यकः (7-2-112) - अककारस्येदम इदोऽन् स्यादापि विभक्तौ। आबिति टा इत्यारभ्य सुपः पकारेण प्रत्याहारः।
47. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
48. हलि लोपः (7-2-113) - अककारस्येदम इदो लोपः स्यादापि हलादौ।
49. सर्वनाम्नः स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्नः परस्य ङितः स्याट् स्यादापश्च ह्रस्वः।
50. आङि चापः (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकारः स्यात्।
51. ङेराम्नद्याम्नीभ्यः (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
52. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
53. अन्वादेशे नपुंसके एनद् वक्तव्यः (वा)
54. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।
55. अन्वादेशे नपुंसके एनद् वक्तव्यः (वा)
56. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
57. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

58. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
59. अन्वादेशे नपुंसके एनद् वक्तव्यः (वा)
60. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
61. र्वोरुपधाया दीर्घ इकः (8-2-76) - रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते।
62. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
63. र्वोरुपधाया दीर्घ इकः (8-2-76) - रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

दशमः पाठः - पुर्, चतुर् शब्दश्च त्रिषु लिङ्गेषु

नवमस्य पाठस्य पुनरावृत्तिः -

➢ इदम्-शब्दः पुंलिङ्गः - इदम्-शब्दस्य विभक्तौ परतः मकारस्य अकारादेशः भवति। सु-प्रत्यये परे इदमः इद्-स्थाने अय्-आदेशः भवति पुंलिङ्गे। मकारस्य मकारः एव भवति, अकारः न भवति। इदमः दस्य मकारादेशः भवति विभक्तौ परतः। टाप्रत्यये ओसि च इदम्-शब्दस्य इद्-भागस्य अन्-आदेशः भवति। अन्वादेशे इदमः एन आदेशः भवति। हलादौ प्रत्यये परे इदः लोपः।

➢ इदम्-शब्दः स्त्रीलिङ्गः - इदम्-शब्दस्य विभक्तौ परतः मकारस्य अकारादेशः भवति। स्त्रियां टाप्। सुप्रत्यये तु मकारस्य मकारः एव। दकारस्य च यकारः। अन्यत्र दकारस्य मकारः। टाप्रत्यये ओसि च इदम्-शब्दस्य इद्-भागस्य अन्-आदेशः भवति। अन्वादेशे इदमः एन आदेशः भवति। हलादौ प्रत्यये परे इदः लोपः।

➢ इदम्-शब्दः नपुंसकलिङ्गः - इदम्-शब्दात् परयोः सु-अमोः लुक्।अन्येषु प्रत्ययेषु मकारस्य अकारः, दकारस्य मकारः। औ-औटोः शी-आदेशः। जस्शसोः शि-आदेशः। अन्वादेशे इदमः एनद् आदेशः भवति। अन्यानि रूपाणि पुंलिङ्गवदेव।

गिर्-शब्दः - गिर्-शब्दस्य उपधायाः इकः दीर्घः भवति पदसंज्ञायाम्। अजादिषु प्रत्ययेषु विशिष्टं कार्यं नास्ति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे पुर्-शब्दस्य रूपाणि पठामः।
2. चतुर्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
3. चतुर्-शब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
4. चतुर्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।

रेफान्तः स्त्रीलिङ्गः पुर्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पुर्+सु(स्)→पूः	पुर्+औ→पुरौ	पुर्+जस्(अस्)→पुरः
द्वितीया	पुर्+अम्→पुरम्	पुर्+औट्(औ)→पुरौ	पुर्+शस्(अस्)→पुरः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	पुर्+टा(आ)→ पुरा	पुर्+भ्याम्→ पूर्भ्याम्	पुर्+भिस्→ पूर्भिः
चतुर्थी	पुर्+ङे(ए)→ पुरे	पुर्+भ्याम्→ पूर्भ्याम्	पुर्+भ्यस्→ पूर्भ्यः
पञ्चमी	पुर्+ङसि(अस्)→ पुरः	पु+भ्याम्→ पूर्भ्याम्	पुर्+भ्यस्→ पूर्भ्यः
षष्ठी	पुर्+ङस्(अस्)→ पुरः	पुर्+ओस्→ पुरोः	पुर्+आम्→ पुराम्
सप्तमी	पुर्+ङि(इ)→ पुरि	पुर्+ओस्→ पुरोः	पुर्+सुप(सु)→ पूर्षु
सम्बोधनम्	हे पुर्+सु(स्)→ हे पूः!	हे पुर्+औ→ हे पुरौ!	हे पुर्+जस्(अस्)→ हे पुरः!

पॄधातोः क्विपि गिर् इति निष्पन्नम्। क्विबन्तः धातुः भवति, प्रतिपदिकमपि।

1. पुर् + सु→पुर् + स्, हलः परस्य सकारस्य लोपः[1] पुर्, रेफान्तस्य धातोः उपधायाः इकः दीर्घः भवति पदान्ते[2] पूर्, रेफस्य विसर्गः पूः।
2. भ्याम्, भिस्, भ्यस्, सुप् - प्रत्ययेषु परेषु पूर्वस्य पदसंज्ञा वर्तते।[3] अतः उपधायाः इकः दीर्घः भवति।[4] पूर्भ्याम्, पूर्भिः, पूर्भ्यः, पूर्षु।
3. अजादिषु विशिष्टं कार्यं न वर्तते।

रेफान्तः पुंलिङ्गः चतुर्-शब्दः

चतुर्-शब्दः नित्यं बहुवचनान्तः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	बहुवचनम्
प्रथमा	चतुर् + जस्(अस्)→चत्वारः
द्वितीया	चतुर् + शस्(अस्)→चतुरः
तृतीया	चतुर् + भिस्→चतुर्भिः
चतुर्थी	चतुर् + भ्यस्→चतुर्भ्यः
पञ्चमी	चतुर् + भ्यस्→चतुर्भ्यः
षष्ठी	चतुर् + आम्→चतुर्णाम्
सप्तमी	चतुर् + सुप्→चतुर्षु
सम्बोधनम्	हे चतुर् + सुप्(सु)→हे चत्वारः!

1. चतुर्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति।
2. चतुर् + जस्→चतुर् + अस्, चतुर्-शब्दस्य सर्वनामस्थाने प्रत्यये परे आम्-आगमः भवति।[5] आम्-आगमे मकारः इत्संज्ञकः। अतः अन्त्यात् अचः परः भवति।[6] मकारस्य लोपः भवति। चतुर् आ + र् + अस्। उकारस्य यणादेशः। चत्वार् + अस्→चत्वारस्→रुत्वे, विसर्गे च चत्वारः।
3. चतुर् + शस्→चतुर् + अस्→चतुरस्→चतुरः।
   भिस्, भ्यस् - इत्यत्र विशेषः नास्ति। चतुर्भिः, चतुर्भ्यः।
4. चतुर् + आम्, चतुर्-शब्दात् परस्य आमः नुद्-आगमः भवति।[7] चतुर् + न् + आम्, नकारस्य णकारादेशः भवति।[8] चतुर्णाम्।
5. चतुर् + सुप्→चतुर् + सु, सकारस्य षकारादेशः भवति।[9] चतुर्षु।

रेफान्तः स्त्रीलिङ्गः चतुर् -शब्दः **चतुर्-शब्दः नित्यं बहुवचनान्तः**

विभक्तिः	बहुवचनम्
प्रथमा	चतुर् + जस्(अस्)→चतस्रः
द्वितीया	चतुर् + शस्(अस्)→चतस्रः
तृतीया	चतुर् + भिस्→चतसृभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	बहुवचनम्
चतुर्थी	चतुर् + भ्यस्→चतसृभ्यः
पञ्चमी	चतुर् + भ्यस्→चतसृभ्यः
षष्ठी	चतुर् + आम्→चतसृणाम्
सप्तमी	चतुर् + सुप्(सु)→चतसृषु
सम्बोधनम्	हे चतुर् + सु→हे चतस्रः!

1. चतुर्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं, द्विवचनं च न भवति।
2. चतुर्-शब्दस्य स्त्रियां चतसृ-आदेशः भवति।[10]
3. चतुर्+जस्/शस्→चतुर्+अस्, चतसृ+अस्, ऋकारस्य रेफादेशः भवति।[11] चतस्रः।
5. भिस्, भ्यस् प्रत्यययोः विशेषः कोऽपि नास्ति। चतसृभिः, चतसृभ्यः।
4. आमः नुट्-आगमः भवति। नामि परे ऋकारस्य दीर्घः न भवति।[12] नकारस्य णत्वं भवति।[13] चतसृणाम्।
6. सुपि सकारस्य षत्वं भवति। चतसृषु।

रेफान्तः नपुंसकलिङ्गः चतुर्-शब्दः

चतुर्-शब्दः नित्यं बहुवचनान्तः

विभक्तिः	बहुवचनम्
प्रथमा	चतुर् + जस्(अस्)→चत्वारि
द्वितीया	चतुर् + शस्(अस्)→चत्वारि
तृतीया	चतुर् + भिस्→चतुर्भिः
चतुर्थी	चतुर् + भ्यस्→चतुर्भ्यः
पञ्चमी	चतुर् + भ्यस्→चतुर्भ्यः
षष्ठी	चतुर् + आम्→चतुर्णाम्
सप्तमी	चतुर् + सुप्(सु)→चतुर्षु
सम्बोधनम्	हे चतुर् + सु→हे चत्वारि!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. चतुर् + जस्/शस्, जस्-शसोः स्थाने शि-आदेशः भवति।[14] चतुर् + शि, तस्य सर्वनामस्थानम् इति संज्ञा। सर्वनामस्थाने चतुर्-शब्दस्य आम्-आगमः भवति।[15] आम्-आगमः मित्। अतः अन्त्यात् अचः परः भवति।[16] मकारस्य लोपः भवति। चतु + आर् + इ, यणादेशः। चत्वारि। इतरत्र पुंलिङ्गे इव रूपाणि।

पाठसारः -

1. पुर्-शब्दः - पदसंज्ञायाम् उपधायाः इकः दीर्घः भवति।
2. चतुर्-शब्दः पुंलिङ्गः - चतुर्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। चतुर्-शब्दस्य आम्-आगमः भवति सर्वनामस्थाने प्रत्यये परे। आमि नुट्-आगमः भवति।
3. चतुर्-शब्दः स्त्रीलिङ्गः - चतुर्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। स्त्रियां चतसृ-आदेशः भवति। अचि ऋकारस्य रेफादेशः भवति। आमि नुट्-आगमः भवति। नामि ऋकारस्य दीर्घः न भवति।
4. चतुर्-शब्दः नपुंसकलिङ्गः - जस्/शस्, जस्-शसोः स्थाने शि-आदेशः भवति। तस्य सर्वनामस्थानम् इति संज्ञा। सर्वनामस्थाने चतुर्-शब्दस्य आम्-आगमः भवति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. चतुर्-शब्दस्य एकवचने रूपाणि भवन्ति न वा? हेतुः कः?
2. चतुर्-शब्दस्य स्त्रियां षष्ठ्यां किं रूपम्? का च प्रक्रिया?
3. पुर्-शब्दस्य प्रथमैकवचने किं रूपम्? का प्रक्रिया?
4. चतुर्-शब्दस्य नपुंसकलिङ्गे प्रथमायां किं रूपम्? का च प्रक्रिया?

योग्यमुत्तरं चिनुत -

1. पुर्-शब्दस्य पदसंज्ञायां किं कार्यम्?
   अ) रेफस्य अकारः आ) उपधायाः इकः दीर्घः इ) उकारस्य आकारः
2. चतुर् + भ्याम् - किं रूपम्?
   अ) चतुर्भ्याम् आ) चत्वार्भ्याम् इ) चत्वारिभ्याम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. हे चतुर् + जस् - किं रूपम्?
अ) हे चतुरः आ) हे चत्वारः इ) उभयम्

4. चतुर् + शस् पुंलिङ्गे आम्-आगमः....
अ) भवति आ) न भवति इ) वा भवति

5. चतुर्-शब्दस्य सर्वनामस्थाने किं कार्यम्?
अ) नुट्-आगमः आ) अम्-आगमः इ) आम्-आगमः

6. चतुर् + आम् - किं कार्यम्?
अ) नुम्-आगमः आ) आम्-आगमः इ) नुट्-आगमः

7. चतुर्-शब्दस्य स्त्रियां कः आदेशः?
अ) चत्वार् आ) चतसृ इ) न कश्चन

8. चतसृ + अस् - अत्र किं कार्यम्?
अ) यणादेशः आ) पूर्वसवर्णदीर्घः इ) रेफादेशः

9. चतसृ + नाम् - अत्र ऋकारस्य दीर्घः....
अ) भवति आ) न भवति इ) वा भवति

10. चतुर् + जस् - जसः कः आदेशः?
अ) शी आ) शि इ) उभयम्

योजयत -

1. चतुर् + जस्(नपुं) उपधायाः इकः दीर्घः
2. चतुर् + जस्(पुं) जसः शिः, आम्-आगमः
3. चतुर् + जस्(स्त्री) आम्-आगमः
4. पुर् + भिस् चतसृ-आदेशः

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. पुर् + सुप्
2. चतुर् + सुप्(पुं.)
3. चतुर् + शस्(नपुं)
4. चतुर् + आम्(स्त्री)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रक्रियां लिखित्वा, भेदं प्रतिपादयत -

1. चतुर् + जस् (पुं), चतुर् + जस् (नपुं)
2. चतुर् + शस् (पुं), चतुर् + शस् (स्त्री)
3. पुर् + आम्, चतुर् + आम् (पुं)
4. चतुर् + आम् (स्त्री), चतुर् + आम् (नपुं)

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. चतुरः
2. चत्वारः
3. चतस्रः
4. चत्वारि

---

1. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
2. र्वोरुपधाया दीर्घ इकः (8-2-76) - रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते।
3. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
4. र्वोरुपधाया दीर्घ इकः (8-2-76) - रेफवान्तस्य धातोरुपधाया इको दीर्घः स्यात् पदान्ते।
5. चतुरनडुहोरामुदात्तः (7-1-98) - अनयोराम् स्यात् सर्वनामस्थाने परे, स चोदात्तः।
6. मिदचोन्त्यात्परः (1-1-47) - अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित् स्यात्।
7. षट्चतुर्भ्यश्च (7-1-55) - षट्संज्ञकेभ्यश्चतुरश्च परस्यामो नुडागमः स्यात्।
8. रषाभ्यां नो णः समानपदे (8-4-1) - एकपदस्थाभ्यां रेफषकाराभ्यां परस्य नस्य णः स्यात्।
9. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
10. त्रिचतुरोः स्त्रियां तिसृचतसृ (7-2-99) - स्त्रीलिङ्गयोरेतयोरेतावादेशौ स्तो विभक्तौ परतः।
11. अचि र ऋतः (7-2-100) - तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि।
12. न तिसृचतसृ (6-4-4) - एतयोर्नामि दीर्घो न स्यात्।
13. ऋवर्णान्नस्य णत्वं वाच्यम् (वा. 4969)- ऋकारात् परस्य नस्य णत्वं भवति।
14. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
15. चतुरनडुहोरामुदात्तः (7-1-98) - अनयोराम् स्यात् सर्वनामस्थाने परे, स चोदात्तः।
16. मिदचोन्त्यात्परः (1-1-47) - अचां मध्ये योऽन्त्यस्तस्मात्परस्यैवान्तावयवो मित् स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एकादशः पाठः - चन्द्रमस्, विद्वस्, पुंस्, पयस् शब्दाः

दशमस्य पाठस्य पुनरावृत्तिः -

➢ पुर्-शब्दः - पदसंज्ञायाम् उपधायाः इकः दीर्घः भवति।

➢ चतुर्-शब्दः पुंलिङ्गः - चतुर्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। चतुर्-शब्दस्य आम्-आगमः भवति सर्वनामस्थाने प्रत्यये परे। आमि नुट्-आगमः भवति।

➢ चतुर्-शब्दः स्त्रीलिङ्गः - चतुर्-शब्दः नित्यं बहुवचनान्तः। अतः एकवचनं द्विवचनं च न भवति। स्त्रियां चतसृ-आदेशः भवति। अचि ऋकारस्य रेफादेशः भवति। आमि नुट्-आगमः भवति। नामि ऋकारस्य दीर्घः न भवति।

➢ चतुर्-शब्दः नपुंसकलिङ्गः - जस्/शस्, जस्-शसोः स्थाने शि-आदेशः भवति। तस्य सर्वनामस्थानम् इति संज्ञा। सर्वनामस्थाने चतुर्-शब्दस्य आम्-आगमः भवति।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे चन्द्रमस्-शब्दस्य रूपाणि पठामः।
2. विद्वस्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
3. पुंस्-शब्दस्य रूपाणि पठामः।
4. पयस्-शब्दस्य रूपाणि पठामः।

सकारान्तः पुंलिङ्गः चन्द्रमस्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	चन्द्रमस्+सु(स्)→ चन्द्रमाः	चन्द्रमस्+औ→ चन्द्रमसौ	चन्द्रमस्+जस्(अस्)→ चन्द्रमसः
द्वितीया	चन्द्रमस्+अम्→ चन्द्रमसम्	चन्द्रमस्+औट् (औ)→चन्द्रमसौ	चन्द्रमस्+शस्(अस्)→ चन्द्रमसः
तृतीया	चन्द्रमस्+टा (आ)→चन्द्रमसा	चन्द्रमस्+भ्याम्→ चन्द्रमोभ्याम्	चन्द्रमस्+भिस्→ चन्द्रमोभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	चन्द्रमस्+ङे (ए)→चन्द्रमसे	चन्द्रमस्+भ्याम्→ चन्द्रमोभ्यम्	चन्द्रमस्+भ्यस्→ चन्द्रमोभ्य:
पञ्चमी	चन्द्रमस्+ङसि (अस्)→चन्द्रमस:	चन्द्रमस्+भ्याम्→ चन्द्रमोभ्याम्	चन्द्रमस्+भ्यस्→ चन्द्रमोभ्य:
षष्ठी	चन्द्रमस्+ङस् (अस्)→चन्द्रमस:	चन्द्रमस्+ओस्→ चन्द्रमसो:	चन्द्रमस्+आम्→ चन्द्रमसाम्
सप्तमी	चन्द्रमस्+ङि(इ)→ चन्द्रमसि	चन्द्रमस्+ओस्→ चन्द्रमसो:	चन्द्रमस्+सुप्(सु)→ चन्द्रम:सु/चन्द्रमस्सु
सम्बोधनम्	हे चन्द्रमस्+सु→ हे चन्द्रम: !	हे चन्द्रमस्+औ→ हे चन्द्रमसौ !	हे चन्द्रमस्+जस्→ हे चन्द्रमस: !

1. चन्द्रमस् + सु→चन्द्रमस् + स्, हल: परस्य सकारस्य लोप:[1] चन्द्रमस्, सु-प्रत्यये परे असन्तस्य उपधाया: दीर्घ: भवति।[2] चन्द्रमास्, सकारस्य रुत्वे विसर्गे च चन्द्रमा:।
2. भ्याम्, भिस्, भ्यस्, सुप् - प्रत्ययेषु परेषु पूर्वस्य पदसंज्ञा अस्ति।[3] अत: सकारस्य रुत्वम्।[4] चन्द्रमरु + भ्याम्/भिस्/भ्यस्/सुप्। सुपं विहाय अन्येषु रो: उकारादेश:[5] चन्द्रम उ+भ्याम्/भिस्/भ्यस्/सुप्, गुण: चन्द्रमोभ्याम् इत्यादि।
3. सुपि, चन्द्रमरु + सु, रेफस्य विसर्गे[6], विसर्गस्य विकल्पेन विसर्गदिश:[7] चन्द्रम:सु, पक्षे विसर्गस्य सकारादेशे[8] चन्द्रमस्सु।

सकारान्त: पुंलिङ्ग: विद्वस्-शब्द:

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विद्वस्+सु(स्)→ विद्वान्	विद्वस्+औ→ विद्वांसौ	विद्वस्+जस्(अस्)→ विद्वांस:
द्वितीया	विद्वस्+अम्→ विद्वांसम्	विद्वस्+औट् (औ)→विद्वांसौ	विद्वस्+शस्(अस्)→ विदुष:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	विद्वस्+टा(आ)→ विदुषा	विद्वस्+भ्याम्→ विद्वद्भ्याम्	विद्वस्+भिस्→ विद्वद्भिः
चतुर्थी	विद्वस्+ङे(ए)→ विदुषे	विद्वस्+भ्याम्→ विद्वद्भ्याम्	विद्वस्+भ्यस्→ विद्वद्भ्यः
पञ्चमी	विद्वस्+ङसि (अस्)→विदुषः	विद्वस्+भ्याम्→ विद्वद्भ्याम्	विद्वस्+भ्यस्→ विद्वद्भ्यः
षष्ठी	विद्वस्+ङस् (अस्)→विदुषः	विद्वस्+ओस्→ विदुषोः	विद्वस्+आम्→ विदुषाम्
सप्तमी	विद्वस्+ङि(इ)→ विदुषि	विद्वस्+ओस्→ विदुषोः	विद्वस्+सुप्(सु)→ विद्वत्सु
सम्बोधनम्	हे विद्वस्+सु(स्)→ हे विद्वन्!	हे विद्वस्+औ→ हे विद्वांसौ !	हे विद्वस्+जस्(अस्)→ हे विद्वांसः !

1. विद्वस् + सु→विद्वस् + स्, विद्वस्-शब्दः उगिदन्तः।[9] अतः सर्वनामस्थानप्रत्ययेषु परेषु नुम्-आगमः भवति।[10] विद्वन्स् + स्, उपधायाः दीर्घः[11] विद्वान्स् + स्, हलः परस्य सुप्रत्ययस्य सकारस्य लोपः। विद्वान्स्, संयोगान्ते विद्यमानस्य सकारस्य लोपः। विद्वान्।[12]
2. विद्वस् + औ/औट्/जस्/अम् - एते सर्वनामस्थानसंज्ञकाः।[13] अतः एतेषु परेषु नुम्-आगमः भवति।[14] नकारस्य अनुस्वारः भवति।[15] उपधायाः दीर्घः भवति।[16] एवञ्च विद्वांसौ, विद्वांसः, विद्वांसम्।
3. शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि - एतेषु प्रत्ययेषु परेषु विद्वस्-शब्दस्य भसंज्ञा वर्तते।[17] अतः वसोः वकारस्य सम्प्रसारणम्।[18] विद् उ अ स्, उकार-अकारयोः पूर्वरूपम्।[19] उकारात् परस्य सकारस्य मूर्धन्यादेशः।[20] विदुष्, शस्- विदुषः। टा- विदुषा। ङे- विदुषे। ङसि/ङस्- विदुषः। ओस्- विदुषोः। आम्- विदुषाम्। ङि- विदुषि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. भ्याम्, भिस्, भ्यस्, सुप्। एतेषु प्रत्ययेषु परेषु विद्वस्-शब्दस्य पदसंज्ञा।[21] अत: सकारस्य दकार:।[22] विद्वद्भ्याम्, विद्वद्भि:, विद्वद्भ्य:, विद्वद् + सु। दकारस्य चर्त्वेन तकार:[23] विद्वत्सु।

सकारान्त: पुंलिङ्ग: पुंस्-शब्द:

पुम्स् इति शब्दे सकारं दृष्ट्वा मकारस्य अनुस्वार। सकारेण व्यवधाने वा सकारस्य अपाये वा अनुस्वार: मकारत्वेन विपरिणमते।[24]

विभक्ति:	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पुंस्+सु(स्)→ पुमान्	पुंस्+औ→ पुमांसौ	पुंस्+जस(अस्)→ पुमांस:
द्वितीया	पुंस्+अम्→ पुमांसम्	पुंस्+औट्(औ)→ पुमांसौ	पुंस्+शस(अस्)→ पुंस:
तृतीया	पुंस्+टा(आ)→ पुंसा	पुंस्+भ्याम्→ पुम्भ्याम्	पुंस्+भिस्→ पुम्भि:
चतुर्थी	पुंस्+ङे(ए)→ पुंसे	पुंस्+भ्याम्→ पुम्भ्याम्	पुंस्+भ्यस्→ पुम्भ्य:
पञ्चमी	पुंस्+ङसि (अस्)→पुंस:	पुंस्+भ्याम्→ पुम्भ्याम्	पुंस्+भ्यस्→ पुंम्भ्य:
षष्ठी	पुंस्+ङस्(अस्)→ पुंस:	पुंस्+ओस्→ पुंसो:	पुंस्+आम्→ पुंसाम्
सप्तमी	पुंस्+ङि(इ)→ पुंसि	पुंस्+ओस्→ पुंसो:	पुंस्+सुप्→ पुंसु
सम्बोधनम्	हे पुंस्+सु(स्)→ हे पुमन्!	हे पुंस्+औ→ हे पुमांसौ!	हे पुंस्+जस(अस्)→ हे पुमांस:!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. पुंस् + सु, सर्वनामस्थाने परे पुंस्-शब्दस्य असुङ्-आदेशः[25]। असुङ्-इत्यत्र अस् इति अवशिष्टः। सः सकारस्य स्थाने भवति।[26] सकारः नष्टः। अतः अनुस्वारः मकारत्वेन विपरिणमते। पुमस् + सु→पुमस् + स्, सर्वनामस्थाने प्रत्यये परे नुमागमः भवति।[27] पुमन्स् + स्, सर्वनामस्थाने उपधायाः दीर्घः।[28] पुमान्स् + स्। हलः उत्तरस्य सुप्रत्ययस्य सकारस्य लोपः[29]। पुमान्स्, संयोगान्ते विद्यमानस्य सकारस्य लोपः[30]। पुमान्। सम्बुद्धौ तु उपधायाः दीर्घः न भवति। हे पुमन्।
2. औ, औट्, जस्, अम् - एते सर्वनामस्थानसंज्ञकाः।[31] अतः पुंस्-शब्दस्य असुङ्-आदेशः।[32] सः सकारस्य स्थाने भवति। सकारः नष्टः। अतः अनुस्वारः मकारत्वेन विपरिणमते। सर्वनामस्थाने परे नुम्-आगमः[33], उपधायाः दीर्घः[34], नकारस्य अनुस्वारः।[35] पुमांसौ, पुमांसः, पुमांसम्।
3. भ्याम्, भिस्, भ्यस्, सुप् - प्रत्ययेषु परेषु पुंस्-शब्दस्य पदसंज्ञा।[36] संयोगान्ते विद्यमानस्य सस्य लोपः।[37] सकारः नष्टः। अतः अनुस्वारः मकारत्वेन विपरिणमते। पुम् + भ्याम्/भिस्/भ्यस्/सुप्, मकारस्य अनुस्वारः।[38] अनुस्वारस्य परसवर्णः।[39] पुम्भ्याम्, पुम्भिः, पुम्भ्यः। सुप्-प्रत्यये तु अनुस्वारस्य परसवर्णः न भवति। पुंसु।

सकारान्तः नपुंसकलिङ्गः पयस् शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	पयस्+सु(स्)→ पयः	पयस्+औ→ पयसी	पयस्+जस्(अस्)→ पयांसि
द्वितीया	पयस्+अम्→ पयः	पयस्+औट् (औ)→पयसी	पयस्+शस्(अस्)→ पयांसि
तृतीया	पयस्+टा(आ)→ पयसा	पयस्+भ्याम्→ पयोभ्याम्	पयस्+भिस्→ पयोभिः
चतुर्थी	पयस्+ङे(ए)→ पयसे	पयस्+भ्याम्→ पयोभ्याम्	पयस्+भ्यस्→ पयोभ्यः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
पञ्चमी	पयस्+ङसि (अस्)→पयसः	पयस्+भ्याम्→ पयोभ्याम्	पयस्+भ्यस्→ पयोभ्यः
षष्ठी	पयस्+ङस्(अस्)→ पयसः	पयस्+ओस्→ पयसोः	पयस्+आम्→ पयसाम्
सप्तमी	पयस्+ङि(इ)→ पयसि	पयस्+ओस्→ पयसोः	पयस्+सुप्(सु)→ पयस्सु/पयःसु
सम्बोधनम्	हे पयस्+सु(स्)→ हे पयः!	हे पयस्+औ→ हे पयसी!	हे पयस्+जस्(अस्)→ हे पयांसि!

1. पयस् + सु/अम्, सु-अमोः लुक् (लोपः) भवति।[40] पयस्। सस्य रुत्वम्, तस्य विसर्गः। पयः।
2. पयस् + औ/औट्, औ-औटोः स्थाने शी-आदेशः भवति।[41]
पयस् + शी→पयस् + ई→पयसी।
3. पयस् + जस्/शस्, जस्-शसोः स्थाने शि-आदेशः भवति।[42] तस्य च सर्वनामस्थानसंज्ञा भवति।[43] अतः अजन्तस्य नुम्-आगमः भवति।[44] नान्तस्य उपधायाः दीर्घः भवति।[45] पयान्स् + इ, नस्य अनुस्वारः भवति।[46] पयांसि।
4. टा (आ) प्रभृतिषु अजादिषु प्रत्ययेषु केवलं प्रकृति-प्रत्यययोः संयोजनम्। पयसा, पयसे इत्यादि।
5. भ्याम्, भिस्, भ्यस्, सुप् - प्रत्ययेषु परेषु पूर्वस्य पदसंज्ञा।[47] अतः सकारस्य रुत्वम्। पयरु + भ्याम्/भिस्/भ्यस्/सुप्/सुपं विहाय अन्येषु परेषु रुत्वस्य उकारः। अकार-उकारयोः गुणः - पयोभ्याम्, पयोभिः, पयोभ्यः।
6. पयस् + सुप् सुपि-पयरु सु, रेफस्य विसर्गः। विसर्गस्य विकल्पेन विसर्गादेशः। पयः सु। पक्षे विसर्गस्य सकारादेशे - पयस्सु

पाठसारः -

1. चन्द्रमस्-शब्दः - चन्द्रमस्, सु-प्रत्यये परे असन्तस्य उपधायाः दीर्घः भवति। पदसंज्ञायां सकारस्य रुत्वम्। भ्याम्, भिस्, भ्यस् - प्रत्ययेषु परेषु रुस्थाने उकारादेशः। सुपि रेफस्य विकल्पेन विसर्गः। पक्षे विसर्गस्य सकारः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. विद्वस्-शब्दः - सर्वनामस्थानसंज्ञकेषु परेषु नुमागमः, उपधायाः दीर्घः भवति। भसंज्ञायां वसः वकारस्य सम्प्रसारणम्। भ्यामादौ पदसंज्ञायां सकारस्य दकारः। सुपि दकारस्य चर्त्वम्।
3. पुंस्-शब्दः - सर्वनामस्थाने परे असुङ्-आदेशः भवति। सर्वनामस्थाने परे उपधायाः दीर्घः। सम्बुद्धौ तु उपधायाः दीर्घः न भवति। पदसंज्ञायां संयोगान्तस्य सकारस्य लोपः।
4. पयस्-शब्दः - सु-अमोः लुक्। औ-औटोः शी-आदेशः भवति। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानम् इति संज्ञा। नुमागमः, उपधायाः दीर्घश्च।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. विद्वस्-शब्दस्य द्वितीयाबहुवचने किं रूपम्? प्रक्रिया च का?
2. चन्दमस्-शब्दस्य सप्तमीबहुवचने किं रूपम्? प्रक्रिया च का?
3. पुंस्-शब्दस्य सम्बुद्धौ किं रूपम्? कथं च प्रक्रिया?
4. पयस्-शब्दस्य प्रथमाबहुवचने किं रूपम्? कथं च प्रक्रिया?

योग्यमुत्तरं चिनुत -

1. चन्दमस् + सु - अत्र किं कार्यम्?
   अ) उपधायाः दीर्घः आ) सकारस्य लोपः इ) उभयम्
2. चन्द्रमस् + ओस् - अत्र किं कार्यम्?
   अ) सकारस्य लोपः आ) उपधायाः दीर्घः इ) प्रकृतिप्रत्यययोः मेलनम्
3. विद्वस्-शब्दस्य भसंज्ञायां किं कार्यम्?
   अ) वकारस्य सम्प्रसारणम् आ) सकारस्य लोपः इ) सकारस्य दकारः
4. विद्वस् + शस् अत्र विद्वस्-शब्दस्य का संज्ञा?
   अ) पदसंज्ञा आ) भसंज्ञा इ) उभयम्
5. विद्वस् + भ्याम् - अत्र विद्वस्-शब्दस्य का संज्ञा?
   अ) पदसंज्ञा आ) भसंज्ञा इ) उभयम्
6. उगितः प्रयोजनं किमुक्तम्?
   अ) उपधायाः दीर्घः आ) नुम्-आगमः इ) उभयम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. पुंस्-शब्दस्य सर्वनामस्थाने किं कार्यम्?
   अ) असुङ्-आदेशः आ) उपधायाः दीर्गः इ) उभयम्
8. पयस् + सु - अत्र किं कार्यम्?
   अ) सोः लुक् आ) सोः अमादेशः इ) सकारस्य लोपः
9. नान्तस्य उपधायाः सर्वनामस्थाने किं कार्यम्?
   अ) नकारस्य अकारः आ) उपधायाः दीर्घः इ) नकारस्य लोपः
10. पुंस्-शब्दस्य सम्बुद्धौ दीर्घः?
   अ) भवति आ) वा भवति इ) न भवति

योजयत -

1. पुंस् + भ्याम् — शी-आदेशः
2. चन्द्रमस् + भ्याम् — शि-आदेशः
3. विद्वस् + भ्याम् — सकारस्य लोपः
4. पयस् + औ — सकारस्य दकारः
5. पयस् + जस् — सकारस्य रुत्वम्

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. पुंस् + भ्यस्
2. चन्द्रमस् + भ्यस्
3. पयस् + सुप्
4. विद्वस् + सुप्

प्रक्रियां लिखित्वा, भेदं निरूपयत -

1. चन्द्रमस् + सु, विद्वस् + सु
2. विद्वस् + टा, पयस् + टा
3. विद्वस् + अम्, पुंस् + अम्
4. पुंस् + शस्, विद्वस् + शस्
5. हे विद्वस् + सु, हे पुंस् + सु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. पुंसः
2. पयांसि
3. विदुषः
4. चन्द्रमःसु

---

1. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
2. अत्वसन्तस्य चाधातोः (6-4-14) - अत्वन्तस्योपधाया दीर्घः स्याद्धातुभिन्नासन्तस्य चासंबुद्धौ सौ परे।
3. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्यायवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
4. ससजुषो रुः (4-2-66) - पदान्तस्य सस्य "सजुष्" शब्दस्य च रुः स्यात्।
5. हशि च (6-1-114) - अप्लुतादतः परस्य रोरुः स्याद्धशि।
6. खरवसानयोर्विसर्जनीयः (8-3-15) - खरि अवसाने च परे रेफस्य विसर्जनीयः स्यात्पदान्ते।
7. वा शरि (8-3-36) - शरि परे विसर्जनीयस्य विसर्जनीय एव वा स्यात्।
8. विसर्जनीयस्य सः (8-3-34) - खरि विसर्जनीयस्य सः स्यात्।
9. विद् + लट्, लट् शतृ-स्थाने वसु आदेशः उकारः इत्। अतः अयं शब्दः उगित्।
10. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
11. सान्तमहतः संयोगस्य (6-4-10) सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।
12. संयोगान्तस्य लोपः (8-2-23) - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।
13. सुडनपुंसकस्य (1-1-43) - सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य।
14. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
15. नश्चापदान्तस्य झलि (8-3-24) - नस्य मस्य चापदान्तस्य झल्यनुस्वारः।
16. सान्तमहतः संयोगस्य (6-4-10) सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।
17. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्प्रत्यययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

18. वसोः संप्रसारणम् (6-4-131) - वस्वन्तस्य भस्य संप्रसारणं स्यात्।
19. संप्रसारणाच्च (6-1-108) - संप्रसारणादचि परे पूर्वरूपमेकादेशः स्यात्।
20. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
21. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
22. वसुस्रंसुध्वंस्वनडुहां दः (8-2-72) - सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते।
23. खरि च (8-4-55) खरि परे झलां चरः स्युः।
24. निमित्तापाये नैमित्तिकस्याप्यपायः
25. पुंसोऽसुङ् (7-1-89) - सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्।
26. ङिच्च (1-1-53) - अयमप्यन्त्यस्यैव स्यात्।
27. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
28. सान्तमहतः संयोगस्य (6-4-10) सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।
29. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
30. संयोगान्तस्य लोपः (8-2-23) - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।
31. सुडनपुंसकस्य (1-1-43) - सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य।
32. पुंसोऽसुङ् (7-1-89) - सर्वनामस्थाने विवक्षिते पुंसोऽसुङ् स्यात्।
33. उगिदचां सर्वनामस्थानेऽधातोः (7-1-70) - अधातोरुगितो नलोपिनोऽञ्चतेश्च नुमागमः स्यात्सर्वनामस्थाने परे।
34. सान्तमहतः संयोगस्य (6-4-10) सान्तसंयोगस्य महतश्च यो नकारस्तस्योपधाया दीर्घः स्यादसम्बुद्धौ सर्वनामस्थाने परे।
35. नश्चापदान्तस्य झलि (8-3-24) - नस्य मस्य चापदान्तस्य झल्यनुस्वारः।
36. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
37. संयोगान्तस्य लोपः (8-2-23) - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।
38. मोऽनुस्वारः - मान्तस्य पदस्यानुस्वारः स्याद्धलि।
39. अनुस्वारस्य ययि परसवर्णः - अनुस्वारस्य परसवर्णादेशः भवति यय्-वर्णेषु परेषु।
40. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयोः स्वमोर्लुक् स्यात्।
41. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङः शी स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

42. जश्शसोः शिः (7-1-20) - क्लीबादनयोः शिः स्यात्।
43. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
44. नपुंसकस्य झलचः (7-1-72) - झलन्तस्याजन्तस्य च क्लीबस्य नुमागमः स्यात्सर्वनामस्थाने परे।
45. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घः स्यादसंबुद्धौ सर्वनामस्थाने परे।
46. नश्चापदान्तस्य झलि (8-3-24) - नस्य मस्य चापदान्तस्य झल्यनुस्वारः।
47. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वादशः पाठः - अदस्-शब्दः त्रिषु लिङ्गेषु

एकादशस्य पाठस्य पुनरावृत्तिः -

1. चन्द्रमस्-शब्दः - चन्द्रमस्, सु-प्रत्यये परे असन्तस्य उपधायाः दीर्घः भवति। पदसंज्ञायां सकारस्य रुत्वम्। भ्याम्, भिस्, भ्यस् - प्रत्ययेषु परेषु रुस्थाने उकारदेशः। सुपि रेफस्य विसर्गः। विसर्गस्य विकल्पेन सकारः।
2. विद्वस्-शब्दः - सर्वनामस्थानसंज्ञकेषु परेषु नुमागमः, उपधायाः दीर्घः भवति। भसंज्ञायां वसः वकारस्य सम्प्रसारणम्। पदसंज्ञायां सकारस्य दकारः। सुपि दकारस्य चर्त्वम्।
3. पुंस्-शब्दः - सर्वनामस्थाने परे असुङ्-आदेशः भवति। सर्वनामस्थाने परे उपधायाः दीर्घः। सम्बुद्धौ तु उपधायाः दीर्घः न भवति। पदसंज्ञायां संयोगान्तस्य सकारस्य लोपः।
4. पयस्-शब्दः - सु-अमोः लुक्(लोपः)-औ-औटोः शी-आदेशः भवति। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानम् इति संज्ञा। नुमागमः, उपधायाः दीर्घश्च।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे अदस्-शब्दस्य पुंलिङ्गे रूपाणि पठामः।
2. अदस्-शब्दस्य स्त्रीलिङ्गे रूपाणि पठामः।
3. अदस्-शब्दस्य नपुंसकलिङ्गे रूपाणि पठामः।

सकारान्तः पुंलिङ्गः अदस्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अदस्+सु(स्)→ असौ	अदस्+औ→ अमू	अदस्+जस्(अस्)→ अमी
द्वितीया	अदस्+अम्→ अमुम्	अदस्+औट् (औ)→अमू	अदस्+शस्(अस्)→ अमून्
तृतीया	अदस्+टा(आ)→ अमुना	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भिस्→ अमीभिः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
चतुर्थी	अदस्+ङे(ए)→ अमुष्मै	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भ्यस्→ अमीभ्यः
पञ्चमी	अदस्+ङसि(अस्)→ अमुष्मात्	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भ्यस्→ अमीभ्यः
षष्ठी	अदस्+ङस्(अस्)→ अमुष्य	अदस्+ओस्→ अमुयोः	अदस्+आम्→ अमीषाम्
सप्तमी	अदस्+ङि(इ)→ अमुष्मिन्	अदस्+ओस्→ अमुयोः	अदस्+सुप्(सु)→ अमीषु

1. अदस्-शब्दः त्यदादिषु वर्तते। अतः अदसः सकारस्य विभक्तौ परतः अकारादेशः भवति।[1] अयं सर्वनामसंज्ञकः। अतः प्रायः सर्वशब्दवत् रूपाणि भवन्ति। सर्वनामसंज्ञानिमित्तकानि कार्याणि -

प्रत्ययः	आदेशः	आगमः
जस्	शी(ई)	-
ङे	स्मै	-
ङसि	स्मात्	-
आम्	-	सुट्(स्)
ङि	स्मिन्	-

2. अदस् + सु सकारस्य अकारादेशः प्राप्तः।[2] तं बाधित्वा सकारस्य औ सुलोपश्च।[3] अद औ, वृद्धौ अदौ। अनन्त्यस्य अदसः दकारस्य सुप्रत्यये सकारादेशः।[4] असौ।

3. अदस् + औ/औट्→अदस् + औ, सकारस्य अकारः।[5] पररूपम्।[6] अद + औ, वृद्धिः।[7] अदौ। दकारस्य मकारः, औकारस्य ऊकारः।[8] अमू।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. अदस् + जस्, सकारस्य अकार:। पररूपम्। जस: शी-आदेश:। अद + शी→अद + ई, गुण:। अदे। बहुवचने अदस: दात् परस्य एत: ईत्, दस्य म: च।[9] अमी।

5. अदस् + अम्, अदस: सकारस्य अकार:। पररूपम्। अद + अम्, पूर्वरूपम्।[10] अदम्। दकारस्य मकार:, अकारस्य उकारश्च[11]। अमुम्।

6. अदस् + शस्→अदस् + अस्, सकारस्य अकार:। पररूपम्। पूर्वसवर्णदीर्घ:[12] अदास्। पूर्वसवर्णदीर्घात् परस्य शस: सकारस्य नकार:[13] अदान्। दकारस्य मकार:, आकारस्य ऊकार:। अमून्।

7. अदस् + टा, सकारस्य अकार:। पररूपम्। अद + टा→अद + आ, दकारस्य मकार:, अकारस्य उकार:। अमु + आ, अमु इत्यस्य घिसंज्ञा।[14] अत: टास्थाने ना-आदेश:[15] अमुना।

8. अदस् + भ्याम्, सकारस्य अकार:। पररूपम्। अद + भ्याम्, अकारस्य यञादौ सुपि दीर्घ:।[16] अदा + भ्याम्, दकारस्य मकार:, आकारस्य ऊकारश्च। अमूभ्याम्। अमीभ्य:।

9. अदस् + भिस्, सकारस्य अकार:। पररूपम्। अद + भिस्, भिस: ऐस्-आदेश: न भवति।[17] झलादौ बहुवचने अकारस्य एत्-आदेश:।[18] अदे + भिस्, दकारस्य मकार:, एकारस्य ईकारश्च।[19] अमी + भिस्→अमीभि:। भ्यसि अपि एवमेव प्रक्रिया।

10. अदस् + ङे, सकारस्य अकार:। पररूपम्। ङेस्थाने स्मै-आदेश:।[20] अद + स्मै, दकारस्य मकार:, अकारस्य उकारश्च। अमु + स्मै, सकारस्य मूर्धन्यादेश:।[21] अमुष्मै। अदस् + ङसि, ङसि-स्थाने स्मात्-आदेश:[22]। अन्या प्रक्रिया पूर्ववत्। अमुष्मात्। अदस् + ङस्, ङस्-स्थाने स्य।[23] अमुष्य। अदस् + ङि, ङि-स्थाने स्मिन्।[24] अमुष्मिन्।

11. अदस् + ओस्, सकारस्य अकार:। पररूपम्। अद + ओस्, अकारस्य एकार:।[25] अदे + ओस्, अयादेश: अदयोस्, दकारस्य मकार:। अकारस्य उकारश्च अमुयोस्→सस्य रुत्वे, रो: विसर्गे च → अमुयो:।

12. अदस् + सुप्→अदस् + सु, सकारस्य अकार:। पररूपम्। अद + सु, झलादौ बहुवचने दकारोत्तरवर्तिन: अकारस्य एकार:।[26] अदे + सु, दकारस्य

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मकारः। एकारस्य ईकारः[27], अमी + सु, सकारस्य मूर्धन्यादेशः[28] अमीषु।

सकारान्तः स्त्रीलिङ्गः अदस्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अदस्+सु(स्)→ असौ	अदस्+औ→ अमू	अदस्+जस्(अस्)→ अमूः
द्वितीया	अदस्+अम्→ अमूम्	अदस्+औट् (औ)→अमू	अदस्+शस्(अस्)→ अमूः
तृतीया	अदस्+टा(आ)→ अमुया	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भिस्→ अमूभिः
चतुर्थी	अदस्+ङे(ए)→ अमुष्यै	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भ्यस्→ अमूभ्यः
पञ्चमी	अदस्+ङसि (अस्)→अमुष्याः	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भ्यस्→ अमूभ्यः
षष्ठी	अदस्+ङस् (अस्)→अमुष्याः	अदस्+ओस्→ अमुयोः	अदस्+आम्→ अमूषाम्
सप्तमी	अदस्+ङि(इ)→ अमुष्याम्	अदस्+ओस्→ अमुयोः	अदस्+सुप्(सु)→ अमूषु

1. अदस् + सु, सुप्रत्यये परे अदसः सकारस्य औ-आदेशः भवति, सुप्रत्ययस्य लोपश्च।[29] अद औ। अदसः दकारस्य अनन्त्यस्य सकारादेशः भवति सुप्रत्यये परे।[30] अस औ, वृद्धिः। असौ।

2. अदस् + औ/औट्→अदस् + औ, सकारस्य अकारः। पररूपम्। स्त्रियाम् अदन्तत्वात् टाप्। अद + आ + औ, सवर्णदीर्घः। अदा + औ। आबन्तात् परस्य औस्थाने शी-आदेशः। अदा + ई, गुणः। अदे। दकारस्य मकारः, एकारस्य ऊकारः।[31] अमू।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. अदस् + जस्/शस्→अदस् + अस्, सकारस्य अकारः।[32] पररूपम्। स्त्रियाम् अदन्तत्वात् टाप्।[33] अद + आ + अस्, सवर्णदीर्घः।[34] अदा + अस्, जसि सवर्णदीर्घः। शसि पूर्वसवर्णदीर्घः[35] अदास्। दकारस्य मकारः, आकारस्य ऊकारः[36] अमूस्। सकारस्य रुत्वम्, विसर्गः। अमूः।

4. अदस् + अम्, सकारस्य अकारादेशः। पररूपम्। स्त्रियां टाप्, सवर्णदीर्घः। अदा+अम्, पूर्वरूपम्। अदाम्। दकारस्य मकारः, आकारस्य ऊकारः अमूम्।

5. अदस् + टा, सकारस्य अकारादेशः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः, अदा + आ, आपः आकारस्य एकारः।[37] अदे + आ, अयादेशः अदया। दकारस्य मकारः, अकारस्य उकारः। अमुया।

6. भ्याम्, भिस्, भ्यस् - एतेषु परेषु सकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। दकारस्य मकारः, आकारस्य ऊकारः। अमूभ्याम्, अमूभिः, अमूभ्यः।

7. अदस् + ङे, सकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। अदा ए, प्रत्ययस्य स्याट्-आगमः, आपः ह्रस्वश्च।[38] अद + स्या + ए, वृद्धिः अद + स्यै। दकारस्य मकारः, अकारस्य उकारश्च।[39] अमु + स्यै। सकारस्य मूर्धन्यादेशः।[40] अमुष्यै।

8. अदस् + ङसि/ङस्→अदस् + अस्, सकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। प्रत्ययस्य स्याट्-आगमः, आपः आकारस्य ह्रस्वश्च। अ+ स्या+अस्, आकार-अकारयोः। सवर्णदीर्घः। अद + स्यास्। दकारस्य मकारः, अकारस्य उकारश्च। अमु+स्याय्। सकारस्य मूर्धन्यादेशः। अमुष्यास्→ सकारस्य रुत्वम्, रोः विसर्गः। अमुष्याः।

9. अदस् + ओस्, सकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। अदा + ओस्, आपः आकारस्य एकारः।[41] अदे + ओस्, अयादेशः। अदयोस्। दकारस्य मकारः, अकारस्य उकारः, सस्य रुत्वे, रोः विसर्गः। अमुयोः।

10. अदस् + आम्, सकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। अदा + आम्, प्रत्ययस्य सुट्-आगमः।[42] अदा + स् + आम्, दकारस्य मकारः, आकारस्य ऊकारः। सकारस्य मूर्धन्यादेशः अमूषाम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

11. अदस् + ङि, सकारस्य अकारः। पररूपम्। स्त्रियां टाप्। सवर्णदीर्घः। अदा+ इ, प्रत्ययस्य आम्-आदेशः।[43] अदा+आम्। प्रत्ययस्य स्याट्-आगमः, आपः आकारस्य ह्रस्वश्च।[44] अद+स्या+आम्, सवर्णदीर्घः। अद+स्याम्। दकारस्य मकारः, अकारस्य उकारश्च। अमु+स्याम्। सकारस्य मूर्धन्यादेशः।[45] अमुष्याम्।

12. अदस् + सुप्→अदस् + सु, सकारस्य अकारादेशः। पररूपम्। टाप्। सवर्णदीर्घः। अदा + सु, दकारस्य मकारः। आकारस्य ऊकारः, अमू + सु, सकारस्य मूर्धन्यादेशः। अमूषु।

सकारान्तः नपुंसकलिङ्गः अदस्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अदस्+सु(स्)→ अदः	अदस्+औ→ अमू	अदस्+जस्(अस्)→ अमूनि
द्वितीया	अदस्+अम्→ अदः	अदस्+औट् (औ)→अमू	अदस्+शस्(अस्)→ अमूनि
तृतीया	अदस्+टा(आ)→ अमुना	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भिस्→ अमीभिः
चतुर्थी	अदस्+ङे(ए)→ अमुष्मै	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भ्यस्→ अमीभ्यः
पञ्चमी	अदस्+ङसि (अस्)→अमुष्मात्	अदस्+भ्याम्→ अमूभ्याम्	अदस्+भ्यस्→ अमीभ्यः
षष्ठी	अदस्+ङस् (अस्)→अमुष्य	अदस्+ओस्→ अमुयोः	अदस्+आम्→ अमीषाम्
सप्तमी	अदस्+ङि(इ)→ अमुष्मिन्	अदस्+ओस्→ अमुयोः	अदस्+सुप्→ अमीषु

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. अदस् + सु/अम्, सु-अमोः लुक् भवति।[46] अदस्, सकारस्य रुत्वम्, तस्य विसर्गश्च। अदः।
2. अदस् + औ/औट्, औ-औटोः शी-आदेशः।[47] अदस् + शी→अदस् + ई, सकारस्य अकारादेशः।[48] अद अ + ई, पररूपम् एकादेशः।[49] अद + ई, गुणः। अदे। दकारस्य मकारादेशः। एकारस्य ऊकारश्च।[50] अमू।
3. अदस् + जस/शस्, जस्-शसोः शि-आदेशः[51] अदस् + शि→अदस् + इ, सकारस्य अकारादेशः।[52] पररूपम्।[53] अद + इ, सर्वनामस्थानसंज्ञा[54] च। अतः अजन्तस्य नुम्-आगमः।[55] अदन् + इ, नान्तस्य उपधायाः दीर्घः।[56] अदान् + इ, दकारस्य मकारादेशः, आकारस्य ऊकारादेशः[57] च। अमून् + इ→अमूनि।
4. अन्यानि रूपाणि पुंलिङ्गवत् भवन्ति।

पाठसारः -

1. अदस्-शब्दः पुंलिङ्गः - अदस्-शब्दात् सुप्रत्यये सकारस्य औ, सुप्रत्ययस्य लोपश्च। अन्यासु विभक्तिषु सकारस्य अकारादेशः। अदसः दकारात् उत्तरस्य अचः उकारः, दकारस्य मकारश्च भवति। तृतीयाविभक्तौ अमु इत्यस्य घिसंज्ञा। तन्निमित्तकः नादेशश्च। बहुवचने दकारात् परस्य एकारस्य ईकारः, दकारस्य मकारश्च। सर्वनामसंज्ञकः। अतः तन्निमित्तकानि कार्याणि भवन्ति।
2. अदस्-शब्दः स्त्रीलिङ्गः - अदस्-शब्दात् सुप्रत्यये सकारस्य औ, सुप्रत्ययस्य लोपश्च। अन्यासु विभक्तिषु सकारस्य अकारादेशः। अदन्तत्वात् स्त्रियां टाप्। आबन्तः, सर्वनामसंज्ञकश्च। अतः तन्निमित्तकानि कार्याणि भवन्ति। अदसः दकारात् उत्तरस्य अचः उकारः, दकारस्य मकारश्च भवति।
3. अदस्-शब्दः नपुंसकलिङ्गः - सु-अमोः लुक्। औ-औटोः शी-आदेशः। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानसंज्ञा। अतः नुमागमः, उपधादीर्घश्च।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. अदस्-शब्दस्य नपुंसकलिङ्गे प्रथमाबहुवचने किं रूपम्? का च प्रक्रिया?
2. अदस्-शब्दस्य नपुंसकलिङ्गे सप्तम्येकवचने किं रूपम्? का च प्रक्रिया?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. अदस्-शब्दस्य स्त्रीलिङ्गे सप्तम्येकवचने किं रूपम्? का च प्रक्रिया?
4. अदस्-शब्दस्य स्त्रीलिङ्गे चतुर्थीद्विवचने किं रूपम्? का च प्रक्रिया?
5. अदस्-शब्दस्य पुंलिङ्गे तृतीयैकवचने किं रूपम्? प्रक्रिया का?

योग्यमुत्तरं चिनुत -

1. अदस् + भिस् - पुंलिङ्गे किं रूपम्?
   अ) अमीभिः आ) अमूभिः इ) अदोभिः
2. अदसः + औ - अत्र सकारस्य किं कार्यम्?
   अ) सकारस्य अकारः आ) सकारस्य रुत्वम् इ) सकारस्य लोपः
3. अदस् + टा - अत्र का संज्ञा?
   अ) घि आ) सर्वनामस्थानम् इ) पदम्
4. अदस् + भ्याम् - नपुंसकलिङ्गे किं रूपम्?
   अ) अमूभ्याम् आ) अमीभ्याम् इ) अदोभ्याम्
5. अदसः दकारस्य कः आदेशः?
   अ) अ आ) म इ) म्
6. अदसः स्त्रियां कः प्रत्ययः?
   अ) टाप् आ) ङीप् इ) ङीष्
7. अदस् + आम् - कः आगमः?
   अ) नुट् आ) षुट् इ) सुट्
8. अदे - अत्र कस्य कः आदेशः?
   अ) दस्य मः आ) एकारस्य ईकारः इ) उभयम्
9. अद + स्मिन् - कस्य कः आदेशः?
   अ) दस्य मः आ) अकारस्य उकारः इ) उभयम्
10. अदा + भ्याम् - कस्य कः आदेशः?
   अ) दस्य मः आ) आकारस्य ऊकारः इ) उभयम्

योजयत -

1. अदस् + जस्(पुं)	अमून्
2. अदस् + जस्(स्त्री)	अमी
3. अदस् + जस्(नपुं)	अमूः
4. अदस् + शस्(पुं)	अमूनि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. अदस् + सुप्(नपुं)
2. अदस् + सुप्(स्त्री)
3. अदस् + सुप्(पुं)
4. अदस् + टा(स्त्री)

प्रक्रियां लिखित्वा, भेदं प्रतिपादयत -

1. अमी, अमू: (प्र)
2. अमीषाम्, अमूषाम्
3. अमू:, अमूनि (द्वि.वि.)
4. अमुष्मिन्, अमुष्याम्
5. असौ, अद:

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. अमी:
2. अमुष्याम्
3. अमूभ्य:
4. अमुष्य

---

1. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
2. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
3. अदस औ सुलोपश्च (7-2-107) अदस औकारोऽन्तादेश: स्यात्सौ परे सुलोपश्च।
4. तदो: स: सावनन्त्ययो: (7-2-106) - त्यदादीनां तकारदकारयोरनन्त्ययो: स: स्यात्सौ परे।
5. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
6. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परत: पररूपमेकादेश: स्यात्।
7. वृद्धिरेचि (6-1-88) - आदेचि परे वृद्धिरेकादेश: स्यात्।
8. अदसोऽसेर्दादु दो म: (8-2-80) - अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयो: समाहारद्वन्द्व:। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घ:।
9. एत ईद् बहुवचने (8-2-81) - अदसो दात्परस्य एत ईत् स्याद् दस्य च मो बह्वर्थोक्तौ।
10. अमि पूर्व: (6-1-107) - अकोऽम्यचि परत: पूर्वरूपमेकादेश: स्यात्।
11. अदसोऽसेर्दादु दो म: (8-2-80) - अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयो: समाहारद्वन्द्व:। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घ:।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

12. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
13. तस्माच्छसो न: पुंसि (6-1-103) - पूर्वसवर्णदीर्घात्परो य: शस: सकारस्तस्य न: स्यात्पुंसि।
14. शेषो घ्यसखि (1-4-7) - अनदीसंज्ञौ ह्रस्वौ याविवर्णोवर्णौ तदन्तं सखिवर्जं घिसंज्ञं स्यात्।
15. आङो नाऽस्त्रियाम् (7-3-120) - घे: परस्याङो ना स्यादस्त्रियाम्। आङिति टासञ्ज्ञा प्राचाम्।
16. सुपि च (7-3-102) - यञादौ सुपि परेऽतोऽङ्गस्य दीर्घ: स्यात्।
17. नेदमदसोरको: (7-1-11) - अककारयोरिदमदसोर्भिस ऐस् न स्यात्।
18. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकार: स्यात्।
19. एत ईद् बहुवचने (8-2-81) - अदसो दात्परस्य एत ईत् स्याद् दस्य च मो बह्वर्थोक्तौ।
20. सर्वनाम्न: स्मै (7-1-14) - अत: सर्वनाम्नो ङे इत्यस्य स्मै स्यात्।
21. आदेशप्रत्यययो: (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेश: प्रत्ययावयवश्च य: सकारस्तस्य मूर्धन्यादेश: स्यात्।
22. ङसिङ्यो: स्मात्स्मिनौ (7-1-15) - अत: सर्वनाम्नो ङसिङ्योरेतौ स्त:।
23. टाङसिङसामिनात्स्या: (7-1-12) - अकारान्तादङ्गाट्टादीनां क्रमादिनादय आदेशा: स्यु:।
24. ङसिङ्यो: स्मात्स्मिनौ (7-1-15) - अत: सर्वनाम्नो ङसिङ्योरेतौ स्त:।
25. ओसि च (7-3-104) - ओसि परेऽतोऽङ्गस्यैकार: स्यात्।
26. बहुवचने झल्येत् (7-3-103) - झलादौ बहुवचने सुपि परेऽतोऽङ्गस्यैकार: स्यात्।
27. एत ईद् बहुवचने (8-2-81) - अदसो दात्परस्य एत ईत् स्याद् दस्य च मो बह्वर्थोक्तौ।
28. आदेशप्रत्यययो: (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेश: प्रत्ययावयवश्च य: सकारस्तस्य मूर्धन्यादेश: स्यात्।
29. अदस औ सुलोपश्च (7-2-107) - अदस औकारोऽन्तादेश: स्यात्सौ परे सुलोपश्च।
30. तदो: स: सावनन्त्ययो: (7-2-106) - त्यदादीनां तकारदकारयोरनन्त्ययो: स: स्यात्सौ परे।
31. अदसोऽसेर्दादु दो म: (8-2-80) - अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयो: समाहारद्वन्द्व:। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घ:।
32. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
33. अजाद्यतष्टाप् (4-1-4) - अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
34. अक: सवर्णे दीर्घ: (6-1-101) - अक: सवर्णेऽचि परे दीर्घ एकादेश: स्यात्।
35. प्रथमयो: पूर्वसवर्ण: (6-1-102) - अक: प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेश: स्यात्।
36. अदसोऽसेर्दादु दो म: (8-2-80) - अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयो: समाहारद्वन्द्व:। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घ:।
37. आङि चाप: (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकार: स्यात्।
38. सर्वनाम्न: स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्न: परस्य ङित: स्याद् स्यादापश्च ह्रस्व:।
39. अदसोऽसेर्दादु दो म: (8-2-80) - अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयो: समाहारद्वन्द्व:। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घ:।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

40. आदेशप्रत्यययो: (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेश: प्रत्ययावयवश्च य: सकारस्तस्य मूर्धन्यादेश: स्यात्।
41. आङि चाप: (7-3-105) - आङि ओसि च परे आबन्तस्याङ्गस्य एकार: स्यात्।
42. आमि सर्वनाम्न: सुट् (7-1-52) - अवर्णान्तात्परस्य सर्वनाम्नो विहितस्याम: सुडागम: स्यात्।
43. ङेराम्नद्याम्नीभ्य: (7-3-116) - नद्यन्तादाबन्तान्नीशब्दाच्च ङेराम् स्यात्।
44. सर्वनाम्न: स्याड्ढ्रस्वश्च (7-3-114) - आबन्तात्सर्वनाम्न: परस्य ङित: स्याट् स्यादापश्च ह्रस्व:।
45. आदेशप्रत्यययो: (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेश: प्रत्ययावयवश्च य: सकारस्तस्य मूर्धन्यादेश: स्यात्।
46. स्वमोर्नपुंसकात् (7-1-23) - क्लीबादङ्गात् परयो: स्वमोर्लुक् स्यात्।
47. नपुंसकाच्च (7-1-19) - क्लीबात्परस्यौङ: शी स्यात्।
48. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
49. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परत: पररूपमेकादेश: स्यात्।
50. अदसोऽसेर्दादु दो म: (8-2-80) - अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयो: समाहारद्वन्द्व:। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घ:।
51. जश्शसो: शि: (7-1-20) - क्लीबादनयो: शि: स्यात्।
52. त्यदादीनाम: (7-2-102) - एषामकारोऽन्तादेश: स्याद्विभक्तौ।
53. अतो गुणे (6-1-97) - अपदान्तादकाराद् गुणे परत: पररूपमेकादेश: स्यात्।
54. शि सर्वनामस्थानम् (1-1-42) - शि इत्येतदुक्तसंज्ञं स्यात्।
55. नपुंसकस्य झलच: (7-1-72) - झलन्तस्याऽजन्तस्य च क्लीबस्य नुमागम: स्यात्सर्वनामस्थाने परे।
56. सर्वनामस्थाने चासंबुद्धौ (6-4-8) - नान्तस्योपधाया दीर्घ: स्यादसंबुद्धौ सर्वनामस्थाने परे।
57. अदसोऽसेर्दादु दो म: (8-2-80) - अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य मश्च। उ इति ह्रस्वदीर्घयो: समाहारद्वन्द्व:। आन्तरतम्याद्ध्रस्वव्यञ्जनयोर्ह्रस्वो दीर्घस्य दीर्घ:।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

त्रयोदशः पाठः - अनडुह्, विश्ववाह्, उपानह्, उष्णिह् - शब्दाः

द्वादशस्य पाठस्य पुनरावृत्तिः -

➢ अदस्-शब्दः पुंलिङ्गः - अदस्-शब्दात् सुप्रत्यये सकारस्य औ, सुप्रत्ययस्य लोपश्च। अन्यासु विभक्तिषु सकारस्य अकारादेशः। अदसः दकारात् उत्तरस्य अचः उकारः, दकारस्य मकारश्च भवति। तृतीयाविभक्तौ अमु इत्यस्य घिसंज्ञा, तन्निमित्तकः नादेशश्च। बहुवचने दकारात् परस्य एकारस्य ईकारः। दकारस्य मकारश्च। सर्वनामसंज्ञकः अयं शब्दः। अतः तन्निमित्तकानि कार्याणि भवन्ति।

➢ अदस्-शब्दः स्त्रीलिङ्गः - अदस्-शब्दात् सुप्रत्यये सकारस्य औ, सुप्रत्ययस्य लोपश्च। अन्यासु विभक्तिषु सकारस्य अकारादेशः। अदन्तत्वात् स्त्रियां टाप्। आबन्तः सर्वनामसंज्ञकश्च। अतः तन्निमित्तकानि कार्याणि भवन्ति। अदसः दकारात् उत्तरस्य अचः उकारः, दकारस्य मकारश्च भवति।

➢ अदस्-शब्दः नपुंसकलिङ्गः - सु-अमोः लुक्। औ-औटोः शी-आदेशः। जस्-शसोः शि-आदेशः। तस्य च सर्वनामस्थानसंज्ञा। अतः नुमागमः, उपधादीर्घश्च।

अस्य पाठस्य प्रोजनानि -

1. अस्मिन् पाठे अनडुह्-शब्दस्य रूपाणि पठामः।
2. विश्ववाह्-शब्दस्य रूपाणि पठामः।
3. उष्णिह्-शब्दस्य रूपाणि पठामः।
4. उपानह्-शब्दस्य रूपाणि पठामः।

हकारान्तः पुंलिङ्गः अनडुह्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	अनडुह्+सु(स्)→ अनड्वान्	अनडुह्+औ→ अनड्वाहौ	अनडुह्+जस्(अस्)→ अनड्वाहः
द्वितीया	अनडुह्+अम्→ अनड्वाहम्	अनडुह्+औट् (औ)→अनड्वाहौ	अनडुह्+शस्(अस्)→ अनडुहः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
तृतीया	अनडुह्+टा(आ)→ अनडुहा	अनडुह्+भ्याम्→ अनडुद्भ्याम्	अनडुह्+भिस्→ अनडुद्भिः
चतुर्थी	अनडुह्+ङे(ए)→ अनडुहे	अनडुह्+भ्याम्→ अनडुद्भ्याम्	अनडुह्+भ्यस्→ अनडुद्भ्यः
पञ्चमी	अनडुह्+ङसि (अस्)→अनडुहः	अनडुह्+भ्याम्→ अनडुद्भ्याम्	अनडुह्+भ्यस्→ अनडुद्भ्यः
षष्ठी	अनडुह्+ङस् (अस्)→अनडुहः	अनडुह्+ओस्→ अनडुहोः	अनडुह्+आम्→ अनडुहाम्
सप्तमी	अनडुह्+ङि(इ)→ अनडुहि	अनडुह्+ओस्→ अनडुहोः	अनडुह्+सुप्(सु)→ अनडुत्सु
सम्बोधनम्	हे अनडुह्+सु(स्)→ हे अनड्वन्!	हे अनडुह्+औ→ हे अनड्वाहौ !	हे अनडुह्+जस् (अस्)→हे अनड्वाहः !

1. अनडुह् + सु, सर्वनामस्थाने परे अनडुह्-शब्दस्य आम्-आगमः भवति[1], सः मित्। अतः अन्त्यात् अचः परः भवति[2] अनडु + आह् + स्, उकारस्य यणादेशः।[3] अनड्वाह् + स्। सुप्रत्यये अनडुह्-शब्दस्य नुम् आगमः भवति[4], सः अपि मित्। अतः अन्त्यात् अचः परः भवति। अनड्वान्ह् + स्, हलः परस्य सोः सकारस्य लोपः[5], अनड्वान्ह्। संयोगान्तस्य हस्य लोपः।[6] अनड्वान्।
2. अनडुह् + औ/औट्/अम्/जस् - सर्वनामस्थानसंज्ञकाः[7] इमे। अतः अनडुह्-शब्दस्य आम्-आगमः[8], यणादेशः[9] अनड्वाह्, प्रत्ययेन संयोगः। औ-अनड्वाहौ। जस्-अनड्वाहः। अम्। अनड्वाहम्।
3. हलादिषु प्रत्ययेषु परेषु अनडुह्-शब्दस्य पदसंज्ञा।[10] अतः अनडुहः हकारस्य दकारादेशः[11] अनडुद्भ्याम्, अनडुद्भिः, अनडुद्भ्यः। सुपि दकारस्य चर्त्वम्[12] (त) अनडुद् + सु→अनडुत् + सु। अनडुत्सु।
4. सम्बुद्धौ तु आम्-आदेशं बाधित्वा अम्-आदेशः भवति।[13] हे अनडुह् + सु→हे अनडु + अ + ह् + सु, यणादेशः हे अनड्वह् + सु, नुमागमः। हे अनड्वन्ह् +

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

सु→हे अनड्वन्ह् + स्→हे अनड्वन्ह्। संयोगान्तस्य लोपः। हे अनड्वन्।

हकारान्तः पुंलिङ्गः विश्ववाह्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	विश्ववाह्+सु(स्)→ विश्ववाट्/विश्ववाड्	विश्ववाह्+औ→ विश्ववाहौ	विश्ववाह्+जस् (अस्)→विश्ववाहः
द्वितीया	विश्ववाह्+अम्→ विश्ववाहम्	विश्ववाह्+औट् (औ)→विश्ववाहौ	विश्ववाह्+शस् (अस्)→विश्वौहः
तृतीया	विश्ववाह्+टा(आ)→ विश्वौहा	विश्ववाह्+भ्याम्→ विश्ववाड्भ्याम्	विश्ववाह्+भिस्→ विश्ववाड्भिः
चतुर्थी	विश्ववाह्+ङे(ए)→ विश्वौहे	विश्ववाह्+भ्याम्→ विश्ववाड्भ्याम्	विश्ववाह्+भ्यस्→ विश्ववाड्भ्यः
पञ्चमी	विश्ववाह्+ङसि (अस्)→विश्वौहः	विश्ववाह्+भ्याम्→ विश्ववाड्भ्याम्	विश्ववाह्+भ्यस्→ विश्ववाड्भ्यः
षष्ठी	विश्ववाह्+ङस् (अस्)→विश्वौहः	विश्ववाह्+ओस्→ विश्वौहोः	विश्ववाह्+आम्→ विश्वौहाम्
सप्तमी	विश्ववाह्+ङि(इ)→ विश्वौहि	विश्ववाह्+ओस्→ विश्वौहोः	विश्ववाह्+सुप्(सु)→ विश्ववाट्त्सु/विश्ववाट्सु
सम्बोधनम्	हे विश्ववाह्+सु (स्)→हे विश्ववाट्!	हे विश्ववाह्+औ→ हे विश्ववाहौ!	हे विश्ववाह्+जस् (अस्)→हे विश्ववाहः!

1. विश्ववाह् + सु→विश्ववाह् + स्, हलः परस्य सोः सकारस्य लोपः।[14] विश्ववाह्, पदान्ते विद्यमानस्य हकारस्य ढकारः। अवसाने विद्यमानस्य ढकारस्य विकल्पेन चर्त्वम्। विश्ववाट्। पक्षे जश्त्वेन डः विश्ववाड्।
2. शस्, टा, ङे, ङसि, ङस्, ओस्, आम्, ङि - प्रत्ययेषु परेषु विश्ववाह्-शब्दस्य भसंज्ञा।[15] अतः वाहः वस्य ऊठ् भवति।[16] तदा पूर्वरूपम्।[17] विश्व ऊह् इति। अकार-ऊकारयोः वृद्धिः।[18]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विश्ववाह् + शस्→विश्ववाह् + अस्→विश्व ऊ आ ह् + अस्→विश्व ऊह् + अस्→विश्वौह् + अस्→ विश्वौहस्→विश्वौहः।

3. हलादिषु प्रत्ययेषु परेषु विश्ववाह्-शब्दस्य पदसंज्ञा।[19] अतः हकारस्य ढकारः[20], तस्य च जश्त्वेन डकारः[21]। विश्ववाड्भ्याम्-इत्यादि। सुपि तु चर्त्वेन टकारः।[22] विश्ववाह् + भ्याम्→विश्ववाढ् + भ्याम्→विश्ववाड् + भ्याम्→विश्ववाड्भ्याम्। विश्ववाह् + सुप्→विश्ववाढ् + सु→विश्ववाड् + सु→डात्परस्य सस्य वा धुडागमः। अनुबन्धलोपः। डस्य चर्त्वेन टकारः। धस्य चर्त्वेन तकारः। विश्ववाट्त्सु। धुडभावे विश्ववाट् + सु→विश्ववाट्सु।

हकारान्तः स्त्रीलिङ्गः उष्णिह्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	उष्णिह्+सु(स्)→ उष्णिक्	उष्णिह्+औ→ उष्णिहौ	उष्णिह्+जस्(अस्)→ उष्णिहः
द्वितीया	उष्णिह्+अम्→ उष्णिहम्	उष्णिह्+औट् (औ)→उष्णिहौ	उष्णिह्+शस्(अस्)→ उष्णिहः
तृतीया	उष्णिह्+टा(आ)→ उष्णिहा	उष्णिह्+भ्याम्→ उष्णिग्भ्याम्	उष्णिह्+भिस्→ उष्णिग्भिः
चतुर्थी	उष्णिह्+ङे(ए)→ उष्णिहे	उष्णिह्+भ्याम्→ उष्णिग्भ्याम्	उष्णिह्+भ्यस्→ उष्णिग्भ्यः
पञ्चमी	उष्णिह्+ङसि (अस्)→उष्णिहः	उष्णिह्+भ्याम्→ उष्णिग्भ्याम्	उष्णिह्+भ्यस्→ उष्णिग्भ्यः
षष्ठी	उष्णिह्+ङस् (अस्)→उष्णिहः	उष्णिह्+ओस्→ उष्णिहोः	उष्णिह्+आम्→ उष्णिहाम्
सप्तमी	उष्णिह्+ङि(इ)→ उष्णिहि	उष्णिह्+ओस्→ उष्णिहोः	उष्णिह्+सुप्(सु)→ उष्णिक्षु
सम्बोधनम्	हे उष्णिह्+सु(स्)→ हे उष्णिक्!	हे उष्णिह्+औ→ हे उष्णिहौ!	हे उष्णिह्+जस् (अस्)→हे उष्णिहः!

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. उष्णिह् + सु→उष्णिह् + स्, हलः परस्य सोः सकारस्य लोपः।[23] उष्णिह्, हकारस्य कुत्वम्। उष्णिघ्।[24] अन्त्यस्य झलः अवसाने विकल्पेन चर्त्वम्[25] उष्णिक्। चर्त्वाभावे घस्य जश्त्वेन[26] गकारः। उष्णिग्।
2. अजादिषु प्रत्ययेषु विशिष्टं कार्यं नास्ति। उष्णिहौ, उष्णिहः - इत्यादि।
3. हलादिषु प्रत्ययेषु उष्णिह्-शब्दस्य पदसंज्ञा।[27] अतः हकारस्य कुत्वम्।[28], अवसाने विकल्पेन चर्त्वम्।[29] पक्षे जश्त्वम्।[30] सुपि तु नित्यं चर्त्वम्।[31] सुपः सकारस्य मूर्धन्यादेशः।[32]

उष्णिह् + भ्याम्→उष्णिघ् + भ्याम्→उष्णिग् + भ्याम्→उष्णिग्भ्याम्।

उष्णिह् + सुप्→उष्णिह् + सु→उष्णिघ् + सु→उष्णिग् + सु→उष्णिक् + सु→उष्णिक् + षु→उष्णिक्षु।

हकारान्तः स्त्रीलिङ्गः उपानह्-शब्दः

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमा	उपानह्+सु(स्)→ उपानत्/उपानद्	उपानह्+औ→ उपानहौ	उपानह्+जस्(अस्)→ उपानहः
द्वितीया	उपानह्+अम्→ उपानहम्	उपानह्+औट् (औ)→उपानहौ	उपानह्+शस्(अस्)→ उपानहः
तृतीया	उपानह्+टा (आ)→उपानहा	उपानह्+भ्याम्→ उपानद्भ्याम्	उपानह्+भिस्→ उपानद्भिः
चतुर्थी	उपानह्+ङे(ए)→ उपानहे	उपानह्+भ्याम्→ उपानद्भ्याम्	उपानह्+भ्यस्→ उपानद्भ्यः
पञ्चमी	उपानह्+ङसि (अस्)→उपानहः	उपानह्+भ्याम्→ उपानद्भ्याम्	उपानह्+भ्यस्→ उपानद्भ्यः
षष्ठी	उपानह्+ङस् (अस्)→उपानहः	उपानह्+ओस्→ उपानहोः	उपानह्+आम्→ उपानहाम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
सप्तमी	उपानह्+ङि(इ)→ उपानहि	उपानह्+ओस्→ उपानहो:	उपानह्+सुप्(सु)→ उपानत्सु
सम्बोधनम्	हे उपानह्+सु(स्)→ हे उपानत्!	हे उपानह्+औ→ हे उपानहौ!	हे उपानह्+जस् (अस्)→हे उपानह:!

1. उपानह् + सु→उपानह् + स्, हल: परस्य सो: सकारस्य लोप:। उपानह्। पदान्तस्य हस्य धकार:[33] उपानध्। तस्य अवसाने विकल्पेन चर्त्वम्। उपानत्। पक्षे झल: जश्। उपानद्।
2. अजादिषु प्रत्ययेषु विशिष्टं कार्यं किमपि न वर्तते। उपानहौ-उपानह: इत्यादि।
4. हलादिषु प्रत्ययेषु उपानह्-शब्दस्य पदसंज्ञा।[34] अत: हकारस्य धकार:।[35] तस्य जशत्वम्।[36] उपानह्+भ्याम्→उपानध्+भ्याम्→उपानद्+भ्याम्→उपानद्भ्याम्। उपानह् + सुप्→उपानध् + सु→उपानद् + सु→उपानत् + सु→उपानत्सु।

पाठसार: -

1. अनडुह्-शब्द: - सर्वनामस्थाने परे आम्-आगम: भवति। सम्बुद्धौ तु अम्-आगम: भवति। सुप्रत्यये परे नुम्-आगम: अपि भवति। पदसंज्ञायां हकारस्य दकार:।
2. विश्ववाह्-शब्द: - पदसंज्ञायां हकारस्य ढकार:, अवसाने च विकल्पेन चर्त्वम्। पक्षे तस्य जशत्वम्। भसंज्ञायां वाह: वस्य ऊठ् भवति।
3. उष्णिह्-शब्द: - पदसंज्ञायां हकारस्य कुत्वे घकार:। अवसाने विकल्पेन चर्त्वम्। तस्य च जशत्वम्। अजादिषु विशिष्टं कार्यं न वर्तते।
4. उपानह्-शब्द: - पदसंज्ञायां हकारस्य धकार:, अवसाने विकल्पेन चर्त्वम्। तस्य जशत्वम्। अजादिषु विशिष्टं कार्यं न वर्तते।

अभ्यास:

एकेन वाक्येन समाधत्त -

1. अनडुह्-शब्दस्य प्रथमैकवचनान्तं रूपमुक्त्वा सिद्धिप्रकारमपि लिखत।
2. विश्ववाह्-शब्दस्य तृतीयैकवचनान्तं रूपमुक्त्वा सिद्धिप्रकारमपि दर्शयत।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. उष्णिह्-शब्दस्य सम्बुद्धौ रूपं लिखित्वा प्रक्रियां दर्शयत।

4. उपानह्-शब्दस्य प्रथमैकवचनं रूपमुक्त्वा सिद्धिं दर्शयत।

योग्यमुत्तरं चिनुत -

1. उष्णिह् + सुप् - अत्र सकारस्य किं कार्यम्?
   अ) मूर्धन्यादेशः आ) लोपः इ) न किमपि
2. उष्णिघ् + भ्याम् - अत्र किं कार्यं भवति?
   अ) चर्त्वम् आ) जश्त्वम् इ) न किमपि
3. उपानध् + भ्याम् - अत्र किं कार्यम्?
   अ) धकारस्य तकारः आ) धकारस्य घकारः इ) धकारस्य दकारः
4. उपानह् +जस् - किं रूपम्?
   अ) उपानहः आ) उपानधः इ) उपानदः
5. पदसंज्ञायाम् उपानह् - इत्यत्र हकारस्य किं कार्यम्?
   अ) धकारः आ) घकारः इ) ढकारः
6. विश्ववाह् + ङे - अत्र किं कार्यम्?
   अ) वकारस्य उकारः आ) वकारस्य ऊठ् इ) न उभयम्
7. अनडुह् + औट् - किं कार्यम्?
   अ) नुम्-आगमः आ) आम्-आगमः इ) उभयम्
8. विश्ववाह् + शस् - अत्र किं रूपम्?
   अ) विश्ववाहः आ) विश्वौहः इ) विश्वोहः
9. अनडुह्-शब्दस्य सम्बुद्धौ किं रूपम्?
   अ) हे अनड्वान् आ) हे अनडुह् इ) हे अनड्वन्
10. अनडुह्-शब्दस्य सम्बुद्धौ किं कार्यम्?
   अ) आम्-आगमः आ) अम्-आगमः इ) उभयम्

योजयत -

1. उपानह् + भ्याम्	हकारस्य दकारः
2. उष्णिह् + भ्याम्	हकारस्य ढकारः
3. विश्ववाह् + भ्याम्	हकारस्य घकारः
4. अनडुह् + भ्याम्	हकारस्य धकारः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विभक्तिप्रत्ययं प्रातिपदिकेन संयोज्य प्रक्रियां लिखत -

1. विश्ववाह् + सुप्
2. उष्णिह् + सुप्
3. उपानह् + सुप्
4. अनडुह् + सुप्

प्रक्रियां लिखित्वा, भेदं प्रतिपादयत -

1. अनुडुह् + सु, विश्ववाह् + सु
2. उष्णिह् + भ्याम्, उपानह् + भ्याम्
3. अनडुह् + शस्, विश्ववाह् + शस्
4. अनडुह् + सुप्, विश्ववाह् + सुप्
5. हे अनडुह् + सु, हे विश्ववाह् + सु

विभक्तिप्रत्ययं पृथक्कृत्य प्रक्रियां लिखत -

1. विश्वौहः
2. उष्णिहः
3. उपानहः
4. अनड्वाहः

---

1. चतुरनडुहोरामुदात्तः (7-1-98) - अनयोराम् स्यात् सर्वनामस्थाने परे, स चोदात्तः।
2. मिदचोन्त्यात्परः (1-1-47) - अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित् स्यात्।
3. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
4. सावनडुहः (7-1-82) - अस्य नुम् स्यात्सौ परे।
5. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
6. संयोगान्तस्य लोपः (8-2-23) - संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्।
7. सुडनपुंसकस्य (1-1-43) - सुडिति प्रत्याहारः। स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य।
8. चतुरनडुहोरामुदात्तः (7-1-98) - अनयोराम् स्यात् सर्वनामस्थाने परे, स चोदात्तः।
9. इको यणचि (6-1-77) - इकः स्थाने यण् स्यादचि संहितायां विषये।
10. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

11. वसुस्रंसुध्वंस्वनडुहां दः (8-2-72) - सान्तवस्वन्तस्य स्रंसादेश्च दः स्यात्पदान्ते।
12. खरि च (8-4-55) खरि परे झलां चरः स्युः।
13. अम् संबुद्धौ (7-1-99) - चतुरनडुहोरम् स्यात्संबुद्धौ।
14. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
15. यचि भम् (1-4-18) - यकारादिष्वजादिषु च कप्प्रत्यायवधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं भसंज्ञं स्यात्।
16. वाह ऊठ् (6-4-132) - भस्य वाहः संप्रसारणमूठ् स्यात्।
17. संप्रसारणाच्च (6-1-108) - संप्रसारणादचि परे पूर्वरूपमेकादेशः स्यात्।
18. एत्येधत्यूठ्सु (6-1-89) - अवर्णादिजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात्।
19. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
20. हो ढः (8-2-31) - हस्य ढः स्याज्झलि पदान्ते च।
21. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
22. खरि च (8-4-55) खरि परे झलां चरः स्युः।
23. हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् (6-1-68) - हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते।
24. क्विन्प्रत्ययस्य कुः (8-2-62) - क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात्पदान्ते।
25. वाऽवसाने (8-4-56) - अवसाने झलां चरो वा स्युः।
26. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
27. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
28. क्विन्प्रत्ययस्य कुः (8-2-62) - क्विन्प्रत्ययो यस्मात्तस्य कवर्गोऽन्तादेशः स्यात्पदान्ते।
29. वाऽवसाने (8-4-56) - अवसाने झलां चरो वा स्युः।
30. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।
31. खरि च (8-4-55) खरि परे झलां चरः स्युः।
32. आदेशप्रत्यययोः (8-3-59) - इण्कवर्गाभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सकारस्तस्य मूर्धन्यादेशः स्यात्।
33. नहो धः (8-2-34) - नहो हस्य धः स्याज्झलि पदान्ते च।
34. स्वादिष्वसर्वनामस्थाने (1-4-17) - कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु परतः पूर्वं पदसंज्ञं स्यात्।
35. नहो धः (8-2-34) - नहो हस्य धः स्याज्झलि पदान्ते च।
36. झलां जशोऽन्ते (8-2-39) - पदान्ते झलां जशः स्युः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्त्रीप्रत्ययप्रकरणम्

प्रथमः पाठः - स्त्रीप्रत्ययानां परिचयः

प्रयोजनानि -

1. अस्मिन् पाठे स्त्रीप्रत्ययानां परिचयः क्रियते।
2. स्त्रीप्रत्ययाः कति, ते च के इति पठामः।
3. कस्मात् स्त्रीप्रत्ययाः भवन्ति इति सामान्यज्ञानं प्राप्नुमः।

शब्दानां त्रिषु लिङ्गेषु व्यवहारः भवति। तानि च लिङ्गानि - 1. पुंलिङ्गम् 2. स्त्रीलिङ्गम् 3. नपुंसकलिङ्गम् - इति।

लोके केषाञ्चन शब्दानाम् एकस्मिन् एव लिङ्गे प्रयोगः भवति। यथा - स्त्री इति शब्दः। एषः केवलं स्त्रीलिङ्गे भवति। पुम् इति शब्दः। अयं केवलं पुंलिङ्गे भवति। नपुंसकम् इति शब्दः। केवलं नपुंसकलिङ्गे भवति।

केषाञ्चन शब्दानां लिङ्गद्वये प्रयोगः भवति। यथा - वृषल इति शब्दः, एतस्य प्रयोगः पुंलिङ्गे भवति, स्त्रीलिङ्गे च। यथा - वृषलः, वृषली।

केषाञ्चन शब्दानां प्रयोगः लिङ्गत्रये भवति। यथा - तट इति शब्दः। एतस्य प्रयोगः पुंलिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च भवति। यथा - तटः, तटी, तटम्।

स्त्रीप्रत्ययाः कस्मात् भवन्ति -

ये शब्दाः स्त्रीलिङ्गे प्रयोक्तुम् अर्हाः, तेभ्यः प्रातिपदिकेभ्यः स्त्रीप्रत्ययाः भवन्ति।

एते च प्रत्ययाः नव सन्ति। ते - **1. टाप् 2. डाप् 3. चाप् 4. ङीप् 5. ङीष् 6. ङीन् 7. ष्फ 8. ऊङ् 9. ति।**

प्रत्ययः	इत्संज्ञकः वर्णः(लोपः)	अवशिष्टः भागः	उदाहरणम्
टाप्	ट्,प्	आ	अजा
डाप्	ड्,प्	आ	सीमा
चाप्	च्,प्	आ	सूर्या

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

एतेषु त्रिषु प्रत्ययेषु केवलम् "आ" इति वर्णः अवशिष्टः भवति।

1. टाप्-प्रत्यये टकारस्य[1] पकारस्य[2] च इत् इति संज्ञा भवति। अतः उभयोः लोपः भवति।[3] यथा - अजा। अज + टाप्→अज + आ[4] सवर्णदीर्घे →अजा।
2. चाप्-प्रत्यये चकारस्य[5] पकारस्य[6] च इत् इति संज्ञा भवति। अतः उभयोः लोपः भवति।[7] यथा - सूर्या। सूर्य + चाप्→सूर्य + आ[8] सवर्णदीर्घे →सूर्या।
3. डाप्-प्रत्यये डकारस्य[9] पकारस्य[10] च इत्-संज्ञा भवति। अतः उभयोः लोपः भवति[11]। यथा - सीमा। सीमन् + डाप्→सीमन्[12] + आ→सीम् + आ→सीमा।

प्रत्ययः	इत्संज्ञकः वर्णः (लोपः)	अवशिष्टः भागः	उदाहरणम्
ङीप्	ङ्, प्	ई	कर्त्री
ङीष्	ङ्, ष्	ई	गौरी
ङीन्	ङ्, न्	ई	शार्ङ्गरवी

एतेषु त्रिषु प्रत्ययेषु केवलम् "ई" इति वर्णः अवशिष्टः भवति।

1. ङीप्-प्रत्यये ङकारस्य[13] पकारस्य[14] च इत्संज्ञा भवति। अतः उभयोः लोपः भवति।[15] यथा - कर्त्री। कर्तृ + ङीप्→कर्तृ + ई[16] यणादेशे→कर्त्री।
2. ङीष्-प्रत्यये ङकारस्य[17] षकारस्य[18] च इत्संज्ञा भवति। अतः उभयोः लोपः भवति।[19] यथा - गौरी। गौर + ङीष्→गौर + ई→गौर्[20] + अकारलोपे→गौरी।
3. ङीन्-प्रत्यये ङकारस्य नकारस्य[21] च इत्संज्ञा भवति। अतः उभयोः लोपः भवति।[22] यथा - शार्ङ्गरवी। शार्ङ्गरव + ङीन्→शार्ङ्गरव + ई→अकारलोपे शार्ङ्गरव्[23] + ई→शार्ङ्गरवी।

ष्फ - फ

षकारस्य इत्संज्ञा भवति।[24], तस्य लोपः भवति।[25] फ अवशिष्टः। तस्य च आयन् आदेशः भवति।[26] यथा - गार्ग्यायणी। गार्ग्य + ष्फ→गार्ग्य + फ→गार्ग्य + आयन→गार्ग्य् + आयन→गार्ग्यायण, तस्मात् ङीष्।[27] गार्ग्यायणी।

ऊङ् - ऊ

अत्र ङकारस्य इत्संज्ञा। तस्य लोपः च भवति, ऊकारः अवशिष्टः। यथा - कुरू। कुरु + ऊङ्→कुरु + ऊ[28]→सवर्णदीर्घः भवति। कुरू।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ति - ति

तिप्रत्यये कस्यापि वर्णस्य इत्संज्ञा न भवति। युवन् + ति, नकारस्य लोपे→युव[२९]+ ति→युवतिः।

सम्प्रति सामान्यतया स्त्रीप्रत्ययाः कस्माद् विहिताः इति तालिकया प्रदर्श्यते।



तालिकायाः विवरणम् -

स्त्रीप्रत्ययानां विधानं द्विधा दृश्यते - 1. सामान्यविधिः 2. विशेषविधिः इति। सामान्यविधौ स्त्रीप्रत्ययाः अन्ते विद्यमानं वर्णम् आधारीकृत्य विहिताः। तत्र द्विधा विभागः वक्तुं शक्यः - 1. अजन्तेभ्यः विहिताः 2. हलन्तेभ्यः विहिताः इति।

अजन्तेषु पुनः एवं विभागः वक्तुं शक्यते - 1. ह्रस्व-अकारान्तेभ्यः 2. ह्रस्व-इकारान्तेभ्यः 3. ह्रस्व-उकारान्तेभ्यः 4. ह्रस्व-ऋकारान्तेभ्यश्च विहिताः।

हलन्तप्रातिपदिकेभ्यः तु साधारणतया नकारान्तेभ्यः विहिताः सन्ति। तत्रापि भेदाः सन्ति - 1. अन्-अन्तेभ्यः विहिताः। 2. वन्-अन्तेभ्यः विहिताः 3. मन्-अन्तेभ्यः विहिताः इत्येवं प्रकारेण।

विशेषविहिताः यथा - सूत्रे 1. तत्तत्पदमुच्चार्य विहिताः 2. गणमुच्चार्य विहिताः च इति वक्तुं शक्यते।

पाठसारः -

1. अस्मिन् पाठे शब्दानां लिङ्गव्यवस्थां ज्ञातवन्तः।
2. स्त्रीप्रत्ययाः नव सन्ति। ते च - टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ष्फ, ऊङ्, ति - इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. टाप्, डाप्, चाप् - अत्र टकारस्य, डकारस्य, चकारस्य इत्संज्ञा। तस्य लोपः। एतेषु त्रिषु प्रत्ययेषु आ इति अवशिष्टः वर्णः भवति।
4. ङीप्, ङीष्, ङीन् - एतेषु त्रिषु प्रत्ययेषु ई इति अवशिष्टः वर्णः भवति।
5. अत्र ङकारस्य इत्संज्ञा। तस्य लोपः च भवति, ऊकारः वर्णः अवशिष्टः।
6. षकारस्य इत्संज्ञा भवति। तस्य लोपः भवति। फ इति वर्णः अवशिष्टः। तस्य च आयन् आदेशः भवति।
7. स्त्रीप्रत्ययानां विधानं द्विधा - 1. सामान्यविधिः 2. विशेषविधिः - इति।
8. स्त्रीप्रत्ययाः अन्ते विद्यमानं वर्णम् आधारीकृत्य विहिताः। तदाधारेण 1.अजन्तेभ्यः विहिताः स्त्रीप्रत्ययाः 2. हलन्तेभ्यः विहिताः स्त्रीप्रत्ययाः।
9. अजन्तेषु पुनः एवं विभागः वक्तुं शक्यते - 1. ह्रस्व-अकारान्तेभ्यः 2.ह्रस्व-इकारान्तेभ्यः 3. ह्रस्व-उकारान्तेभ्यः 4. ह्रस्व-ऋकारान्तेभ्यः च विहिताः।
10. हलन्तप्रातिपदिकेभ्यः तु साधारणतया नकारान्तेभ्यः विहिताः सन्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. नपुंसकम् इति शब्दः कस्मिन् लिङ्गे भवति?
2. लिङ्गत्रये विद्यमानान् पञ्च शब्दान् लिखत।
3. स्त्रीप्रत्ययाः कति? के च ते?
4. अजन्तेषु कस्मात् स्त्रीप्रत्ययाः विहिताः?

योग्यमुत्तरं चिनुत -

1. स्त्रीप्रत्ययाः कति सन्ति ?
   अ) षट् आ) सप्त इ) नव
2. चाप्-प्रत्यये कः वर्णः अवशिष्टः भवति ?
   अ) पकारः आ) चकारः इ) आकारः
3. ङीप्-प्रत्यये कः अवशिष्टः भवति ?
   अ) ईकारः आ) पकारः इ) ङकारः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. ति-प्रत्यये कस्य वर्णस्य इत्संज्ञा भवति ?

अ) इकारस्य आ) तकारस्य इ) न कस्यचित्

5. ऊङ्-प्रत्यये कस्य वर्णस्य इत्संज्ञा भवति ?

अ) ङकारस्य आ) ऊकारस्य इ) न कस्यचित्

6. अध: विद्यमानेषु स्त्रीप्रत्यय: क: ?

अ) तिप् आ) ति इ) ती

परियोजना -

भवतां पाठ्यांशे स्त्रीलिङ्गे विद्यमानान् शब्दान् अन्विष्य लिखत।

---

1. चुटू (1-3-7) प्रत्ययाद्यौ चुटू इतौ स्त:।
2. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हल् इत्स्यात्।
3. तस्य लोप: (1-3-9) तस्य इतो लोप: स्यात्।
4. अक: सवर्णे दीर्घ: (6-1-101) - अक: सवर्णेऽचि परे दीर्घ एकादेश: स्यात्।
5. चुटू (1-3-7) प्रत्ययाद्यौ चुटू इतौ स्त:।
6. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हल् इत्स्यात्।
7. तस्य लोप: (1-3-9) तस्य इतो लोप: स्यात्।
8. अक: सवर्णे दीर्घ: (6-1-101) - अक: सवर्णेऽचि परे दीर्घ एकादेश: स्यात्।
9. चुटू (1-3-7) प्रत्ययाद्यौ चुटू इतौ स्त:।
10. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हल् इत्स्यात्।
11. तस्य लोप: (1-3-9) तस्य इतो लोप: स्यात्।
12. प्रत्ययस्य डित्त्वात् "टे:" इति सूत्रेण टे: लोप:
13. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इत: स्यु:।
14. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हल् इत्स्यात्।
15. तस्य लोप: (1-3-9) तस्य इतो लोप: स्यात्।
16. "इको यणचि" इति ऋकारस्य यणादेश: रेफ:।
17. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इत: स्यु:।
18. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हल् इत्स्यात्। उपदेश आद्योच्चारणम्।
19. तस्य लोप: (1-3-9) तस्य इतो लोप: स्यात्।
20. यस्येति च (6-4-148) इति अकारस्य लोप:
21. लशक्वतद्धिते (1-3-8) तद्धितवर्जप्रत्ययाद्या लशकवर्गा इत: स्यु:।
22. हलन्त्यम् (1-3-3) - उपदेशेऽन्त्यं हल् इत्स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

23. तस्य लोपः (1-3-9) तस्य इतो लोपः स्यात्।
24. षः प्रत्ययस्य (1-3-6) - प्रत्ययस्यादिः ष इत्स्यात्।
25. तस्य लोपः (1-3-9) - तस्य इतो लोपः स्यात्।
26. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2) - प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।
27. षिद्गौरादिभ्यश्च (4-1-41) - षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात्।
28. अकः सवर्णे दीर्घः (6-1-101) - अकः सवर्णेऽचि परे दीर्घ एकादेशः स्यात्।
29. न लोपः प्रातिपदिकान्तस्य (8-2-7) - नेति प्रातिपदिकेति च लुप्तषष्ठीके पदे। प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नकारस्य लोपः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः पाठः - अदन्तेभ्यः स्त्रीप्रत्ययाः

पुनरावृत्तिः -

- पूर्वस्मिन् पाठे स्त्रीप्रत्ययाः केभ्यः शब्देभ्यः विहिताः इति ज्ञातवन्तः।
- स्त्रीप्रत्ययाः कति सन्ति, के च ते इति ज्ञातवन्तः।
- स्त्रीप्रत्ययानां विधाने विभागः दृष्टः।

अस्य पाठस्य प्रयोजनानि -

1. अस्मिन् पाठे ह्रस्व-अकारान्तेभ्यः स्त्रीप्रत्ययविधानं पठामः।
2. ह्रस्व-अकारान्तेभ्यः स्त्रीप्रत्ययविधाने विभागान् पठामः।

ह्रस्व-अकारान्तः -

अजन्ताः - अच्-वर्णः येषां शब्दानाम् अन्ते वर्तते सः = अजन्तः

1. सामान्यतया ह्रस्व-अकारान्तेभ्यः शब्देभ्यः टाप्-प्रत्ययः(आ) विहितः[1]। टाप् प्रत्यये केवलम् आकारः अवशिष्यते।यथा-देवदत्त+टाप्, देवदत्त+आ→देवदत्ता।
2. प्रथमवयोवाचकेभ्यः शब्देभ्यः ह्रस्व-अकारान्तेभ्यः ङीप्-प्रत्ययः(ई) भवति[2]। यथा - कुमार+ङीप्, कुमार + ई→कुमारी। किशोर + ङीप्, किशोर + ई→किशोरी। अत्र कुमार इति प्रथमवयोवाचकः शब्दः। तस्मात् ङीप्।

प्रथमवयोवाचकः - वयसः त्रिधा विभागः कृतः। 1.कौमारम् 2.यौवनम् 3.वार्धक्यम् इति। तत्र प्रथमवयोवाचकः नाम कुमार, किशोर इत्यादिः।

3. ह्रस्व-अकारान्तात् द्विगुसंज्ञकात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययः(ई) भवति।[3] यथा - त्रिलोक + ङीप्, त्रिलोक + ई →त्रिलोकी। अत्र त्रिलोक इति द्विगुसंज्ञकः अकारान्तः शब्दः। तस्मात् स्त्रियां ङीप्।
4. एवं स्थिते त्र्यनीकशब्दात्, त्रिफलशब्दात् च ङीप् न भवति। किन्तु टाप् प्रत्ययः भवति।[4] उदा - त्र्यनीका, त्रिफला।
5. पुंयोगात् हेतोः यत् प्रातिपदिकं पुंसः आख्याभूतं स्त्रियां वर्तते तस्मात् प्रातिपदिकात् ङीष्-प्रत्ययः(ई) भवति।[5] यथा - गोपस्य स्त्री→गोप + ङीप्, गोप + ई→गोपी। गणकस्य पत्नी→गणक + ङीप्। गणक + ई गणकी, गिरिशस्य स्त्री→गिरिश+ ङीप्, गिरिश + ई गिरिशी।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पुंयोगः - पुरुषेण सह सम्बन्धः, यथा - पतिपत्नीभावसम्बन्धः।

पुरुषेण सह सम्बन्धात् पुंवाचकः शब्दः स्त्रियां प्रयुक्तः चेत् तस्मात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष् भवतीत्यर्थः।

गणक इति शब्दः पुंवाचकः। पुंयोगात् स्त्रियं बोधयति। अतः ङीष्-प्रत्ययः भवति। तेन गणकी इति निष्पन्नम्।

6. सूर्यशब्दात् सूर्यस्य पत्नी देवता इति अर्थे चाप् प्रत्ययः(आ) भवति[6]। सूर्यस्य स्त्री देवता→ सूर्या। सूर्यस्य स्त्री मानुषी → सूरी।

सूर्यस्य पत्नी देवता चेत् - सूर्या। सूर्यस्य पत्नी मानुषी चेत् - सूरी।

7. इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिम-अरण्य-यव-यवन-मातुल-आचार्य इति 12 शब्देभ्यः स्त्रियां ङीष्-प्रत्ययः, आनुक् आगमश्च भवति।[7] आनुक्-आगमे आन् इति अवशिष्यते। ङीष्-प्रत्यये ई अवशिष्यते। तस्मात् आन् + ई - आनी इति प्रयोगेषु श्रूयते।

यथा - इन्द्र→इन्द्रस्य स्त्री = इन्द्र+आन्+ई→इन्द्राणी। वरुण→वरुणस्य स्त्री = वरुण+आन्+ई→वरुणानी। भव→भवस्य स्त्री = भव+आन्+ई→भवानी। शर्व→ शर्वस्य स्त्री = शर्व+आन्+ई→शर्वाणी। रुद्र→रुद्रस्य स्त्री = रुद्र+आन्+ई→ रुद्राणी। मृड→मृडस्य स्त्री = मृड+आन्+ई→मृडानी। हिम→महद् हिमम् = हिम+आन्+ई→हिमानी। अरण्य→महद् अरण्यम् = अरण्य+आन्+ई→ अरण्यानी। यव→दुष्टो यवः = यव+आन्+ई→यवानी। यवन→यवनानां लिपिः= यवन+आन्+ई→यवनानी। मातुल→मातुलस्य स्त्री = मातुल+आन्+ई→ मातुलानी। आचार्य→आचार्यस्य स्त्री = आचार्य+आन्+ई→आचार्यानी।

इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-मातुल-आचार्य इति[8] शब्देभ्यः पुंयोगे ङीष् भवति। इतरेषां तु पुंयोगः न सम्भवति। अतः भिन्नेषु अर्थेषु ङीष्-प्रत्ययः,आनुक् आगमश्च।

हिमशब्दात्, अरण्यशब्दात् च महत्त्वे अर्थे ङीष्-आनुकौ भवतः।[9]

यवशब्दात् दोषे अर्थे ङीष्-आनुकौ भवतः।[10] एवं यवनशब्दात् लिप्यां ङीष्- आनुकौ भवतः।[11]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

मातुलशब्दात् उपाध्यायशब्दस्य विकल्पेन आनुक्।[12]

आचार्यशब्दस्य आनुक्-आगमे नकारस्य णत्वं न भवति।[13] आचार्यानी इत्येव भवति।

8. असंयोगोपधम् उपसर्जनं यत् स्वाङ्गं तदन्तात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष्-प्रत्यय:(ई) विकल्पेन भवति।[14] यथा - चन्द्रमुख→चन्द्रमुखी/चन्द्रमुखा। सुकेश→सुकेशी/सुकेशा।

संयोग: = द्वयो: हल्वर्णयो: मध्ये अज्वर्णस्य अभाव:।[15] असंयोग : संयोगस्य अभाव:।

उपधावर्ण : - यस्मिन् कस्मिन्नपिशब्दे अन्यवर्णात् पूर्वं विद्यमान: वर्ण:।[16]

उपसर्जनम् - अप्रधानम्

स्वाङ्गलक्षणम् -त्रिविधम्।

1.प्राणिनि विद्यमानं, द्रवभिन्नं, आकृत्या युक्तं, विकारेण न निष्पन्नम्।

2.सम्प्रति प्राणिनि न विद्यमानमपि पूर्वं प्राणिनि दृष्टम्।

3.प्राणिनि यथा स्थितम्, तथैव अन्यत्र स्थितम्।

चन्द्रमुख इति शब्दे मुखम् इति प्राणिनि विद्यमानं, द्रवभिन्नं, आकृत्या युक्तं, विकारेण न निष्पन्नम्। अत: मुखं स्वाङ्गम्। असंयोगोपधम्, अप्रधानम्, अदन्तम् च यत् स्वाङ्गं = चन्द्रमुख इति प्रातिपदिकम्। तत: विकल्पेन ङीष्। तेन चन्द्रमुखी। ङीष: अभावे टाप् प्रत्यय: भवति। चन्द्रमुखा।

9. उपसर्जनीभूत-नासिकाशब्दान्तात्, उपसर्जनीभूत-उदरशब्दान्तात्,उपसर्जनीभूत-ओष्ठशब्दान्तात्, उपसर्जनीभूत-जङ्घाशब्दान्तात्, उपसर्जनीभूतदन्तशब्दान्तात्, उपसर्जनीभूत-कर्णशब्दान्तात्, उपसर्जनीभूत-शृङ्गशब्दान्तात् च विकल्पेन ङीष् भवति।[17] यथा - नासिका→तुङ्गनासिकी/तुङ्गनासिका। उदर→तलोदरी। तलोदरा। ओष्ठ→बिम्बोष्ठी/बिम्बोष्ठा। जङ्घ→दीर्घजङ्घी/दीर्घजङ्घा। दन्त→समदन्ती/समदन्ता। कर्ण→चारुकर्णी/चारुकर्णा। शृङ्ग→तीक्ष्णशृङ्गी। तीक्ष्णशृङ्गा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

10. जातिवाचकात् अयोपधात् अनियतस्त्रीलिङ्गात् च ङीष्-प्रत्ययः भवति[18]।
यथा - वृषल→ वृषली। कठ - कठी। तट→ तटी। बह्वृच → बह्वृची।

जातिलक्षणम् -

1. आकृतिग्रहणा - तटी।
2. लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या - वृषली।
3. गोत्रं च चरणैः सह - औपगवी, कठी।

> उपधा - अन्त्यवर्णात् पूर्वं विद्यमानः वर्णः[19]

> अयोपधात् - यस्मिन् प्रातिपदिके यकारः उपधा न भवति, तस्मात् प्रातिपदिकात्।

> अनियतस्त्रीलिङ्गाः - नित्यं यत् प्रातिपदिकं स्त्रीलिङ्गे न भवन्ति।

पाठसारः -

1. सामान्यतया ह्रस्व-अकारान्तेभ्यः टाप्-प्रत्ययः भवति।
2. प्रथमवयोवाचकेभ्यः ह्रस्व-अकारान्तेभ्यः ङीप्-प्रत्ययः भवति।
3. ह्रस्व-अकारान्तात् द्विगुसंज्ञकात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययः भवति।
4. त्र्यनीकशब्दात्, त्रिफलशब्दात् च ङीप् न भवति। किन्तु टाप् प्रत्ययः भवति।
5. पुरुषेण सह सम्बन्धात् पुंवाचकं प्रातिपदिकं स्त्रियां प्रयुक्तं चेत् तस्मात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष् भवति।
6. सूर्यशब्दात् देवता स्त्री इति अर्थे चाप् प्रत्ययः(आ) भवति। मानुषी स्त्री इत्यर्थे तु चाप् न, किन्तु ङीष् भवति।
7. इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिम-अरण्य-यव-यवन-मातुल-आचार्यशब्देभ्यः स्त्रियां ङीष्-प्रत्ययः, आनुक् आगमश्च भवति।
8. उपसर्जनीभूतनासिकादिशब्दान्तेभ्यः स्त्रियां ङीष् भवति।
9. असंयोगोपधम् उपसर्जनं यत् स्वाङ्गं तदन्तात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष्-प्रत्ययः(ई) विकल्पेन भवति।
10. जातिवाचकात् अयोपधात् अनियतस्त्रीलिङ्गात् च प्रातिपदिकात् ङीष्-प्रत्ययः भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः

एकेन वाक्येन समाधत्त -

1. स्वाङ्गस्य लक्षणं किम्?
2. पुंयोगः नाम कः?
3. उपधा नाम का?
4. प्रथमवयोवाचकः नाम कः?
5. अनियस्त्रीलिङ्गशब्दस्य अर्थः कः?

योग्यमुत्तरं चिनुत -

1. सामान्यतया ह्रस्व-अकारान्तेभ्यः प्रातिपदिकेभ्यः विधीयमानः प्रत्ययः कः?
   अ) टाप् आ) चाप् इ) डाप्
2. इन्द्रस्य स्त्री -
   अ) इन्द्री आ) इन्द्राणी इ) इन्द्रा
3. हिमानी -
   अ) हिमस्य स्त्री आ) महत् हिमम् इ) न उभयम्
4. यवानी -
   अ) यवस्य स्त्री आ) दुष्टः यवः इ) न उभयम्
5. अतिकेश-शब्दात् स्त्रियां कः प्रत्ययः?
   अ) टाप् आ) ङीष् इ) उभयमपि
6. कुम्भोदरशब्दात् कः स्त्रीप्रत्ययः?
   अ) टाप् आ) ङीष् इ) उभयमपि
7. पुंयोगे स्त्रियां कः प्रत्ययः?
   अ) टाप् आ) ङीप् इ) ङीष्
8. कीदृशात् जातिवाचकात् स्त्रियां ङीष्?
   अ) योपधात् आ) असंयोगोपधात् इ) अयोपधात्
9. आचार्यस्य स्त्री -
   अ) आचार्याणी आ) आचार्यानी इ) आचार्या

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

10. कुमारी - अत्र स्त्रियां प्रत्ययः कः

अ) ङीप् आ) ङीष् इ) ङीन्

योजयत -

1. सूरी	सूर्यस्य देवता स्त्री
2. त्रिफल	सूर्यस्य मानुषी स्त्री
3. सूर्या	टाप्
4. गोपी	ङीप्
5. किशोर	ङीष्

स्त्रीप्रत्ययान्तं चित्वा लिखत -

1. त्रिलोकीमन्तश्चरो वायुरिवात्मसाक्षी।
2. यथेन्द्राणी महेन्द्रस्य लक्ष्मीर्लक्ष्मीपतेर्यथा।
3. बिम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या।
4. सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते।

योग्यं स्त्रीप्रत्ययं संयोज्य वाक्यं पूरयत -

1. -------(अष्टाध्याय) जगन्माता।
2. (यवन-यवनलिपिः)----- मया न ज्ञायते।
3. अभिरूपाय कन्या ----- (देय)
4. (भव-भवस्य स्त्री) ----- तत्र मे देव, परिचर्तुं तदाभवत्।

परियोजना -

भवतां पाठ्यभागाधारेण स्त्रीप्रत्ययन्तरूपाणि अन्विष्य लिखत।

---

1. अजाद्यतष्टाप् (4-1-4) - अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
2. वयसि प्रथमे (4-1-20) - प्रथमवयोवाचिनोऽदन्तात् स्त्रियां ङीप् स्यात्।
3. द्विगोः (4-1-21) - अदन्तात् द्विगोर्ङीप् स्यात्।
4. अजादिगणः कश्चन अग्रे आयास्यति। तस्मिन् गणे ये शब्दाः सन्ति तेभ्यः स्त्रियां टाप् भवति।
5. पुंयोगादाख्यायाम् (4-1-48) - या पुमाख्या पुंयोगात् स्त्रियां वर्तते ततो ङीष् स्यात्।
6. सूर्याद्देवतायां चाब्वाच्यः - देवताभूतायां स्त्रियां पुंयोगाद्वर्तमानात् सूर्यशब्दात् चाप् वक्तव्यः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

7. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् (4-1-49) - एषामानुगागमः स्यात् ङीष् च।
8. इन्द्रादीनां षण्णां मातुलाचार्ययोश्च पुंयोग एवेष्यते। तत्र ङीषि सिद्धे आनुगागममात्रं विधीयते। इतरेषां चतुर्णामुभयम्।
9. हिमारण्ययोर्महत्त्वे (वा) - महद्धिमं हिमानी। महदरण्यम् अरण्यानी।
10. यवाद्दोषे (वा) - दुष्टो यवो यवानी।
11. यवनाल्लिप्याम् (वा) - यवनानां लिपिर्यवनानी।
12. मातुलोपाध्याययोरानुग्वा (वा)
13. (ग) आचार्यादणत्वं च
14. स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् (4-1-54) - असंयोगोपधमुपसर्जनं यत्स्वाङ्गं तदन्ताददन्तात्प्रातिपदिकाद्वा ङीष्।
15. हलोऽन्तराः संयोगः - अज्भिरव्याहितः हलः संयोगसंज्ञाः स्युः।
16. अन्त्यादलः पूर्वो वर्णः उपधासंज्ञः स्यात्।
17. नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च (4-1-55) - एभ्यो वा ङीष् स्यात्।
18. जातेरस्त्रीविषयादयोपधात् (4-1-63) - जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष् स्यात्।
19. अलोऽन्त्यात्पूर्व उपधा (1-1-65) - अन्त्यादलः पूर्वो वर्ण उपधासञ्ज्ञः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयः पाठः - इदन्तेभ्यः, उदन्तेभ्यः, ऋदन्तेभ्यः, नकारान्तेभ्यः च विहिताः स्त्रीप्रत्ययाः

पुनरावृत्तिः - पूर्वस्मिन् पाठे वयम् एतान् विषयान् पठितवन्तः।

- सामान्यतया ह्रस्व-अकारान्तेभ्यः टाप्-प्रत्ययः(आ) भवति।
- प्रथमवयोवाचकेभ्यः ह्रस्व-अकारान्तेभ्यः ङीप्-प्रत्ययः(ई) भवति।
- ह्रस्व-अकारान्तात् द्विगुसंज्ञकात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययः(ई) भवति।
- पुरुषेण सह सम्बन्धात् पुंवाचकः शब्दः स्त्रियां प्रयुक्तः चेत् तस्मात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष्(ई) भवति।
- सूर्यशब्दात् स्त्री देवता इति वक्तव्ये चाप् प्रत्ययः(आ) भवति।
- इन्द्र-वरुण-भव-शर्व-रुद्र-मृड-हिम-अरण्य-यव-यवन-मातुल-आचार्यशब्देभ्यः स्त्रियां ङीष्-प्रत्ययः(ई), आनुक् आगमश्च भवति।
- असंयोगोपधम् उपसर्जनं यत् स्वाङ्गं तदन्तात् अदन्तात् प्रातिपदिकात् स्त्रियां ङीष्-प्रत्ययः(ई) विकल्पेन भवति।
- जातिवाचकात् अयोपधात् अनियतस्त्रीलिङ्गात् च ङीष्-प्रत्ययः(ई) भवति।

प्रयोजनानि

1. अस्मिन् पाठे ह्रस्व-इकारान्तेभ्यः स्त्रियां कः प्रत्ययः भवतीति जानीमः।
2. ह्रस्व-उकारान्तेभ्यः स्त्रियां विहितान् प्रत्ययान् जानीमः।
3. ह्रस्व-ऋकारान्तेभ्यः स्त्रियां विहितान् प्रत्ययान् पठामः।
4. नकारान्तेभ्यः विहितान् प्रत्ययान् पठामः।

1. ह्रस्व-इकारान्ताः

1. मनुष्यजातिवाचकात् ह्रस्व-इकारान्तात् प्रातिपदिकात् स्त्रियां ङीष्-प्रत्ययः भवति।[1] यथा - दाक्षि → दाक्षी। अत्र दाक्षि इति मनुष्यजातिवाचकः, ह्रस्व-इकारान्तश्च। अतः ङीष्-प्रत्ययः कृतः।
2. इकारान्तात् प्रातिपदिकात् ङीष्-प्रत्ययः विकल्पेन भवति[2]। क्तिन्नान्तात् न भवति। यथा - रात्रि → रात्री/रात्रिः। शकटि → शकटी/शकटिः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

क्तिन् इति कृत्प्रत्ययः, प्रयोगेषु ति इति श्रूयते। क्तिन्नन्ताः सर्वे शब्दाः स्त्रीलिङ्गे भवन्ति। परन्तु स्त्रियां टाप् आदौ न भवन्ति। यथा - गतिः।

2. ह्रस्व-उकारान्ताः

1. उकारान्तात् गुणवाचिनः विकल्पेन ङीष्-प्रत्ययः भवति[3]। यथा - मृदु → मृद्वी/मृदुः। पटु → पट्वी/पटुः। मृदु, पटु - इत्यादयः गुणवाचकाः।
2. उदन्तात् अयोपधात् मनुष्यजातिवाचिनः स्त्रियाम् ऊङ्-प्रत्ययः भवति[4]। यथा - कुरु → कुरूः।
3. पङ्गुशब्दात् ऊङ्-प्रत्ययः भवति[5]। यथा - पङ्गु → पङ्गूः।
4. उपमानवाचि पूर्वपदम्, ऊरु-उत्तरपदं यत्प्रातिपदिकं तस्मात् ऊङ्-प्रत्ययः भवति[6]। यथा - करभोरु → करभोरूः। उपमानम् = सादृश्यम्। करभोरू इति उदाहरणे करभौ इव ऊरू यस्याः इति विग्रहवाक्यम्। अत्र करभ इति उपमानम्, पूर्वपदं च। ऊरु इति उत्तरपदम्। अतः स्त्रियाम् ऊङ्-प्रत्ययः भवति।

3. ह्रस्व-ऋकारान्ताः

1. ऋकारान्तेभ्यः ङीप्-प्रत्ययः भवति[7]। यथा - कर्तृ → कर्त्री। रचयितृ → रचयित्री। कर्तृ, रचयितृ, दातृ - इत्यादयः ऋकारान्ताः। तेभ्यः ङीप्-प्रत्ययः भवति।
2. स्वसृ, तिसृ, चतसृ, ननादृ, दुहितृ, यातृ, मातृ - एतेभ्यः सप्तभ्यः स्त्रीप्रत्ययाः न भवन्ति।[8] अतः स्त्रियामपि स्वसृ, तिसृ, चतसृ, ननादृ, दुहितृ, यातृ, मातृ - इत्येव रूपाणि भवन्ति। तत्र ङीप् अथवा टाप् न भवत्येव।

4. नकारान्ताः

1. नकारान्तेभ्यः ङीप्-प्रत्ययः भवति।[9] यथा - गुणिन् - गुणिनी। मेधाविन् - मेधाविनी। दण्डिन् - दण्डिनी।
2. नकारान्तसंख्यावाचकेभ्यः स्त्रीप्रत्ययाः न भवन्ति।[10] यथा - पञ्चन्, सप्तन्।
3. युवन् शब्दात् ति-प्रत्ययः भवति[11]। युवन् - युवतिः।
4. मन्-अन्तात् ङीप् न भवति[12] , विकल्पेन डाप् भवति[13]। यथा - सीमन्। वस्तुतः अत्र न्-अन्ते अस्ति। अतः ङीप् प्राप्तः, परन्तु मन्-अन्तः। अतः ङीप् न कृतः। विकल्पेन डाप्-प्रत्ययः। टिलोपे सीमा इति भवति। डापः डित्त्वात् सीमन्-शब्दे टेः अन् इत्यस्य लोपः। सीमन् + डाप् → सीमन् + आ → सीम् + आ → सीमा।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

विशेषविहिताः - क्वचित् केभ्यश्चित् तत्तत्समूहपठितेभ्यः शब्देभ्यः प्रत्ययाः भवन्ति, तथा एकस्यैव शब्दस्य विशेषनियमः भवति।

गणपठितेभ्यः प्रत्ययविधानम् - गणः नाम समूहः।

1. अजादिगणे विद्यमानेभ्यः शब्देभ्यः टाप् इति प्रत्ययः भवति[14]। अज → अजा। एडक → एडका। अश्व → अश्वा। चटक →चटका। मूषिक → मूषिका। बाल → बाला। वत्स → वत्सा। होड → होडा। मन्द → मन्दा। विलात → विलाता इत्यादयः।
2. गौरादिगणे विद्यमानेभ्यः ङीष्-प्रत्ययः भवति[15]। गौर → गौरी। मत्स्य → मत्सी। मनुष्य → मनुषी। शृङ्ग → शृङ्गी। हय → हयी। गवय → गवयी। मुकय → मुकयी। ऋष्य, पुट - इत्यीदि।

मत्स्य-शब्दस्य यकारस्य लोपः ङीपरे।[16] मनुष्य-शब्दे तद्धितयकारस्यापि लोपः ईति परे।[17]

3. बह्वादिगणे विद्यमानेभ्यः ङीष्-प्रत्ययः भवति[18]। बहु, पद्धति, अङ्कति, अञ्चति, अंहति, वंहति, शकटि, शक्ति, शारि, वारि, गति, अहि, कपि - इत्यादयः। बहु → बह्वी। पद्धति → पद्धती।
4. शार्ङ्गरवादिगणे विद्यमानेभ्यः शब्देभ्यः ङीन्-प्रत्ययः भवति[19]। शार्ङ्गरव, कापटव, गौगुलव, ब्राह्मण, गौतम, कामण्डलेय, ब्राह्मकृतेय, आनिचेय, आनिधेय, आशोकेय, वात्सायन - इत्यादि। यथा - शार्ङ्गरवी।

इत्संज्ञां निमित्तीकृत्य विहिताः -

1. इत्संज्ञक-उकारान्ताः ये शब्दाः सन्ति तेभ्यः ङीप् भवति।[20]

उकार-इत्संज्ञकाः यथा - मतुप्, क्तवतु, क्वसु, भवतु - इत्यादयः।

➢ मतुप् - बुद्धिमत् इति मतुप्-अन्तः, मतुप् इति प्रत्ययः। अत्र उकारस्य पकारस्य च इत्संज्ञा भवति। अतः बुद्धिमत् शब्दः उकार-इत्संज्ञकः। तेन स्त्रियां ङीप्-प्रत्ययः भवति। बुद्धमती इति भवति। नीतिमत्→ नीतिमती - इत्यादीनि उदाहरणानि। मतुबन्तेभ्यः सर्वेभ्यः ङीप् भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

➢ **क्तवतु** - ज्ञातवत्, शक्तवत् इत्यादयः क्तवतु-अन्ताः। अर्थात् उकार-इत्संज्ञकः प्रत्ययः अत्र अस्ति। अतः एतेभ्यः स्त्रियां ङीप्-प्रत्ययः भवति, ज्ञातवती, शक्तवती - इत्येवं रूपाणि भवन्ति।

➢ **क्वसु** - सेदिवस्। अयं क्वसुप्रत्ययान्तः। क्वसु इति लिटः आदेशः। अर्थात् उकार-इत्संज्ञकः प्रत्ययः अत्र अस्ति। अतः अस्मात् ङीप्-प्रत्ययः भवति। सेदुषी। अत्र वकारस्य सम्प्रसारणम् उकारः।

➢ **भवतु** - अयं सर्वनामसंज्ञकः। अन्त्यस्य उकारस्य इत्संज्ञा। अतः अयम् उगित्। अतः स्त्रियां ङीप्। भवती।

2. ऋकार-इत्संज्ञकाः ये सन्ति तेभ्यः/तदन्तेभ्यः ङीप् भवति।[21] शतृ इति ऋकार-इत्संज्ञकः प्रत्ययः। अतः तदन्तात् स्त्रियां ङीप् भवति। यथा - कुर्वत् इति शतृ। ऋकारः इत्संज्ञा। तस्मात् स्त्रियां ङीपि कुर्वती।

परस्मैपदिभ्यः धातुभ्यः परस्य लटः स्थाने शतृ आदेशः भवति।[22]

विशेषः - भ्वादिगणे विद्यमानेभ्यः धातुभ्यः कृतस्य लटः स्थाने शतृ आदेशे कृते स्त्रियां ङीपि नुमागमः भवति।[23] यथा - पचत् + ङीप् → पचन्त् + ङीप् → पचन्ती।

विशेषः - दिवादिगणे विद्यमानेभ्यः धातुभ्यः कृतस्य लटः स्थाने शतृ आदेशे कृते स्त्रियां ङीपि नुमागमः भवति।[24] यथा - दीव्यत् + ङीप् → दीव्यन्त् + ङीप् → दीव्यन्ती।

विशेषः - तुदादिगणे विद्यमानेभ्यः धातुभ्यः कृतस्य लटः स्थाने शतृ-आदेशे कृते स्त्रियां ङीपि विकल्पेन नुमागमः भवति।[25] यथा - तुदत् → तुदत् + ङीप् → तुदन्त्/ तुदत् + ङीप् → तुदन्ती/तुदती।

3. षिद्भ्यः स्त्रियां ङीष् भवति।[26] षित् - षः इत्(इत्-संज्ञा) यस्य सः। यथा - नर्तक → नर्तकी। नृती गात्रविक्षेपे इति धातोः ष्वुन् प्रत्यये कृते नर्तक इति निष्पन्नम्। ष्वुन् इति प्रत्ययः षित् वर्तते। अतः स्त्रियां ङीष्-प्रत्ययः भवति। एवं खनकी इत्यादयः।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठसार: -

1. मनुष्यजातिवाचकात् ह्रस्व-इकारान्तात् प्रातिपदिकात् स्त्रियां ङीष्-प्रत्यय: भवति।
2. इकारान्तात् प्रातिपदिकात् ङीष्-प्रत्यय: विकल्पेन भवति। क्तिन्नन्तात् न भवति।
3. उकारान्तात् गुणवाचिन: विकल्पेन ङीष्-प्रत्यय: भवति।
4. उदन्तात् अयोपधात् मनुष्यजातिवाचिन: स्त्रियाम् ऊङ्-प्रत्यय: भवति।
5. पङ्गुशब्दात् ऊङ्-प्रत्यय: भवति।
6. उपमानवाचि पूर्वपदम् ऊरु-उत्तरपदं यत्प्रातिपदिकं तस्मात् ऊङ्-प्रत्यय: भवति।
7. ऋकारान्तेभ्य: ङीप्-प्रत्यय: भवति।
8. स्वसृ, तिसृ, चतसृ, ननादृ, दुहितृ, यातृ, मातृ - एतेभ्य: स्त्रिप्रत्यया: न भवन्ति।
9. नकारान्तेभ्य: स्त्रियां ङीप् भवति।
10. नकारान्तसंख्यावाचकेभ्य: स्त्रीप्रत्यया: न भवन्ति।
11. युवन् शब्दात् ति-प्रत्यय: भवति।
12. मन्-अन्तात् ङीप् न भवति।
13. मन्-अन्तात् प्रातिपदिकात् विकल्पेन डाप् भवति।
14. अजादिगणे पठितेभ्य: टाप् इति प्रत्यय: भवति।
15. गौरादिगणे पठितेभ्य: ङीष्-प्रत्यय: भवति।
16. बह्वादिगणे पठितेभ्य: ङीष्-प्रत्यय: भवति।
17. शार्ङ्गरवादिगणे पठितेभ्य: ङीन्-प्रत्यय: भवति।
18. उकार-इत्संज्ञका: ये सन्ति तेभ्य:/तदन्तेभ्य: ङीप् भवति।
19. ऋकार-इत्संज्ञका: ये सन्ति तेभ्य:/तदन्तेभ्य: ङीप् भवति।
20. षिद्भ्य: स्त्रियां ङीष् भवति।

अभ्यास:

एकेन वाक्येन समाधत्त -

1. दाक्षी इत्यत्र क: स्त्रीप्रत्यय: ? कथञ्च विहित: ?
2. स्वस्रादय: कति सन्ति ? के च ते ?
3. ङीन्-प्रत्यय: केभ्य: भवति ?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. पङ्गुशब्दात् स्त्रियां कः प्रत्ययः भवति ?
5. युवन्-शब्दात् कः स्त्रीप्रत्ययः भवति ?

योग्यमुत्तरं चिनुत -

1. खनकी अत्र कः स्त्रीप्रत्ययः ?
   अ) ङीप्　　आ) ङीष्　　इ) ङीन्
2. भवती अत्र स्त्रीप्रत्ययः कः ?
   अ) ङीष्　　आ) ङीप्　　इ) ङीन्
3. ब्राह्मणी अत्र कः स्त्रीप्रत्ययः ?
   अ) ङीन्　　आ) ङीप्　　इ) ङीष्
4. दामा अत्र कः स्त्रीप्रत्ययः ?
   अ) टाप्　　आ) डाप्　　इ) चाप्
5. पञ्चन्-शब्दात् स्त्रियां कः प्रत्ययः ?
   अ) ङीप्　　आ) टाप्　　इ) न कश्चन
6. चतुर्-शब्दस्य स्त्रियां किं रूपम् ?
   अ) चतस्त्री　　आ) चतस्रा　　इ) चतसृ
7. नान्तात् शब्दात् स्त्रियां कः प्रत्ययः ?
   अ) ङीप्　　आ) ङीष्　　इ) ङीन्
8. श्रीमत्-शब्दात् स्त्रियां कः प्रत्ययः ?
   अ) ङीप्　　आ) ङीष्　　इ) ङीन्
9. क्रीणत् - अस्य स्त्रियां किं रूपम् ?
   अ) क्रीणन्ती　　आ) क्रीणती　　इ) क्रीणाती
10. बहुशब्दात् स्त्रियां कः प्रत्ययः ?
   अ) ऊङ्　　आ) ङीष्　　इ) ङीप्

योजयत -

1. तेजस्विन्	ङीन्
2. नागनासोरु	ङीष्
3. गौतम	टाप्
4. दाक्षि	ङीप्
5. बाल	ऊङ्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्त्रीप्रत्ययान्तं चित्वा लिखत -

1. शारीवकितव भवतानुकूलिता पातिताक्षेण।
2. गौरी प्रोक्ता कान्यकुब्जे
3. मृद्वी च वैदूर्यमयी भूमि: सर्वत्र तिष्ठतु।
4. अजामेकां लोहितशुक्लकृष्णाम्।

योग्यं स्त्रीप्रत्ययं संयोज्य लिखत -

1. (कुन्ति) ------- पाण्डवानां माता।
2. (दाक्षि)-------- पाणिने: माता।
3. छात्रा (पठत्)------ लिखति।
4. इयं (लघु)------ बालिका।

परियोजना -

भवतां पाठ्यभागाधारेण स्त्रीप्रत्ययन्तरूपाणि अन्विष्य लिखत।

---

1. इतो मनुष्यजाते: (4-1-65) - ङीष् स्यात्।
2. (ग) सर्वतोऽक्तिन्नर्थादित्येके
3. वोतो गुणवचनात् (4-1-44) - उदन्तादगुणवाचिनो वा ङीष् स्यात्।
4. ऊङुत: (4-1-66) - उकारान्तादयोपधान्मनुष्यजातिवाचिन: स्त्रियामूङ् स्यात्।
5. पङ्गोश्च (4-1-68) - पङ्गू:। पङ्गुशब्दात् स्त्रियाम् ऊङ् स्यात्।
6. ऊरूत्तरपदादौपम्ये (4-1-69) - उपमानवाचिपूर्वपदमूरूत्तरपदं यत्प्रातिपदिकं तस्मादूङ् स्यात्।
7. ऋन्नेभ्यो ङीप् (4-1-5) - ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप्स्यात्।
8. न षट्स्वस्रादिभ्य: (4-1-10) - षट्संज्ञकेभ्य: स्वस्रादिभ्यश्च ङीप्टापौ न स्त:।
9. ऋन्नेभ्यो ङीप् (4-1-5) - ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप्स्यात्।
10. न षट्स्वस्रादिभ्य: (4-1-10) - षट्संज्ञकेभ्य: स्वस्रादिभ्यश्च ङीप्टापौ न स्त:।
11. यूनस्ति: (4-1-77) - युवन् शब्दात्तिप्रत्यय: स्यात् स च तद्धित:।
12. मन: (4-1-11) - मन्नन्तान्न ङीप्।
13. डाबुभाभ्यामन्यतरस्याम् (4-1-13) - सूत्रद्वयोपात्ताभ्यां डाब् वा स्यात्।
14. अजाद्यतष्टाप् (4-1-4) - अजादीनामकारान्तस्य च वाच्यं यत्स्त्रीत्वं तत्र द्योत्ये टाप् स्यात्।
15. षिद्गौरादिभ्यश्च (4-1-41) - षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात्।
16. मत्स्यस्य ङ्याम् (वा)
17. हलस्तद्धितस्य (6-4-150) - हल उत्तरस्य तद्धितयकारस्योपधाभूतस्य लोप: स्यादीति परे।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

18. बह्वादिभ्यश्च (4-1-45) - एभ्यो वा ङीष् स्यात्।
19. शार्ङ्गरवाद्यञो ङीन् (4-1-73) - शार्ङ्गरवादेरञो योऽकारस्तदन्ताच्च जातिवाचिनो ङीन् स्यात्।
20. उगितश्च (4-1-6) - उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्।
21. उगितश्च (4-1-6) - उगिदन्तात्प्रातिपदिकात् स्त्रियां ङीप् स्यात्।
22. लटः शतृशानचावप्रथमासमानाधिकरणे (2-2-124) - अप्रथमान्तेन सामानाधिकरण्ये सति लटः शतृ, शानच् इत्येतौ आदेशौ भवतः।
23. शप्श्यनोर्नित्यम् (7-1-81) - शप्श्यनोरात्परोः यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्याच्छीनद्योः परतः।
24. शप्श्यनोर्नित्यम् (7-1-81) - शप्श्यनोरात्परोः यः शतुरवयवस्तदन्तस्य नित्यं नुम् स्याच्छीनद्योः परतः।
25. आच्छीनद्योर्नुम् (7-1-80) - अवर्णान्तादङ्गात्परो यः शतुरवयवस्तदन्तस्याङ्गस्य नुम् वा स्याच्छीनद्योः परतः।
26. षिद्गौरादिभ्यश्च (4-1-41) - षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्धितप्रकरणम्

प्रथमः पाठः - तद्धितप्रत्ययपरिचयः

प्रयोजनानि -

1. अस्मिन् पाठे तद्धितप्रत्ययाः के इति जानीमः।
2. तद्धितप्रत्ययाः केभ्यः भवन्ति इति पठामः।
3. तद्धितप्रत्ययेषु परेषु सामान्यकार्याणि कानि इति जानीमः।
4. तद्धितप्रत्ययानां स्थाने आदेशान् जानीमः।

प्रातिपदिकेभ्यः विधीयमानाः प्रत्ययाः त्रिधा सन्ति। 1.सुप्प्रत्ययाः 2.स्त्रियां विहिताः टाबादयः प्रत्ययाः 3.तद्धितप्रत्ययाः - इति।

प्रातिपदिकेभ्यः विधीयमानाः प्रत्ययाः
- **1.सुप्-प्रत्ययाः**
- **2.स्त्रियां विहिताः टाबादयः प्रत्ययाः**
- **3.तद्धितप्रत्ययाः**

सुप्प्रत्ययाः - प्रातिपदिकेभ्यः कर्त्रादिषु कारकेषु अर्थेषु एकत्वादिसंख्यार्थे च प्रथमा- सप्त विभक्तिप्रत्ययाः (आहत्य 21 प्रत्ययाः) ये विधीयन्ते ते सुप्-प्रत्ययाः। ते च पूर्वं पठिताः यथा -

विभक्तिः	एकवचनम्	द्विवचनम्	बहुवचनम्
प्रथमाविभक्तिः	सु	औ	जस्
द्वितीयाविभक्तिः	अम्	औट्	शस्
तृतीयाविभक्तिः	टा	भ्याम्	भिस्
चतुर्थीविभक्तिः	ङे	भ्याम्	भ्यस्
पञ्चमीविभक्तिः	ङसि	भ्याम्	भ्यस्
षष्ठीविभक्तिः	ङस्	ओस्	आम्
सप्तमीविभक्तिः	ङि	ओस्	सुप्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

स्त्रीप्रत्यया : - स्त्रीत्वे द्योत्ये प्रातिपदिकेभ्यः विधीयमानाः प्रत्ययाः स्त्रीप्रत्ययाः। ते च - टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ष्फ, ऊङ्, ति। स्त्रीप्रत्ययप्रकरणे एतेषां विचारः कृतः।

तद्धितप्रत्यया : - सुप्-प्रत्ययेभ्यः, स्त्रीप्रत्ययेभ्यश्च भिन्नाः, विभिन्नेषु अपत्यादिषु अर्थेषु समर्थसुबन्तेभ्यः विधीयमानाः प्रत्ययाः तद्धितप्रत्ययाः। तद्धिताधिकारे विहिताः प्रत्ययाः। यथा - अण्, अञ्, फक्, यञ् - इत्यादयः तद्धितप्रत्ययाः।

तद्धितप्रत्ययेषु परेषु कार्याणि



1. तद्धितप्रत्यये यदि ञ्-इत् अथवा ण्-इत् भवति तर्हि प्रातिपदिकस्य आदेः अचः वृद्धिः भवति।[1] इञ् इति प्रत्ययः ञितः उदाहरणम्। अण् इति प्रत्ययः णितः उदाहरणम्। यथा - दशरथस्य अपत्यम् = दाशरथिः। एवम् औपगवः।
2. तद्धितप्रत्यये यदि क्-इत् भवति तर्हि प्रातिपदिकस्य आदेः अचः वृद्धिः भवति।[2] ढक्, ठक् - इत्यादयः प्रत्ययाः कितः उदाहरणानि। यथा विनतायाः अपत्यं पुमान् = विनता + ढक् - वैनतेयः।

आदिः अच्	वृद्धिवर्णः	उदाहरणम्
अ/आ	आ	दशरथ + इञ् - दाशरथिः
इ/ई/ए/ऐ	ऐ	इन्द्र + अण् - ऐन्द्रम्
उ/ऊ/ओ/औ	औ	उपगु + अण् - औपगवः
ऋ	आर्	ऋषि + अण् - आर्षः

3. उकारान्तस्य भस्य गुणः(ओ)आदेशः भवति अजादौ तद्धिते प्रत्यये परे।[3] अर्थात् उकारस्य ओकारः भवति। यथा - शङ्कु+यत्→शङ्को+यत्→शङ्कव्+य→शङ्कव्यम्। अत्र शङ्कु इति शब्दात् हितमित्यर्थे यत् इति तद्धितप्रत्ययः[4]

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

कृतः। शङ्कु इति उकारान्तात् परः तद्धितप्रत्ययः। अतः उकारस्य गुणः ओकारः कृतः। शङ्को य इति स्थितौ, ओकारस्य अवादेशे[5] शङ्कव्य इति निष्पन्नम्।

उकारान्तः भसंज्ञकः + तद्धितप्रत्ययः
/
गुणः

> भसंज्ञा - अजादिषु यकारादिषु तद्धितप्रत्ययेषु परेषु पूर्वभागस्य भ इति संज्ञा भवति। शङ्कु + य, अत्र शङ्कु इत्यस्य भ इति संज्ञा।

4. इकारान्तस्य अकारान्तस्य च भस्य अङ्गस्य ईकारे तद्धिते च परे लोपः भवति।[6]
यथा - अत्रि + (ढक्)एय → अत्र् + एय → आत्र् + एय → आत्रेयः। अत्रिशब्दात् ढक्-प्रत्ययः। ढस्थाने एयादेशः। इकारस्य लोपः, आदिवृद्धिश्च कृता। तेन आत्रेय इति निष्पन्नम्।

अङ्गम् (इकारान्तम्/अकारान्तम्) + प्रत्ययः (ईकारः/तद्धितः)
इ/अ-लोपः

> अङ्गसंज्ञा - प्रत्यये परे पूर्वभागस्य अङ्गम् इति संज्ञा। यथा - राम सु, अत्र सु प्रत्यये परे राम इत्यस्य अङ्गम् इति संज्ञा।

5. तद्धितप्रत्ययाः समर्थसुबन्तात् भवन्ति।

6. तद्धितप्रत्ययानां स्थाने कुत्रचित् केचन आदेशाः भवन्ति।

स्थानिनः	आदेशाः	उदाहरणानि
फ्	आयन्[7]	नाडायनः
ढ्	एय्[8]	आञ्जनेयः
ख्	ईन्[9]	आढ्यकुलीनः
छ्	ईय्[10]	शालीयः
घ्	इय्[11]	क्षत्रियः
ठ्	इक्[12]	आक्षिकः

पाठसारः -

1. प्रातिपदिकेभ्यः विधीयमानाः प्रत्ययाः त्रिधा सन्ति। 1.सुप्रत्ययाः 2.स्त्रीप्रत्ययाः 3.तद्धितप्रत्ययाः इति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. प्रातिपदिकेभ्य: प्रथमादय: सप्त विभक्तिप्रत्यया: ये विधीयन्ते ते सुप्-प्रत्यया:। ते च 21 प्रत्यया: सन्ति।
3. स्त्रीप्रत्यया: - स्त्रीत्वे द्योत्ये प्रातिपदिकेभ्य: विधीयमाना: प्रत्यया: स्त्रीप्रत्यया:।
4. सुप्-प्रत्ययेभ्य:, स्त्रीप्रत्ययेभ्यश्च भिन्ना: विभिन्नेषु अपत्यादिषु अर्थेषु समर्थसुबन्तेभ्य: विधीयमाना: प्रत्यया: तद्धितप्रत्यया:।
5. तद्धितप्रत्यये यदि ञ्-इत् अथवा ण्-इत् भवति तर्हि प्रातिपदिकस्य आदे: अच: वृद्धि: भवति।
6. तद्धितप्रत्यये यदि क्-इत् भवति तर्हि प्रातिपदिकस्य आदे: अच: वृद्धि: भवति।
7. उकारान्तस्य भस्य अङ्गस्य गुण:(ओ)आदेश: भवति तद्धिते प्रत्यये परे।
8. इकारान्तस्य अकारान्तस्य च भस्य अङ्गस्य ईकारे तद्धिते च परे अन्त्यस्य इकारस्य अकारस्य च लोप: भवति।
9. तद्धितप्रत्ययानां स्थाने कुत्रचित् केचन आदेशा: भवन्ति। फ् - आयन्, ढ् - एय्, ख् - ईन्, छ् - ईय्, घ् - इय्, ठ् - इक्।

अभ्यास:

एकेन वाक्येन समाधत्त -

1. तद्धितप्रत्यय: ञित् चेत् किं कार्यं भवति?
2. तद्धितप्रत्यया: नाम किम्?
3. प्रातिपदिकेभ्य: विधीयमाना: प्रत्यया: के सन्ति?
4. सुप्प्रत्यया: कति सन्ति? के च ते?
5. "अङ्गम्" नाम किम्?
6. भसंज्ञा कस्य भवति?

योग्यमुत्तरं चिनुत -

1. प्रातिपदिकेभ्य: विधीयमाना: प्रत्यया: कतिधा?
   अ) द्विधा आ) त्रिधा इ) चतुर्धा
2. इकारान्तस्य अङ्गस्य तद्धिते परे किं कार्यं भवति?
   अ) लोप: आ) दीर्घ: इ) गुण:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. तद्धितप्रत्ययस्य आदौ विद्यमानस्य फस्य कः आदेशः ?

अ) ईन्   आ) आयन्   इ) ईय्

4. उकारान्तस्य भस्य अङ्गस्य तद्धितप्रत्यये परे किं कार्यं भवति ?

अ) वृद्धिः   आ) गुणः   इ) लोपः

5. इकारान्तस्य भस्य अङ्गस्य तद्धितप्रत्यये परे किं कार्यं भवति ?

अ) गुणः   आ) लोपः   इ) वृद्धिः

6. तद्धितप्रत्ययः यदि कित् तर्हि प्रातिपदिकस्य किं कार्यं भवति ?

अ) आदेः अचः वृद्धिः   आ) वृद्धिनिषेधः   इ) आदेः अचः गुणः

7. तद्धितप्रत्ययः यदि णित् तर्हि प्रतिपदिकस्य किं कार्यं भवति ?

अ) आदेः अचः गुणः   आ) आदेः अचः वृद्धिः   इ) न किमपि

8. तद्धितप्रत्ययाः कस्माद् भवन्ति ?

अ) धातोः   आ) प्रातिपदिकात्   इ) तिङ्भ्यः

9. अकारान्तस्य अङ्गस्य तद्धिते परे किं कार्यं भवति ?

अ) अकारस्य लोपः   आ) वृद्धिः   इ) गुणः

10. तद्धितप्रत्ययाः यदि ञित् तर्हि प्रातिपदिकस्य किं कार्यं भवति ?

अ) आदेः अचः गुणः   आ) अन्त्यस्य अचः गुणः   इ) आदेः अचः वृद्धिः

योजयत -

1. ठ्	ईय्
2. घ्	ईन्
3. ख्	इक्
4. ढ्	इय्
5. छ्	एय्

---

1. तद्धितेष्वचामादेः (7-2-117) - ञिति णिति च प्रत्यये परेऽचामादेरचो वृद्धिः स्यात्।
2. किति च (7-2-118) - किति तद्धिते च परेऽचामादेरचो वृद्धिः स्यात्।
3. ओर्गुणः (6-4-146) - उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते।
4. तस्मै हितम् (5-1-5) - चतुर्थीसमर्थात् हितम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः भवति।
5. एचोऽयवायावः (6-1-78) - एचः क्रमादय् अव् आय् आव् एते आदेशः स्युरचि।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

6. यस्येति च (6-4-184) - भस्येवर्णावर्णयोर्लोपः स्यादीकारे तद्धिते च परे।

7. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2) - प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।

8. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2) - प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।

9. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2) - प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।

10. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2) - प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।

11. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2) - प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।

12. ठस्येकः (7-3-50) - अङ्गात्परस्य ठस्येकादेशः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

द्वितीयः पाठः - अणधिकारः

पुनरावृत्तिः - पूर्वस्मिन् पाठे वयं एतान् अंशान् ज्ञातवन्तः।

- प्रातिपदिकेभ्यः विधीयमानाः प्रत्ययाः त्रिधा सन्ति। 1. सुप्प्रत्ययाः 2. स्त्रीप्रत्ययाः, 3. तद्धितप्रत्ययाः - इति।
- प्रातिपदिकेभ्यः प्रथमादयः सप्त विभक्तिप्रत्ययाः ये विधीयन्ते ते सुप्-प्रत्ययाः। ते च 21 प्रत्ययाः सन्ति।
- स्त्रीप्रत्ययाः - स्त्रीत्वे द्योत्ये प्रातिपदिकेभ्यः विधीयमानाः प्रत्ययाः स्त्रीप्रत्ययाः।
- सुप्-प्रत्ययेभ्यः, स्त्रीप्रत्ययेभ्यश्च भिन्नाः विभिन्नेषु अपत्यादिषु अर्थेषु प्रातिपदिकेभ्यः विधीयमानाः प्रत्ययाः तद्धितप्रत्ययाः।
- तद्धितप्रत्यये यदि ञ्-इत् अथवा ण्-इत् भवति तर्हि प्रातिपदिकस्य आदेः अचः वृद्धिः भवति।
- तद्धितप्रत्यये यदि क्-इत् भवति तर्हि प्रातिपदिकस्य आदेः अचः वृद्धिः भवति।
- उकारान्तस्य भस्य अङ्गस्य गुणः(ओ)आदेशः भवति तद्धिते प्रत्यये परे।
- इकारान्तस्य, अकारान्तस्य च भस्य अङ्गस्य ईकारे तद्धिते च परे अन्त्यस्य इकारस्य, अकारस्य च लोपः भवति।
- तद्धितप्रत्ययानां स्थाने कुत्रचित् केचन आदेशाः भवन्ति। फ् - आयन्, ढ् - एय्, ख् - ईन्, छ् - ईय्, घ् - इय्, ठ् - इक्।
- तद्धितप्रत्ययाः प्रातिपदिकात् एव भवन्ति।

प्रयोजनानि -

1. अस्मिन् पाठे तद्धितप्रत्ययानां सामान्यं विभागं जानीमः।
2. सामान्यतद्धितप्रत्ययाः कति सन्ति, के च ते इति जानीमः।
3. अण् इति तद्धितप्रत्ययः कतिषु अर्थेषु भवति इति पठामः।
4. विशिष्टेषु अर्थेषु अण्-प्रत्ययस्य अपवादान् जानीमः।

सामान्याः तद्धितप्रत्ययाः पञ्च वर्तन्ते। ते च प्रत्ययाः 1. अण् 2. ठक् 3.यत् 4. छ 5. ठञ् इति। एते पञ्च प्रत्ययाः कतिषु अर्थेषु विहिताः इति अधः

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चित्रमाध्यमेन दर्शितम्। अण् इति प्रथमः प्रत्ययः 44 अर्थेषु विहितः। ठक् इति द्वितीयः प्रत्ययः 36 अर्थेषु विहितः। यत् इति तृतीयः प्रत्ययः 31 अर्थेषु विहितः। छ इति चतुर्थः प्रत्ययः 3 अर्थेषु विहितः। ठञ् इति पञ्चमः प्रत्ययः 27 अर्थेषु विहितः।



तद्धितप्रत्ययेषु अण्-प्रत्ययः 44 अर्थेषु विहितः। अयमेव अणधिकारः। अधिकारो नाम - एतेषु 44 अर्थेषु विशेषः विधिः कश्चन नास्ति चेत् अण्-प्रत्ययः एव सर्वेभ्यः प्रातिपदिकेभ्यः भवति। यदि विशेषतया कश्चन प्रत्ययः प्रातिपदिकेभ्यः उक्तः तर्हि तेभ्यः अपवादत्वेन सः एव प्रत्ययः भवति, अण् तु न भवति।

अण्-अधिकारे विद्यमानाः अर्थाः केचन अत्र उच्यन्ते -

1. अपत्यम् - अपत्यम् अर्थात् सन्ततिः। अस्मिन् अर्थे षष्ठीसमर्थात् सामान्यतया अण्-प्रत्ययः भवति।[1] षष्ठीसमर्थात् अयं प्रत्ययः भवति। यथा - उपगोः अपत्यम् औपगवः।

उपगु + ङस्[2] + अण्→उपगु + अण्→उपगु + अ→औपगु[3] + अ→औपगो[4]+ अ→औपगव→औपगवः।

अत्र उपगु ङस् इति षष्ठ्यन्तम्। तस्मात् अपत्यम् इति अर्थे अण् इति प्रत्ययः कृतः। एवं शिवस्य अपत्यम् - शैवः[5]

शिव+ङस्+अण्→शिव+अण्→शिव+अ→शैव+अ→शैव्+अ→शैव→शैवः।

अपत्यार्थे अणप्रत्ययस्य अपवादाः -

अपत्यार्थे अण्-प्रत्ययं प्रबाध्य विशेषतया केचन प्रत्ययाः विहिताः। तेषु सामान्याः अत्र उच्यन्ते।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

1. ह्रस्व-अकारान्तेभ्यः इञ् इति प्रत्ययः[6] भवति, ञकारस्य इत्संज्ञायां लोपे इ इति अवशिष्यते। यथा - दशरथस्य अपत्यं = दाशरथिः।

दशरथ + ङस् + इञ् → दशरथ + इञ् → दशरथ + इ → दाशरथ + इ → दाशरथ् + इ → दाशरथि → दाशरथिः।

अत्र दशरथ इति ह्रस्व-अकारान्तः। अतः तस्मात् इञ् इति प्रत्ययः कृतः। दाशरथिः। एवं दक्षस्य अपत्यम् = दाक्षिः।

दक्ष + ङस् + इञ् → दक्ष + इञ् → दक्ष + इ → दाक्ष + इ → दाक्ष् + इ → दाक्षि → दाक्षिः।

2. स्त्रीप्रत्ययान्तेभ्यः प्रातिपदिकेभ्यः अपत्यार्थे ढक्-प्रत्ययः भवति।[7] अत्र ककारस्य इत्संज्ञायां लोपे ढ इति अवशिष्यते। ढ् स्थाने एय् आदेशः भवति। यथा - अञ्जनायाः अपत्यम् = आञ्जनेयः।

अञ्जना + ङस्[8] + ढक् → अञ्जना + ढक् → अञ्जना + ढ → आञ्जना + ढ → आञ्जना[9] + एय् + अ → आञ्जन्[10] + एय् + अ → आञ्जनेय → आञ्जनेयः।

अञ्जना इति स्त्रीप्रत्ययान्तः। अतः ढक्-प्रत्ययः कृतः। अत्र (ढ - ढ् + अ) ढ् स्थाने एव एय् आदेशः भवति। ततः परं विद्यमानः अकारः तथैव भवति। आञ्जनेय् + अ = आञ्जनेयः। एवं विनतायाः अपत्यं = वैनतेयः।

विनता + ङस् + ढक् → विनता + ढक् → विनता + ढ → वैनता + ढ → वैनता + एय् + अ → वैनत् + एय् + अ → वैनतेय → वैनतेयः।

अण्-अधिकारे अन्ये अर्थाः -

2. **समूहः** - षष्ठीसमर्थात् समूहः इत्यर्थे अण् इति प्रत्ययः भवति।[11] यथा - काकानां **समूहः** = काकम्।

काक + आम् + अण् → काक + अण् → काक + अ → काक् + अ → काक → काकम्।

अत्र काक + आम् इति षष्ठ्यन्तात् समूहार्थे अण्-प्रत्ययः कृतः। एवं शुकानां समूहः = शौकम्।

शुक + आम् + अण् → शुक + अण् → शुक + अ → शौक + अ → शौक् + अ → शौक → शौकम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

3. रक्तार्थ : - तृतीयासमर्थात् रागविशेषवाचिन: शब्दात् रक्तम् इत्येतस्मिन्नर्थे अण् प्रत्यय: भवति।[12] यथा - कषायेण रक्तं वस्त्रं = काषायम्।

कषाय + टा + अण्→कषाय + अण्→कषाय + अ→काषाय + अ→काषाय् + अ→काषाय→काषायम्।

अत्र कषाय + टा इति तृतीयान्तात् रक्तम् इत्यर्थे अण्-प्रत्यय: कृत:।

4,5. अधीतार्थ :/वेदार्थ : - द्वितीयासमर्थात् अधीते, वेद = इति एतयो: अर्थयो: अणादय: प्रत्यया: भवन्ति।[13] यथा- व्याकरणम् अधीते, वेद वा = वैयाकरण:। निरुक्तम् अधीते = नैरुक्त:।

निरुक्त + अम् + अण्→निरुक्त + अण्→निरुक्त + अ→नैरुक्त + अ→नैरुक्त् + अ→नैरुक्त→नैरुक्त:।

अत्र निरुक्त + अम् इति द्वितीयान्तात् अध्ययनार्थे अण्-प्रत्यय: कृत:।

6. निवासार्थ : - षष्ठीसमर्थात् निवास: इति अर्थे अण् आदय: प्रत्यया: भवन्ति।[14] यथा - शिबीनां निवास: देश: = शैब:।

शिबि+आम्+अण्→शिबि+अण्→शिबि+अ→शैबि+अ→शैब्+अ→शैब→शैब:।

अत्र शिबि + आम् इति षष्ठ्यन्तात् निवासार्थे अण्-प्रत्यय: कृत:।

7. भवार्थ : - सप्तमीसमर्थात् भवार्थे अण् आदय: प्रत्यया: भवन्ति।[15] यथा - मथुरायां भव: = माथुर:।

मथुरा + ङि + अण्→मथुरा + अण्→मथुरा + अ→माथुरा + अ→माथुर् + अ→माथुर→माथुर:।

अत्र मथुरा + ङि इति सप्तम्यन्तात् भवार्थे अण् इति प्रत्यय: कृत:।

8. विकारार्थ : - षष्ठ्यन्तसमर्थात् विकारार्थे अण्-प्रत्यय: भवति।[16] यथा - मृत्तिकाया: विकार: = मार्त्तिक:।

मृत्तिका + ङस् + अण्→मृत्तिका + अण्→मृत्तिका + अ→मार्त्तिका + अ→मार्त्तिक् + अ→मार्त्तिक→मार्त्तिक:।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

पाठसार:

1. सामान्या: तद्धितप्रत्यया: पञ्च वर्तन्ते। ते च प्रत्यया: - 1. अण् 2. ठक् 3. यत् 4. छ 5. ठञ् - इति।
2. तद्धितप्रत्ययेषु अण् इति प्रत्यय: 44 अर्थेषु विहित:।
3. ठक् इति द्वितीय: प्रत्यय: 36 अर्थेषु विहित:।
4. यत् इति तृतीय: प्रत्यय: 31 अर्थेषु विहित:।
5. छ इति चतुर्थ: प्रत्यय: 3 अर्थेषु विहित:।
6. ठञ् इति पञ्चम: प्रत्यय: 27 अर्थेषु विहित:।
7. अण्-अधिकारे विद्यमाना: अर्था: केचन अत्र उक्ता:। ते च - अपत्यार्थ:, समूहार्थ:, रक्तार्थ:, अधीत-वेदार्थ:, निवासार्थ:, भवार्थ:, विकारार्थ:।
8. अपत्यार्थे अण्प्रत्ययस्य अपवादा: - ह्रस्व-अकारान्तेभ्य: इञ् इति प्रत्यय: भवति। स्त्रीप्रत्ययान्तेभ्य: प्रातिपदिकेभ्य: अपत्यार्थे ढक्-प्रत्यय: भवति।

अभ्यास:

एकेन वाक्येन समाधत्त -

1. तद्धितप्रत्यया: सामान्येन कति सन्ति? के च ते?
2. अस्मिन् पाठे अण्-प्रत्ययस्य अर्था: के उक्ता:?
3. अपत्यार्थे अण्-प्रत्ययस्य अपवादा: के उक्ता:?
4. अपत्यशब्दार्थ: क:?
5. ठक्-प्रत्यय: कतिषु अर्थेषु विहित:?

योग्यमुत्तरं चिनुत -

1. उपगो: अपत्यम् -
   अ) औपग: आ) औपगव: इ) उपगव:
2. कुन्त्या: अपत्यम्
   अ) कौन्तेय: आ) कौन्त: इ) कुन्त:
3. रावणस्य अपत्यम् -
   अ) रावण: आ) रावणेय: इ) रावणि:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. मञ्जिष्ठया रक्तम् -

अ) मञ्जिष्ठम् आ) माञ्जिष्टम् इ) माञ्जिष्ठम्

5. न्यायमधीते -

अ) नैयायिक: आ) नियायिक: इ) न्यायिक:

6. बकानां समूहः -

अ) बाकम् आ) बकम् इ) बैकम्

7. उत्सानां निवास: देश: -

अ) उत्स: आ) औत्स: इ) उत्सि:

8. भस्मन: विकार: -

अ) भस्मन: आ) भास्म: इ) भास्मन:

9. स्त्रीप्रत्ययान्तेभ्य: अपत्यार्थे क: प्रत्यय: भवति ?

अ) अण् आ) इञ् इ) ढक्

10. स्त्रुघ्ने भव: ?

अ) स्त्रौघ्न: आ) स्त्रुघ्न: इ) स्त्रोघ्न:

योजयत -

1. गाङ्गेय:	44
2. दाशरथि:	3
3. आश्वपतम्	ढक्
4. छ-अर्था:	अण्
5. अण्-अर्था:	इञ्

योग्यं तद्धितप्रत्ययं संयोज्य लिखत -

1. सुपर्णाया: अपत्यं पुमान्

2. मरुतस्य अपत्यं पुमान्

3. भानो: अपत्यं पुमान्

4. निमित्तानि वेद

5. ऋजुनावां निवास: देश:

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्धितान्तं चित्वा प्रकृतिं प्रत्ययं च विभज्य लिखत -

1. राघवः पातु माम्।
2. वासुकिश्चैव नागानां गणाः क्रोधतमोऽधिकः।
3. शाकुन्तलेयः भारतदेशस्य राजा आसीत्।
4. न काषायैर्भवेद्यतिः।
5. अयं महापुरुषः छान्दसः।

---

1. तस्यापत्यम् (4-1-92) - षष्ठ्यन्तात्कृतसन्धेः समर्थादपत्येऽर्थे उक्ता वक्ष्यमाणाश्च प्रत्यया वा स्युः।
2. सुपो धातुप्रातिपदिकयोः (2-4-71) - एतयोरवयवस्य सुपो लुक् स्यात्।
3. तद्धितेष्वचामादेः (7-2-117) - ञिति णिति च प्रत्यये परेऽचामादेरचो वृद्धिः स्यात्।
4. ओर्गुणः (6-4-146) - उवर्णान्तस्य भस्य गुणः स्यात्तद्धिते।
5. शिवादिभ्योऽण् (4-1-112) - शिवादिभ्यः अपत्ये अर्थे अण् प्रत्ययः स्यात्।
6. अत इञ् (4-1-95) - अदन्तं यत्प्रातिपदिकं तत्प्रकृतिकात्षष्ठ्यन्तादिञ्स्यादपत्येऽर्थे।
7. स्त्रीभ्यो ढक् (4-1-120) - स्त्रीप्रत्ययान्तेभ्यो ढक् स्यात्।
8. सुपो धातुप्रातिपदिकयोः (2-4-71) - एतयोरवयवस्य सुपो लुक् स्यात्।
9. किति च (7-2-118) - किति तद्धिते च परेऽचामादेरचो वृद्धिः स्यात्।
10. आयनेयीनीयियः फढखछघां प्रत्ययादीनाम् (7-1-2) - प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः।
11. तस्य समूहः (4-2-37) - षष्ठीसमर्थात् समूहः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्।
12. तेन रक्तं रागात् (4-2-1) - तृतीयासमर्थात् रागविशेषवाचिनः शब्दात् रक्तम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्।
13. तदधीते तद्वेद (4-2-59) - द्वितीयासमर्थात् अधीते वेद इत्येतयोः अर्थयोः यथाविहितं प्रत्ययः स्यात्।
14. तस्य निवासः (4-2-69) - षष्ठीसमर्थात् निवासः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्। देशनामधेये गम्यमाने।
15. तत्र भवः (4-3-53) - सप्तमीसमर्थात् भवः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्।
16. तस्य विकारः (4-3-134) - षष्ठीसमर्थात् विकारः इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तृतीयः पाठः - ठक्-अधिकारः

पुनरावृत्तिः - पूर्वस्मिन् पाठे वयं एतान् अंशान् ज्ञातवन्तः।

- सामान्याः तद्धितप्रत्ययाः पञ्च वर्तन्ते। ते च प्रत्ययाः 1. अण् 2. ठक् 3. यत् 4. छ 5. ठञ् - इति।
- तद्धितप्रत्ययेषु प्रथमः अण्-प्रत्ययः 44 अर्थेषु विहितः।
- ठक् इति द्वितीयः प्रत्ययः 36 अर्थेषु विहितः।
- यत् इति तृतीयः प्रत्ययः 31 अर्थेषु विहितः।
- छ इति चतुर्थः प्रत्ययः 3 अर्थेषु विहितः।
- ठञ् इति पञ्चमः प्रत्ययः 27 अर्थेषु विहितः।
- अण्-अधिकारे विद्यमानाः अर्थाः केचन उक्ताः। ते च - अपत्यार्थः, समूहार्थः, रक्तार्थः, अधीत-वेदार्थः, निवासार्थः, भवार्थः, विकारार्थः।
- अपत्यार्थे अण्प्रत्ययस्य अपवादाः - ह्रस्व-अकारान्तेभ्यः इञ् इति प्रत्ययः भवति। स्त्रीप्रत्ययान्तेभ्यः प्रातिपदिकेभ्यः अपत्यार्थे ढक्-प्रत्ययः भवति।

प्रयोजनानि -

1. अस्मिन् पाठे वयं ठक्-प्रत्ययस्य विधानं जानीमः।
2. ठक्-प्रत्ययः केषु अर्थेषु भवति इति पठामः।
3. यत्-प्रत्ययः कस्मिन् अर्थे भवतीति ज्ञास्यामः।
4. छ-प्रत्ययः केषु अर्थेषु भवतीति पठामः।

ठक्-अधिकारे विद्यमानाः अर्थाः केचन -

ठक्-प्रत्ययस्य ठस्थाने इक-आदेशः भवति।

1. संस्कृतम् - तृतीयासमर्थात् संस्कृतम् इत्यर्थे ठक् आदयः प्रत्ययाः भवन्ति।[1] यथा - दध्ना संस्कृतम् दाधिकम्। अत्र दध्ना इति तृतीयान्तं समर्थम्। तस्मात् संस्कृतम् इत्यर्थे ठक् इति प्रत्ययः भवति।

दधि + टा + ठक् → दधि + ठक् → दधि + ठ → दधि + इक[2] → दाधि[3] + इक → दाध् + इक → दाधिक → दाधिकम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. तरति - तृतीयासमर्थात् तरति इत्यर्थे ठक् प्रत्ययः भवति।[4] यथा - उडुपेन तरति औडुपिकः। अत्र उडुपेन इति तृतीयान्तम्। तस्मात् तरति इत्यर्थे ठक् इति प्रत्ययः। येन तरणं करोति तस्मात् ठक् इत्यर्थः।

उडुप + टा + ठक्→उडुप + ठक्→उडुप + ठ→औडुप + ठ→औडुप + इक→औडुप् + इक→औडुपिक→ औडुपिकः

3. चरति - तृतीयासमर्थात् चरति इत्यर्थे ठक् प्रत्ययः भवति।[5] यथा - शकटेन चरति शाकटिकः। अत्र शकटेन इति तृतीयान्तम्। तस्मात् चरति इत्यर्थे ठक् इति प्रत्ययः। येन साधनेन चरति = गच्छति, तथा तस्मात् ठक् इत्यर्थः।

चरति - गच्छति, भक्षयति।

शकट + टा + ठक्→शकट + ठक्→शकट + ठ→शाकट + ठ→शाकट + इक→शाकट् + इक→शकटिक→ शाकटिकः

4. उपसिक्तम् - व्यञ्जनवाचिनः तृतीयासमर्थात् उपसिक्तम् इत्येतस्मिन् अर्थे ठक्-प्रत्ययः भवति।[6] यथा - तक्रेण उपसिक्तः ओदनः ताक्रिकः। अत्र व्यञ्जनवाचकः तक्र इति, ततः तृतीयान्तात् ठक् प्रत्ययः।

उपसिक्तम् - सिञ्चनं कृतम्। व्यञ्जनम् - रसवर्धनाय प्रयुक्तं द्रव्यम्।

तक्र + टा + ठक्→तक्र + ठक्→तक्र + ठ→ताक्र + ठ→ताक्र + इक→ताक्र् + इक→ताक्रिक→ताक्रिकः

5. नियुक्तः - सप्तमीसमर्थात् नियुक्ते अर्थे ठक् प्रत्ययः भवति।[7] यथा - आपणे नियुक्तः आपणिकः। अत्र आपणे इति सप्तम्यन्तम्। तस्मात् नियुक्ते अर्थे ठक्-प्रत्ययः कृतः। आपणस्य संरक्षणे नियुक्तः इत्यर्थः।

नियुक्तः - संरक्षणादिषु प्रेरितः।

आपण + ङि + ठक्→आपण + ठक्→आपण + ठ→आपण + इक→आपण्+ इक→आपणिक→ आपणिकः।

यत्-अधिकारः -

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

साधु: - सप्तमीसमर्थात् साधु: इत्यर्थे यत् इति प्रत्यय: भवति।[8] यथा - कर्मणि साधु: कर्मण्य:। अत्र कर्मणि इति सप्तम्यन्तात् साधु: इत्यर्थे यत् इति प्रत्यय: कृत:।

साधु: - निपुण:, योग्य:।

कर्मन्+ङि+यत्→कर्मन् + यत्→कर्मन् + य→कर्मण् + य→कर्मण्य→कर्मण्य:।

छ-अधिकारे विद्यमाना: अर्था: -

छस्थाने ईय्-आदेश: भवति।

1. हितम् - चतुर्थीसमर्थात् हितम् इत्यर्थे छ आदय: प्रत्यया: भवन्ति।[9] यथा - रोगाय हितम्-रौगीयम्। अत्र रोगिणे इति चतुर्थ्यन्तात् हितम् इत्यर्थे छ-प्रत्यय: कृत:।

पट + ङे + छ→पट + छ→पट + ईय् →पट् + ईय् → पटीय:।

2. तदर्थं प्रकृतौ - चतुर्थ्यन्तात् विकृतिवाचकात् तदर्थायां प्रकृतौ अभिधेयायां छ-आदय: प्रत्यया: भवन्ति।[10] यथा - प्राकारेभ्य: इष्टका: - प्राकारीया: इष्टका:। अत्र प्राकार इति विकृतिवाचक:, स च चतुर्थ्यन्त:। अत: छ-प्रत्यय: भवति।

प्रकृति: नाम उपादानकारणम्। यथा - सुवर्णेन कुण्डलानां निर्माणं भवति। अत्र सुवर्णं कुण्डलानां प्रकृति:। विकृति: नाम अवस्थान्तरम्। अर्थात् परिणाम:। अत्र कुण्डलं सुवर्णस्य विकृति:।

प्राकार + भ्यस् + छ→प्राकार + छ→प्राकार + ईय् + अ→प्राकार् + ईय् + अ→प्राकारीय→प्राकारीया:।

3. तदस्य स्यात् - प्रथमासमर्थात् तदस्य स्यात् इति षष्ठ्यर्थे छ-आदय: प्रत्यया: भवन्ति।[11] यथा - प्राकार: आसाम् इष्टकानां स्यात् इति प्राकारीया: इष्टका:। बहूनाम् इष्टकानाम् एकत्रीकरणेन प्राकारनिर्माणं शक्यते। आभि: इष्टकाभि: प्राकार: कर्तुं शक्यते इत्यर्थ:।

प्राकार + सु + छ→प्राकार + छ→प्राकार + ईय् + अ→प्राकार् + ईय् + अ→प्राकारीय→प्राकारीया:।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

4. तदस्मिन् स्यात् - प्रथमासमर्थात् तदस्य स्यात् इत्यर्थे इव तदस्मिन् स्यात् इत्यर्थे छ-आदयः प्रत्ययाः भवन्ति।[12] यथा - प्राकारः अस्मिन् देशे स्यात् इति प्राकारीयः देशः। देशः प्राकारस्य निर्माणे योग्यः इत्यर्थः।

प्राकार + सु + छ→प्राकार + छ→प्राकार + ईय् + अ→प्राकार् + ईय् + अ→प्राकारीय→प्राकारीयः।

पाठसारः -

1. तृतीयासमर्थात् संस्कृतम् इत्यर्थे ठक् आदयः प्रत्ययाः भवन्ति।
2. तृतीयासमर्थात् तरति इत्यर्थे ठक् प्रत्ययः भवति।
3. तृतीयासमर्थात् चरति इत्यर्थे ठक् प्रत्ययः भवति।
4. व्यञ्जनवाचिभ्यः तृतीयासमर्थेभ्यः उपसिक्तम् इत्येतस्मिन् अर्थे ठक्-प्रत्ययः भवति।
5. सप्तमीसमर्थात् नियुक्ते अर्थे ठक् प्रत्ययः भवति।
6. सप्तमीसमर्थात् साधुः इत्यर्थे यत् इति प्रत्ययः भवति।
7. चतुर्थीसमर्थात् हितम् इत्यर्थे छ आदयः प्रत्ययाः भवन्ति।
8. चतुर्थ्यन्तात् विकृतिवाचकात् तदर्थायां प्रकृतौ अभिधेयायां छ-आदयः प्रत्ययाः भवन्ति।
9. प्रथमासमर्थात् तदस्य स्यात् इति षष्ठ्यर्थे छ-आदयः प्रत्ययाः भवन्ति।
10. प्रथमासमर्थात् तदस्मिन् स्यात् इत्यर्थे छ-आदयः प्रत्ययाः भवन्ति।

अभ्यासः

एकेन वाक्येन समाधत्त -

1. व्यञ्जनं नाम किम्?
2. प्रकृतेरर्थः कः?
3. विकृतेरर्थः कः?
4. साधुशब्दस्य अर्थः कः?
5. प्राकारेभ्यः इष्टकाः। अत्र कस्मिन्नर्थे कः प्रत्ययः?

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योग्यमुत्तरं चिनुत -

1. मारीचिकम् - अत्र कस्मिन्नर्थे ठक्?
   अ) उपसिक्ते आ)संस्कृते इ) उभयत्र
2. हास्तिक: - अत्र कस्मिन्नर्थे ठक्?
   अ) चरति आ) तरति इ) उभयत्र
3. सौपिकम् - अत्र कस्मिन्नर्थे ठक्?
   अ) संस्कृते आ) उपसिक्ते इ) उभयत्र
4. वत्सेभ्य: हित:
   अ) वत्स्य: आ) वत्सीय: इ) वात्सीय:
5. शरणाय साधु:
   अ) शरण्य: आ) शरणीय: इ) शरणेय:
6. आकरे नियुक्त:
   अ) आकर्य: आ) आकरिक: इ) आकरीय:
7. प्रासाद: अस्य स्यात्
   अ) प्रासाद: आ) प्रासादिक: इ) प्रासादीय:
8. अङ्गारेभ्य: एतानि - अत्र क: प्रत्यय: कर्तव्य:?
   अ) छ आ) यत् इ) ठक्
9. सामन्य:- कस्मिन्नर्थे क: प्रत्यय:?
   अ) साधु:, यत् आ) हितम्, छ इ) साधु:, छ
10. दध्ना चरति-
   अ) छ आ) यत् इ) ठक्

योजयत -

1. रोगीयम्	तदर्थायां प्रकृतौ
2. प्राकारीया:	हितम्
3. आपणिक:	चरति
4. ताक्रिक:	नियुक्त:
5. शाकटिक:	उपसिक्तम्

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

तद्धितप्रत्ययान्तं चित्वा कस्मिन्नर्थे विहितः इति लिखत -

1. दाध्निकाः माषापूपाः न सेवनीयाः।
2. दौवारिकः धूर्तान् द्वारि एव अवरुणद्धि।
3. कर्मण्यः न कदापि त्याज्यः।
4. प्रासादीया भूमिरियम्।

योग्यं तद्धितप्रत्ययं संयोज्य लिखत -

1. काण्डप्लवेन तरति यः सः__________
2. शुल्कशालायां नियुक्तः यः सः__________
3. शरणे साधुः यः सः__________
4. प्राकारः अस्मिन् देशे स्यात्__________

---

1. संस्कृतम् (4-4-3) - तृतीयासमर्थात् संस्कृतम् इत्यस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्।
2. ठस्येकः (7-3-50) - अङ्गात्परस्य ठस्येकादेशः स्यात्।
3. किति च (7-2-118) - किति तद्धिते च अचामादेरचः वृद्धिः स्यात्। अश्वपतेरपत्यादि आश्वपतम्।
4. तरति (4-4-5) - तृतीयासमर्थात् तरति इत्येतस्मिन्नर्थे ठक् प्रत्ययः भवति।
5. चरति (4-4-8) - तृतीयासमर्थात् चरति इत्येतस्मिन्नर्थे ठक् प्रत्ययः भवति।
6. व्यञ्जनैरुपसिक्ते (4-4-26) - व्यञ्जनवाचिभ्यः प्रातिपदिकेभ्यः तृतीयासमर्थेभ्यः उपसिक्ते इत्येतस्मिन्नर्थे ठक् प्रत्ययः स्यात्।
7. तत्र नियुक्तः (4-4-69) - सप्तमीसमर्थात् नियुक्तः इत्येतस्मिन्नर्थे ठक् प्रत्ययः स्यात्।
8. तत्र साधुः (4-4-98) - सप्तमीसमर्थात् हितम् इत्येतस्मिन्नर्थे यत् प्रत्ययः स्यात्।
9. तस्मै हितम् (5-1-5) - चतुर्थीसमर्थात् हितम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः स्यात्।
10. तदर्थं विकृतेः प्रकृतौ (5-1-12) - विकृतिवाचिनः प्रातिपदिकात् प्रकृतावभिधेयायां यथाविहितं प्रत्ययः स्यात्।
11. तदस्य तदस्मिन् स्यादिति (5-1-16) - प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययः स्यात्।
12. तदस्य तदस्मिन् स्यादिति (5-1-16) - प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययः स्यात्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

चतुर्थः पाठः - ठञ्-अधिकारः, भावार्थप्रत्ययाः, अतिशयार्थप्रत्ययाः।

पुनरावृत्तिः -

- ➢ तृतीयासमर्थात् संस्कृतम् इत्यर्थे ठक् आदयः प्रत्ययाः भवन्ति।
- ➢ तृतीयासमर्थात् तरति इत्यर्थे ठक् प्रत्ययः भवति।
- ➢ तृतीयासमर्थात् चरति इत्यर्थे ठक् प्रत्ययः भवति।
- ➢ व्यञ्जनवाचिभ्यः तृतीयासमर्थेभ्यः उपसिक्तम् इत्येतस्मिन् अर्थे ठक्-प्रत्ययः भवति।
- ➢ सप्तमीसमर्थात् नियुक्तः इत्यर्थे ठक् प्रत्ययः भवति।
- ➢ सप्तमीसमर्थात् साधुः इत्यर्थे यत् इति प्रत्ययः भवति।
- ➢ चतुर्थीसमर्थात् हितम् इत्यर्थे छ आदयः प्रत्ययाः भवन्ति।
- ➢ चतुर्थ्यन्तात् विकृतिवाचकात् प्रकृतौ अभिधेयायां छ-आदयः प्रत्ययाः भवन्ति।
- ➢ प्रथमासमर्थात् तदस्य स्यात् इत्यर्थे छ-आदयः प्रत्ययाः भवन्ति।
- ➢ प्रथमासमर्थात् तदस्मिन् स्यात् इत्यर्थे छ-आदयः प्रत्ययाः भवन्ति।

प्रयोजनानि -

1. अस्मिन् पाठे ठञ्-प्रत्ययः केषु अर्थेषु भवतीति पठामः।
2. भावार्थे के प्रत्ययाः भवन्ति इति जानीमः।
3. अतिशयार्थे विहितान् प्रत्ययान् जानीमः।

ठञ्-अधिकारे केचन अर्थाः -

1.निर्वृत्तम् - तृतीयासमर्थात् कालवाचिनः निर्वृत्तम् इत्यर्थे ठञ् इति प्रत्ययः भवति।[1] यथा - संवत्सरेण निर्वृत्तं सांवत्सरिकम्। निर्वृत्तम् - निष्पादितम्।

संवत्सर + टा + ठञ्→संवत्सर + ठञ्→संवत्सर + ठ→सांवत्सर + ठ→सांवत्सर + इक→सांवत्सर् + इक→ सांवत्सरिक→सांवत्सरिकम्।

क्रीतम् - तृतीयासमर्थात् क्रीतम् इत्यर्थे ठञ्-आदयः प्रत्ययाः स्युः।[2] यथा - गोपुच्छेन क्रीतं गौपुच्छिकम्।

गोपुच्छ + टा + ठञ्→गोपुच्छ + ठञ्→गोपुच्छ + ठ→गौपुच्छ + ठ→गौपुच्छ + इक→गौपुच्छ् + इक→ गौपुच्छिक→गौपुच्छिकम्।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

2. परिमाणम् - प्रथमासमर्थात् अस्य परिमाणमित्यर्थे ठञ्-आदयः प्रत्ययाः भवन्ति[3], प्रथमासमर्थं परिमाणं चेत् तद्भवति। यथा - प्रस्थं परिमाणमस्य प्रास्थिकः राशिः।

प्रस्थ + सु + ठञ्→प्रस्थ + ठञ्→प्रस्थ + ठ→प्रास्थ + ठ→प्रास्थ + इक→प्रास्थ्+ इक→प्रास्थिक→प्रास्थिकः।

3. भावार्थे प्रत्ययाः - भावादिषु अर्थेषु सामान्यतया केचन प्रत्ययाः विहिताः। ते च - त्व, तल्, ष्यञ्, इमनिच्।

भावः - प्रकृतिजन्यबोधे प्रकारः।

भावार्थे सामान्यतया षष्ठ्यन्तेभ्यः त्वप्रत्ययः तल्-प्रत्ययश्च भवति।[4]

त्व - त्वप्रत्ययान्ताः नपुंसकलिङ्गे भवन्ति। यथा - गोः भावः गोत्वम्।

तल् - तल्-प्रत्यये त इति शिष्यते। तल्-प्रत्ययान्ताः स्त्रीलिङ्गे भवन्ति। यथा - गुरोः भावः गुरुता।

षष्ठ्यन्तेभ्यः त्वतलौ भवतः। यथा-गोः भावः - गोत्वम्/गोता। मृदोः भावः - मृदुत्वम्/मृदुता। गुरोः भावः - गुरुत्वम्/गुरुता। लघोः भावः - लघुत्वम्/लघुता।

ष्यञ् - वर्णवाचकेभ्यः दृढादिभ्यः च भावार्थे ष्यञ्-प्रत्ययः[5], इमनिच्-प्रत्ययश्च भवतः। त्वप्रत्ययः, तल्-प्रत्ययश्च भवत्येव।

ष्यञ्-प्रत्यये यकारः शिष्यते। यस्मात् षष्ठ्यन्तात् ष्यञ् विधीयते। तस्य आदेः अचः वृद्धिः भवति। यथा - शुक्लस्य भावः - शौक्ल्यम्। जडस्य भावः - जाड्यम्। त्वप्रत्यये कृते शुक्लत्वम्, तल्-प्रत्यये कृते - शुक्लता च। अतः-

भावार्थे	ष्यञ्	इमनिच्	त्व	तल्
शुक्लस्य भावः	शौक्ल्यम्	शुक्लिमा	शुक्लत्वम्	शुक्लता
जडस्य भावः	जाड्यम्	जडिमा	जडत्वम्	जडता
दृढस्य भावः	दार्ढ्यम्	द्रढिमा	दृढत्वम्	दृढता

अतिशयार्थे प्रत्ययाः - तमप्, इष्ठन्, तरप्, ईयसुन् - इति चत्वारः प्रत्ययाः अतिशयार्थे भवन्ति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अनेकेषु एकस्य गुणाधारेण आधिक्यकथने तस्मात् गुणवाचकात् शब्दात् तमप्-प्रत्ययः, इष्ठन्-प्रत्ययश्च भवति।[6]

तमप्-प्रत्यये **तम** इति शिष्यते। **इष्ठन्**-प्रत्यये **इष्ठ** इति शिष्यते।

यथा - सर्वे इमे आढ्याः, अयम् एषाम् अतिशयेन आढ्यः इत्यर्थे - आढ्यतमः। अत्र अनेकेषु आढ्य-इति आढ्यत्वरूपगुणाधारेण आधिक्यकथनम्। अतः गुणवाचकात् आढ्य-शब्दात् तमप्-प्रत्ययः।

इष्ठन् उदाहरणम् - सर्वे इमे पटवः, अयम् एषाम् अतिशयेन पटुः - पटिष्ठः।

द्वयोः एकस्य आधिक्यकथने धर्मवाचकात् शब्दात् तरप्-प्रत्ययः, ईयसुन्-प्रत्ययश्च भवतः।

यथा-द्वौ इमौ आढ्यौ। अयम् अनयोः अतिशयेन आढ्यः इत्यर्थे - आढ्यतरः।

ईयसुनः उदाहरणम् - अयमनयोः अतिशयेन लघुः - लघीयान्।

क्रियायाः तुल्यत्वे - तृतीयासमर्थात् तुल्या क्रिया इत्यर्थे वतिप्रत्ययः भवति।[7]

यथा - ब्राह्मणेन तुल्यं वर्तते इत्यर्थे ब्राह्मणवत् इति भवति।

पाठसारः-

1. तृतीयासमर्थात् कालवाचिनः निर्वृत्तम् इत्यर्थे ठञ् इति प्रत्ययः भवति।
2. तृतीयासमर्थात् क्रीतम् इत्यर्थे ठञ्-आदयः प्रत्ययाः स्युः।
3. प्रथमासमर्थात् अस्य परिमाणमित्यर्थे ठञ्-आदयः प्रत्ययाः भवन्ति।
4. भावार्थे सामान्यतया षष्ठ्यन्तेभ्यः त्वप्रत्ययः, तल्-प्रत्ययश्च भवति।
5. वर्णवाचकेभ्यः दृढादिभ्यः च ष्यञ्-प्रत्ययः, इमनिच्-प्रत्ययश्च भवति।
6. अनेकेषु एकस्य गुणाधारेण आधिक्यकथने तस्मात् गुणवाचकात् शब्दात् तमप्-प्रत्ययः, इष्ठन्-प्रत्ययश्च भवति।
7. द्वयोः एकस्य आधिक्यकथने धर्मवाचकात् शब्दात् तरप्-प्रत्ययः, ईयसुन्-प्रत्ययश्च भवतः।
8. तृतीयासमर्थात् तुल्या क्रिया इत्यर्थे वतिप्रत्ययः भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

अभ्यासः

एकेन वाक्येन समाधत्त

1. अस्मिन् पाठे ठञ्-प्रत्ययः केषु अर्थेषु विहितः ?
2. भावार्थे के प्रत्ययाः भवन्ति ?
3. ष्यञ्-प्रत्ययः केभ्यः भवति ?
4. तमप्-प्रत्ययः कदा भवति ?
5. तरप्-प्रत्ययः कदा भवति ?

योग्यमुत्तरं चिनुत

1. सप्तत्या क्रीतम्
   अ) सप्तिकम् आ) साप्तिकम् इ) न उभयम्
2. माषिकम् अत्र कस्मिन्नर्थे प्रत्ययः ?
   अ) क्रीतार्थे आ) परिमाणार्थे इ) न उभयत्र
3. भावः नाम कः ?
   अ) तात्पर्यम् आ) क्रिया इ) प्रकृतिजन्यबोधे प्रकारः
4. कृष्णस्य भावः
   अ) कार्ष्ण्यम् आ) कृष्णता इ) उभयम्
5. लघिमा- अत्र प्रत्ययः कः ?
   अ) इमा आ) इमन् इ) इमनिच्
6. शुक्लस्य भावः कति रूपाणि भवन्ति ?
   अ) 4 आ) 5 इ) 6
7. गरीयस् - अत्र प्रत्ययः कः ?
   अ) इष्ठन् आ) ईयसुन् इ) इमनिच्
8. पटिष्ठः - अत्र प्रत्ययः कः ?
   अ) इष्ठन् आ) ईयसुन् इ) इमनिच्
9. सर्वे इमे दर्शनीयाः, अयम् एषाम् अतिशयेन दर्शनीयः
   अ) दर्शनीयतरः आ) दर्शनीयतमः इ) न उभयम्
10. द्वौ इमौ पटू, अयम् अनयोरतिशयेन पटुः
    अ) पटुतरः आ) पटीयान् इ) उभयमपि

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

योजयत -

1. अयमनयोः अतिशयेन लघुः	लघिष्ठः
2. अयमेषाम् अतिशयेन लघुः	लघीयान्
3. क्रीतार्थे ठञ्	द्रौणिकः
4. परिमाणे ठञ्	आशीतिकम्

तद्धितप्रत्ययान्तं चित्वा कस्मिन्नर्थे विहितः इति लिखत -

1. अथवाप्ययुतान्येव नास्ति तेषु सहायता।
2. सांवत्सरिकं विश्वविद्यालयस्येदं महासदनम्।
3. ब्राह्मणवदधीते क्षत्रियः।
4. कृष्णा गवां सम्पन्नक्षीरतमा।
5. अल्पाच्तरम्।

योग्यं तद्धितप्रत्ययं संयोज्य लिखत -

1. अर्धमासेन निर्वृत्तम्।
2. कुडवः परिमाणमस्य।
3. षष्ट्या क्रीतम्।
4. शीतस्य भावः।

---

1. तेन निर्वृत्तम् (5-1-79) - तृतीयासमर्थात् कालवाचिनः निर्वृत्तम् इत्येतस्मिन्नर्थे ठञ् प्रत्ययः भवति।
2. तेन क्रीतम् (5-1-37) - तृतीयासमर्थात् क्रीतम् इत्येतस्मिन्नर्थे यथाविहितं प्रत्ययः भवति।
3. तदस्य परिमाणम् (5-1-57) - प्रथमासमर्थात् तस्य इति षष्ठ्यर्थे यथाविहितं प्रत्ययः भवति, यत् प्रथमासमर्थं परिमाणं चेद् तद् भवति।
4. तस्य भावस्त्वतलौ (5-1-119) - षष्ठीसमर्थात् भावः इत्येतस्मिन्नर्थे त्वतलौ प्रत्ययौ भवतः।
5. वर्णदृढादिभ्यः ष्यञ् च (5-1-123) - वर्णविशेषवाचिभ्यः प्रातिपदिकेभ्यः दृढादिभ्यश्च ष्यञ्-प्रत्ययः भवति, चकारात् इमनिच् च, तस्य भावः इत्येतस्मिन्नर्थे।
6. अतिशायने तमबिष्ठनौ (5-3-55) - अतिशयविशिष्टार्थवृत्तेः स्वार्थे एतौ स्तः। अयमेषामतिशयेनाढ्यः।
7. तेन तुल्यं क्रिया चेद्वतिः (5-1-115) - तृतीयासमर्थात् तुल्यम् इत्यस्मिन्नर्थे वतिः प्रत्ययः भवति, यत् तुल्यं क्रिया चेत् सा भवति।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ग्रन्थपरिचय:

मिथ: भावविनिमयाय भाषा भवति उत्तमं साधनम्। भाषाया: परिशुद्धि: व्याकरणाधीना। प्राथमिकस्तरे संस्कृतव्याकरणशास्त्राध्ययने छात्रा: काठिन्यमनुभवन्ति। सन्धि-कारक-समासानाम् अध्ययनं छात्रा: सुगमेन यथा कर्तुं शक्नुयु: तदर्थं संस्कृतव्याकरणशास्त्रप्रवेशिनी इत्याख्य: प्रथमो भाग: सहायको जात: इति श्रुत्वा तोषं महान्तम् अनुभवामि। ग्रन्थस्य भाषा सरला सुखबोधा च। ग्रन्थस्य द्वितीयोऽयं भाग: त्रिभि: प्रकरणै: विभक्त:। सुबन्तप्रकरणम्, स्त्रीप्रत्ययप्रकरणम्, तद्धितप्रकरणम् इति। सुबन्तप्रकरणे पञ्चविंशति: पाठा:, स्त्रीप्रत्ययप्रकरणे त्रय: पाठा:, तद्धितप्रकरणे च चत्वार: पाठा: सन्ति। एकैकस्यापि पाठस्यादौ प्रयोजनानि प्रतिपादितानि। अनन्तरं पाठ: बोधित:, पाठस्य सारोऽपि बोधित:। पाठस्यान्ते अभ्यास: प्रदत्त:। एतेन पठितु: तत्तत्पाठसम्बन्धिनी सूक्ष्मा बुद्धि: संवर्धते।

रचयित्रीपरिचय:

नाम : डा. शिवकुमारी काटूरि

जन्मस्थानम् : आन्ध्रप्रदेशराज्यस्य गुण्टूरुमण्डलस्य पोन्नुरु।

पितरौ : काटूरि लक्ष्मीनरसिंहाराव:, नगराजकुमारी

अध्ययनम् : B.A (O.L) श्रीसाक्षिभावनारायणस्वामिसंस्कृतकलाशाला,पोन्नूरु। व्याकरणाचार्य:,राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति:।

विद्यावारिधि: : शोधविषय: - आन्ध्रव्याकरणे पाणिनीयप्रभाव:।

अध्यापनम् : पूर्वं व्याकरणविभागे अतिथि-अध्यापिका, सम्प्रति दूरविद्याविभागे अतिथि-अध्यापिका, राष्ट्रियसंस्कृतविश्वविद्यालय:, तिरुपति:।

प्रकाशनम् : सहायसम्पादिका - नव्यसिद्धान्तकौमुदी (स्वरप्रक्रिया), संस्कृतव्याकरणशास्त्रप्रवेशिनी (प्रथमो भाग:)।

ISBN : 978-93-90038-88-6

9 789390 038886

Price ₹ 700.00

CC-0. In Public Domain. Cuddalore Collection. TN.